In Public domain. Digitization Muthulakshmi Research Academy

नित्याषोडशिकार्णवः ऋजुविमर्शिन्या
अर्थरत्नावल्या च संवलितः 88
सं: व्रजवल्लभद्विवेद, वाराणस्यां, Sampurnanand
Vikramasam: 1890 (च)

nditions undoubtedly, but it does not generally represent the more or s hidden side of the esoteric culture.

The editor of the present work, who has had my blessings and pport throughout his literary career, has tried his best to make the lition as useful as he could, not only to the readers of this particular xt but also to a serious Tantra student from every possible point of ew. He has utilised all available Mss. on the text and commentaries, s tried to afford a fairly complete knowledge of the valuable works ilised by the two commentators. This means a long continued inteigent labour in widely varied areas.

The topics raised or referred to in the text or commentaries have een brought together under suitable heads and much usefull light has een thrown on them. The Introduction is specially valuable for the bibligraphy of the allied Tantric literature during the period. An interesting xpository note on the 64 Tantras has been furnished, in which the well nown three fold classification has been mentioned, viz. the list furnihed by the Śrī Kaṇṭha Samhitā, the list in Nityā Ṣoḍaśikārṇava (or ulacūḍāmaṇi) and the list in the Sarvollāsa Tantra. The last classiication is not really based on the authority of the Sarvollāsa but on that f the Toḍala Tantra as quoted in the Sarvollāsa.

The Introduction has interesting notes on some important topics . g. the essential nature of Mātrikā, Mantra, Mudrā, Pītha, Chakra, wo fold Krama and the Upāsanā of Tripura Sundarī.

The Introduction is a highly interesting piece of original research work in a field hardly accessible to modern academical scholarship. It is a fairly detailed history of the Tripura worship in some of its aspects, as preserved through transmission from master to pupil and arranged in a historical and critical perspective. In view of the importance of the work it seems to me that it deserves to be translated into Hindi and given a wider publicity.

7-9-68
2/A. Sigra
Varanasi

Gopinath Kaviraj

42 2.1 88

उपोद्घातः

नित्याषोडशिकार्णवं व्याख्याद्वयोपेतं तन्त्रशास्त्रानुशीलनरुचीनां मनीषिणां समक्षं समुपस्थापयतामस्माकं परमं प्रसीदति चेतः। इतः पञ्चवर्षेभ्यः पूर्वं वाराणसेयसंस्कृतविश्वविद्यालयतः प्रकाशितस्य दीपिकासेतुबन्धसहितस्य योगिनीहृदयस्य द्वितीयसंस्करणमुद्रणावसरे प्रकाशनविभागस्थैरस्माभिः पूर्वं चतुश्शतीसेतुबन्धे शिवानन्दविद्यानन्दयोस्तत्प्रणीतयोर्ऋजुविमर्शिन्यर्थरत्नावल्योश्च भूयोभूयः समुल्लेखः समवालोकि। ततः सरस्वतीभवनपुस्तकालयस्थासु तन्त्रशास्त्रमातृकासु नाथानन्दान्तानां गुरूणां कृतीरनुसन्दधद्भिरस्माभिरधिगता ऋजुविमर्शिनीग्रन्थस्यापूर्णा मातृका। तदानीन्तनानामनुसन्धानसंचालकानां परमश्रद्धास्पदानां श्रीक्षेत्रेशचन्द्रचट्टोपाध्यायमहानुभावानां निदेशमनुसृत्य दीपिकासेतुबन्धोद्धृतवचनानां स्थलसंवादाय विविधतन्त्रशास्त्रग्रन्थावलोकने प्रवृत्तैरस्माभिर्महार्थमञ्जरीपरिमलत ऋजुविमर्शिनी महेश्वरानन्दस्य परमगुरोः कृतिरिति परिज्ञातम्। तस्मिन्नेव प्रसङ्गे गायकवाडशोधसंस्थानसूचीषु कलकत्तासंस्कृतमहाविद्यालयसूचीषु चार्थरत्नावल्यधिगता, मद्रासराजकीयपुस्तकालयसूचीषु च व्याख्याद्वयमपि। विज्ञापितमेतत्सर्वं प्रातःस्मरणीयानां महामहोपाध्यायाद्यनेकविरुदालङ्कृतानामागमिकदर्शनोद्धारगृहीतदीक्षाणां गुरुवर्याणां पण्डितश्रीगोपीनाथकविराजमहोदयानां चरणकमलयोः, तेषामनुज्ञया चास्य सम्पादनं प्रारब्धम्।

योगिनीहृदयस्यानुप्रास्ताविकेऽस्माभिश्चिद्विलाससौभाग्यसुधोदयादिग्रन्थविषये किमप्युक्तम्। ततो विभिन्नाभ्यः संस्थाभ्य एतयोर्मातृकाणां प्रतिलिपिरस्माभिरासादिता। तदवलोकनेन सौभाग्यसुधोदयो योगिनीहृदयदीपिकोद्धृतामृतानन्दकृतसौभाग्यसुभगोदयादभिन्न इति विज्ञातम्। चिद्विलासकृतित्वविषयको विशयस्तावदवस्थित एवासीत्। तदपनोदनाय, तासु तासु संस्थासु संगृहीतानां मातृकाणां परिचयापादनाय, विद्वद्भिः सह तद्विषयकानुसन्धानसंवादाय च यात्रायां प्रवृत्तैरस्माभिर्गायकवाडशोधसंस्थायां वामकेश्वरतन्त्रस्य ज्ञानदीपविमर्शिन्याश्च प्राचीनतमा मातृकाऽधिगता, पुण्यपत्तने स्थितायामितिहाससंशोधनमण्डलसंस्थायां शिवानन्दस्य सौभाग्यहृदयमुपलब्धम्, जयपुरयात्रायां च ब्रह्मपुर्यां निवसतां पण्डितहरिदत्तशर्ममहोदयानां गृहेऽपि चिदानन्दरचितायां स्वच्छन्दपद्धत्यां सौभाग्यहृदयमदृश्यत। वाराणसेयसंस्कृतविश्वविद्यालयाधिकारिणामनुग्रहेण सर्वासां तासां मातृकाणां प्रतिलिपयो मातृका वाऽऽसादिताः, यासां परिचयोऽत्र मातृकाविवरणे प्रदत्तः।

* अर्थरत्नावल्यां स्खलद्गे दीपकाचार्यविरचितं त्रिपुरसुन्दरीदण्डकं स्मर्यते। भगवत्यास्त्रिपुरसुन्दर्या अनुग्रहेण तदासादितमस्माभिः केरलविश्वविद्यालयपुस्तकालयतः प्रेषितायां ज्ञानदीपविमर्शिनीमातृकाप्रतिलिप्याम्। शिवानन्दस्य सुभगोदयः, सुभगोदयवासना, सौभाग्यहृदय-

In Public domain. Digitization Muthulakshmi Research Academy

रहस्यप्रकाशप्रभृतिभिर्भास्कररायग्रन्थैरपि, पाठपूर्तिसंशोधनादिषु बहूपकृतम्। मातृकासु मध्ये मध्ये त्रुटितः पाठो नात्र प्रदर्शितः, द्विरावृत्तिकः पाठोऽपि च नैव संकलितः। अत्र संस्करणे उपयुक्ताः काश्चन मातृका अपूर्णाः सन्ति। यत्रैता अवसितास्तत्र टिप्पणीषु तत्प्रदर्शितम्।

चिद्विलासस्तवे श्लोकानां संनिवेशे छसंज्ञकवाणीविलासमुद्रणालयमुद्रितपुस्तकक्रम एव मुख्यत्वेनादृतः। तं हि क्रमं सरस्वतीभवनपुस्तकालयस्थाः क. ख. ज. संज्ञका मातृकाः, वटोदरस्था घ.संज्ञका मातृका चानुसरन्ति। इयांस्तु विशेषः—योगिनीहृदयदीपिकायां चिद्वल्ल्यां च समुद्धृतौ तंजोरस्थ ङ च. मातृकयोः सप्तमैकादशसंख्याङ्कितौ, गसंज्ञके सव्याख्यकन्नडलिपिमुद्रिते पुस्तके च एकादशदशसंख्याङ्कितौ श्लोकावत्र मूले स्थापितौ तंजोरमातृकाक्रमानुसारम्। तेन मूलस्तवश्चत्वारिंशच्छ्लोकात्मकः संपद्यते। श्लोकयोरनयोरभावेन चतुर्षु पुस्तकेषु ३८ श्लोकाः सन्ति। घमातृकायां द्वात्रिंशत्तमः श्लोकोऽपि नास्ति, तेन तत्र ३७ श्लोका एव विद्यन्ते।

ङ. च. मातृकयोरेकत्रिंशच्छ्लोकपर्यन्तमानुपूर्वी समाना, तदनन्तरं श्लोकषट्केषु यथा संख्याव्युत्क्रमस्तथा चिद्विलासान्ते स्थापितायां सारण्यां द्रष्टव्यः। अपि चात्र ३९ संख्याकः श्लोको नास्ति, तत्स्थानेऽन्य एव श्लोको विद्यते। स चात्र ४१ संख्यायां स्थापितः। तेनात्रापि श्लोकसंख्या चत्वारिंशत्परिमितैव।

ग. पुस्तके तु वर्तते महदन्तरम्। अत्र पञ्चमः श्लोकः षष्ठत्वेन, षष्ठश्च पञ्चमत्वेन स्थापितः। सप्तमः श्लोक एकादशत्वेन, तदनन्तरस्थाश्चाष्टमाद्येकादशसंख्याकाः श्लोकाः सप्तमादिदशसंख्याङ्किता दृश्यन्ते। ततो द्वादशाद्येकोनत्रिंशश्लोकपर्यन्तमानुपूर्वी समाना। इतः परं भूयान् संख्याव्युत्क्रमश्चिद्विलासान्ते स्थापितया सारण्याऽवगन्तव्यः। अत्र ३०, ३३, ३६ संख्याकाः श्लोका न सन्ति। ङ. च. मातृकयोः परिदृश्यमानोऽत्र ४१ संख्याक्रमे मुद्रितः श्लोको ग. पुस्तकेऽपि दृश्यते। इतोऽधिकानि च त्रीणि पद्यानि तत्र विद्यन्ते। तानि चात्र ४२–४४ संख्याक्रमेषु स्थापितानि। तेन गपुस्तके स्तवस्य श्लोकसंख्या ४१ संपद्यते। एतेषु ४२ संख्याकः श्लोकश्चिद्गगनचन्द्रिकाया इति चिद्विलासगपुस्तके तस्य समावेशो न समञ्जस इत्यवगन्तव्यम्।

योगिनीहृदयदीपिकायां (पृ० ९२) समुद्धृतः 'आत्मचक्रमनु' इत्यादिकः श्लोकार्धस्तु कस्यामपि मातृकायां नोपलभ्यते। चिद्विलासस्तवस्यैवायमंशोऽथवा कस्यचनान्यस्य ग्रन्थस्येति यद्यपि प्रमाणाभावान्न किमप्यधुना वक्तुं पार्येत, तथापि प्रकरणानुरोधादत्रैव सर्वान्ते स्थापितः।

भास्कररायेण सेतुबन्धे मतभेदप्रदर्शनाय खण्डनाय वा यत्र यत्र टीकाद्वयवचनान्युट्टङ्कितानि, प्रायस्तानि सर्वाण्येव याथातथ्यविवेचनायात्र टिप्पणीषु संगृहीतानि समालोचितानि च। विषयवैशद्याय सूचितार्थप्रकाशनाय चात्र संक्षिप्ततमानां टिप्पणीनां निवेशनमक्रियत। अत्रोद्धृतानि वचनानि यदि सन्ति स्मृतानि ग्रन्थान्तरेष्वपि, तान्यपि टिप्पणीषु प्रदर्शितानि। 'प्राग्दर्शितम्', 'उत्तरत्र वक्ष्यामः' इत्यादिषु टीकाद्वयनिर्दिष्टेषु स्थलेष्वपि तन्निर्देशिकाष्टिप्पण्यः संनिवेशिताः।

विहाय नित्याषोडशिकार्णवमत्र प्रकाशितानां सर्वेषां ग्रन्थानां संस्करणाय पुस्तकालयेषूपलब्धाः सर्वा मातृका उपयुक्ताः। मद्रासराज्यपुस्तकालयस्था R. ३५८२ संख्याका ऋजुविमर्शिनीमातृका प्रतिलिप्यनर्हेतिकृत्वा सा नात्रोपायुज्यत। टीकाद्वयसम्पादने प्रवृत्तैरस्माभिर्नित्याषोडशिकार्णवमातृकासंग्रहे न तथाऽऽयस्तम्। ग्रन्थस्यास्य टीकान्तरनिरपेक्षप्राचीनतममूलस्वरूपनिर्णयाय तु तदावश्यकम्। तदवशिष्यतेऽधुनापि कर्तव्यतया कस्यापि कृतिनः।

एवमत्र सम्पादितग्रन्थमातृकाणां परिचयं तत्सम्पादनशैलीं च प्रदर्श्याधुना ग्रन्थग्रन्थकारविषयकबहिरङ्गपरीक्षार्थं प्रवर्तामहे।

नित्याषोडशिकार्णवः

"परमकारुणिको भगवान् लोकानुग्रहं चिकीर्षुर्बहुरूपाष्टकं शास्त्रं संक्षिप्य चतुश्शतसंख्यापरिमितैर्ग्रन्थैस्तत्सारमुद्धर्तुकामः" (अर्थ० पृ० ४) इत्यनेन विद्यानन्दवचनेन बहुरूपाष्टकशास्त्रस्य संक्षेपभूतमेतच्छास्त्रमित्यायाति। अस्य च नाम विमलस्वात्मशम्भुपराभिधानेन तेन वामकेश्वरशास्त्रमित्यङ्गीकृतम्—

सम्प्रदायद्वयज्ञेन विमलस्वात्मशम्भुना।
क्रियते टिप्पणं सम्यग् वामकेश्वरशास्त्रगम्॥

इत्यस्मिन्नुपोद्घातपद्ये। वामकेश्वरशास्त्रनाम्नैव प्रायोऽन्यत्यानि पद्यान्युद्ध्रियन्ते तेषु तेषु ग्रन्थेषु। योगिनीहृदयेऽपि वामकेश्वरतन्त्रनाम्ना स्मृतमेतत्। विवरणकारेण जयरथेन नेपालराजकीयपुस्तकालयस्थमातृकाटिप्पणीकारेण च वामकेश्वरीमतनाम्ना स्मर्यते तत्। चतुश्शतसंख्यापरिमितैर्ग्रन्थैर्बहुरूपाष्टकशास्त्रस्य सारोऽत्र संगृहीत इति कृत्वा चतुश्शतीसमाख्याऽप्यस्य पप्रथे। शिवानन्दपरवर्तिनोऽमृतानन्दप्रभृतयः सर्वे आचार्याः प्रायोऽनयैव समाख्यया तद् बोधयन्ति। शिवानन्देन तु नित्याषोडशिकार्णवनाम्ना तत् संबोधितम्, एवं च तस्य विवरणमुपस्थापितम्—

श्रीवामकेश्वरं नाम शास्त्रं तत्र प्रकाशितम्।
शिवेन संविदं देवीं लक्ष्यीकृत्य निजात्मिकाम्॥
मध्ये शास्त्रस्य तस्यास्ति नित्याषोडशिकार्णवः।
सूत्रैश्चतुश्शतैर्युक्तः कश्चिद्भागो रसावहः॥
स च पञ्चपटल्यात्मा कर्मपञ्चकभासकः।
पूजा प्रयोगो मुद्रा च विद्याव्याप्तिर्जपस्तुतिः॥ (पृ० २–३)

विस्तृतं तद्वामकेश्वरशास्त्रं कीदृशं कियत्प्रमाणकं चासीद् यस्य मध्ये हि शिवानन्देन नित्याषोडशिकार्णवस्यावस्थितिः प्रादर्शि, तस्य विषये नास्माभिः किमपि ज्ञायते। वामकेश्वरतन्त्रान्तर्गतनित्याषोडशिकार्णवपदेन पूर्वोत्तरचतुश्शत्यात्मको ग्रन्थोऽभिप्रेतो भास्कररायस्य। नैतन्मतं शिवानन्दसंमतमिति प्रतिपादितमत्रैव भूमिकायां टिप्पणीषु च। शिवानन्देन पञ्चपटल्यात्मा नित्याषोडशिकार्णवो योगिनीहृदयनैरपेक्ष्येण व्याख्यायीति कृत्वा तन्मतेन नित्याषोडशिकार्णवस्योत्तरो भागो योगिनीहृदयमिति न वक्तुं शक्येत।

In Public domain. Digitization: Muthulakshmi Research Academy

"नित्याः षोडश देवेश सूचिता न प्रकाशिताः" (१।२२) इति मूलग्रन्थप्रकरणादेतदव-
यते, यदीश्वरेण ज्ञानयोगक्रियाचर्याप्रतिपादनपराणि चतुष्षष्टितन्त्राण्यन्यान्यपि च शास्त्राणि
ये पूर्वमुपदिष्टानि, येषु कस्मिंश्चिच्छास्त्रे षोडश नित्याः केवलं सूचिताः । यत्र हि षोडश
त्याः सूचितास्तदेव शास्त्रं नित्याषोडशिकार्णवस्य पूर्वो भागोऽभ्युपगन्तुं शक्यते ।

"शृणु देवि प्रवक्ष्यामि नित्याषोडशिकार्णवम्" (१।२४) इति मूलवचनप्रामाण्यात्
वानन्दपरिगृहीतत्वाच्च नित्याषोडशिकार्णव इत्यभिधानमेव परिगृहीतमत्र, सत्स्वपि ग्रन्थ-
ास्य वामकेश्वरीमत-वामकेश्वरतन्त्र-चतुश्शतीप्रभृतिषु नामधेयेषु । "तत्र बाह्या कराभ्यां
धनीया नित्याषोडशिकार्णवसमुद्धृतबीजैः" (पृ० १८८) इत्यत्र भङ्ग्यन्तरेण नामनिर्देशं
र्वता विद्यानन्देन तु नित्याषोडशिकार्णवस्य ग्रन्थान्तरत्वमेव ख्याप्यते, प्रस्तुते ग्रन्थे मुद्रा-
जानामनुद्धारात् । अत्र हेतुरन्वेषणीयः ।

चतुष्षष्टितन्त्राणामत्र परिगणनात्तदुत्तरभावित्वमेवास्य शास्त्रस्याभ्युपगन्तव्यम्। वैष्णवानि,
वानि, बौद्धानि च प्राचीनानि तन्त्राणि यथा समुद्धृतानि प्रकाशितानि च, न तथा प्रयतितं
ाक्तानां प्राचीनानां तन्त्राणां समुद्धारे प्रकाशने च । चतुष्षष्टितन्त्रपरिगणनावसरे सन्ति
दर्शितास्तेषु बहूनां तन्त्राणां मातृकाः, येषां प्राचीनताविषये न कोऽपि संभाव्यते विसंवादः ।
न्त्राणामेतेषां प्रकाशनोत्तरमेव शाक्तानां तन्त्राणां किमप्यभिनवं वैशिष्ट्यं भासेत ।

नित्याषोडशिकार्णवो जयरथेन व्याख्यातः । अभिनवगुप्तेन नित्यातन्त्रविदः स्मृताः ।
यरथेन स्वकीये विवरणे श्रीमानीश्वरशिवो रसमहोदधिग्रन्थस्य प्रवर्तयिता, शास्त्रस्यास्य
श्मीरेष्ववतारकः, शूरमठाधिपतिश्चोक्तः । डॉ० कान्तिचन्द्रपाण्डेयमहोदयेन ईशवीया नवमी
ताब्दी तस्य समयो निश्चितः । रसमहोदधिर्हि नित्याषोडशिकार्णवस्य वार्त्तिकभूतो ग्रन्थः ।
तो नित्याषोडशिकार्णवस्य तत्पूर्ववर्तित्वं सुवचम् । वसुगुप्तस्य शिष्यः कल्लटः, तच्छिष्यश्च
ट्टप्रद्युम्नः । भट्टप्रद्युम्नेन प्रतिपादितः शक्तिपारम्यपक्षः शिवदृष्टौ सोमानन्देन समालोच्यते ।
त्याषोडशिकार्णवे चतुर्थे पटले शक्तिपारम्यपक्षः प्रतिपाद्यते । वसुगुप्तादयो नवमशताब्दीभवा
तिहासिकैरङ्गीकृताः । सौन्दर्यलहर्या आद्यशङ्कराचार्यकृतित्वे विवदन्ते इतिवृत्तविदः, तथापि
र्वोक्तैः प्रमाणैर्नित्याषोडशिकार्णवाविर्भावकालो भगवत आद्यशङ्कराचार्यस्याविर्भावकालश्च
मान एवेति तु साधयितुं सुकरमेव । भगवत्यास्त्रिपुरसुन्दर्या उपासना आद्येन शङ्कराचार्येण
परमगुरुणा गौडपादेन च प्रवर्तितेति श्रूयते । इतिहासदृष्ट्या केषाञ्चन ग्रन्थानां प्राचीनतायां
न्दिग्धायामपि सम्प्रदायस्य प्रवृत्तिकालः स एवासीदिति निश्चयो नैव नाम बाधितो भवेत् ।

कौलिके मते वर्तते कामरूपपीठस्य प्राथम्यम्, श्रीत्रिपुराया अभिव्यक्तिस्थाने श्रीचक्रे
महामध्यस्थानस्थितस्य बिन्दुनिलयस्य ओड्याणपीठस्यैव वैशिष्ट्यं किमपि राजते । अत-

. द्रष्टव्यम्—'अभिनवगुप्त', द्वितीयं संस्करणम्, पृ० ५७८ ।

स्त्रिपुराया उपासना ओड्याणपीठतो विनिर्गतेति मन्तव्यम् । प्रथमं सा ईश्वरशिवादिभिः कश्मीरे-
ष्ववतारिता, ततः शिवानन्दप्रभृतीनां पूर्वगुरुभिः केरलेषु । शङ्करभगवत्पादानां जन्मभूमि-
श्चोलदेश एव । अतोऽत्र त्रिपुरसुन्दर्युपासनाप्रचारो नातिविस्मयकरः । शिवानन्दादयश्चोलदेशीया
एवेति प्रतिपादयिष्यते परस्तात् । एवं च नित्याषोडशिकार्णवाविर्भावस्थलमोड्याणपीठमेव
स्यात् । ततः प्रथमं कश्मीरेषु तदनन्तरं च केरलेषु स प्रावर्तत । साम्प्रतं तु वर्ततेऽस्य ग्रन्थस्य
सार्वदेशिकः प्रचारः प्रसारश्च । आसेतुहिमाचलं परश्शता मातृका अस्य ग्रन्थस्य समुपलभ्यन्ते ।
उपलब्धेषु नित्यातन्त्रेषु प्राचीनतममेतत्तन्त्रमित्युक्तिर्नैव यथार्थतामतिजह्यात् ।

नित्याषोडशिकार्णवस्य चतुश्शतीत्वसमाख्या

"एवमभ्यर्धाष्टोत्तराशीत्यधिकशतसंख्योपेतसूत्रं प्रथमं पटलं विवृत्य सार्धनवाधिकसप्तति-
सूत्रसंमितं द्वितीयं पटलं विवृणुमः" (पृ० १४३), "इदानीमष्टाविंशतिसूत्रसन्दर्भस्य…
तृतीयस्य पटलस्य" (पृ० १७४), "एकसप्ततिसूत्रग्रथिते तुरीये पटले" (पृ० १९०), "त्रयस्त्रिंश-
सूत्रग्रन्थिते पञ्चमे पटले" (पृ० २६१) इत्येतैर्ऋजुविमर्शिनीस्थैर्वचनैरत्र चतुश्शतसंख्याकाः श्लोकाः
सन्तीति शिवानन्दस्य मते चतुश्शतीत्वसमाख्या निर्विवादा । सेतुबन्धे तु—"एवं प्रथमपटलेन
चतुरधिकद्विशतश्लोकेन" (पृ० ९८), "एवमेकाशीतिश्लोकात्मकेन द्वितीयपटलेन" (पृ० १२४),
'एवं सार्धाष्टाविंशत्या श्लोकैर्घटितेन तृतीयपटलेन" (पृ० १३२), "एवं त्रिसप्तत्या श्लोकैश्चतुर्थ-
पटलेन" (पृ० १६२) इत्यादिभिर्वाक्यैरस्याः पञ्चपटल्याः सार्धत्रिंशदधिकचतुश्शतश्लोक-
घटितत्वमङ्गीकृतम् (पृ० १७६) । नित्याषोडशिकार्णवाद् द्वादशश्लोक्या बहिर्भावित्वे भास्कर-
रायाङ्गीकृते (पृ० ८) स्वीकृतेऽपि चतुश्शतश्लोकसंख्यासंपत्तिर्नोपपद्यते, अत एव समाख्याया
एवाल्पन्यूनाधिकभावाविवक्षया गौणत्वेन निर्वाहोऽङ्गीकृतस्तत्र (पृ० १७६) ।

सर्वेष्वेव पटलेषु श्लोकसंख्यायां वैभिन्न्ये जाग्रत्यपि, पञ्चमपटलस्य त्रयस्त्रिंशता श्लोकैरेव
समाप्तौ सत्यामपि च सेतुबन्धकारस्य—"यत्प्राचीनैर्विमर्शिन्यादिटीकाकारैः सर्वैरेककण्ठयेन
मूलस्थपञ्चमपटलस्य चतुस्त्रिंशता श्लोकैरेव समाप्तिं मन्यमानैरुत्तरत्र पठ्यमानान् दशश्लोकान्
पुस्तकेषूपलभ्यमानान् संगतानपेक्षितानपि परित्यजद्भिः किमभिप्रेतमिति त एव प्रष्टव्याः"
(पृ० १७५) इत्युक्तिर्न क्षोदक्षमा प्रतिभाति । नहीमे दशश्लोका विहाय सेतुबन्धं कस्यामपि

१. "महात्रिपुरसुन्दरीसंज्ञां व्याचष्टे परमदेशिको महादेवः" (ऋजु० पृ० ४), "महात्रिपुर-
सुन्दरीं महत्या भक्त्या महादेवः प्रणमति" (अर्थ० पृ० ४-५) इति च वदन्तौ शिवानन्द-
विद्यानन्दौ द्वादशश्लोक्या ग्रन्थान्तर्भूतत्वमेवाङ्गीकुरुतः ।

मयाऽप्येतद्व्रतस्थेन क्रियतेऽद्यापि सुव्रते ।
जपस्त्रिसन्ध्यमेतस्यास्तदेतत्पदसिद्धये ॥

इत्यग्रिमे ग्रन्थे त्रिपुरभैरवीसमुपासनाप्रख्यापनं कुर्वतो देशिकोत्तमस्य ग्रन्थारम्भे तस्या नमन-
मुचितमेव । अतो द्वादशश्लोक्या ग्रन्थान्तर्गतत्वमेवाङ्गीकर्तव्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

टीकायां व्याख्याताः, न चोपलब्धाः सरस्वतीभवनस्थायां कस्यामपि मातृकायाम्, न च १५९३ वैक्रमे वर्षे लिखितायां बडोदास्थगायकवाडशोधसंस्थानस्थायां प्राचीनायां मातृकायाम् । नित्याषोडशिकार्णवो बहिर्यागपरः, योगिनीहृदयं चान्तरयागप्रतिपादकम् । नानयोरेकशास्त्र्य-मिति साधितमस्माभिरन्यत्र चात्र च । एवं चान्तरजपहोमादिप्रतिपादकानामेषां श्लोकानां नात्र काचन संगतिर्न चेमेऽत्रापेक्षिताः । भिन्नयोरेतयोः शास्त्रयोरेकत्वकल्पनमेव सेतुबन्धकारस्य विचारवैभिन्न्योत्पादकम् ।

यद्यपि "तन्त्रराजे···तद्व्याख्यातृभिः पञ्चविंशे पटले यन्त्राणि मन्त्राः सर्वत्रेतिश्लोक-व्याख्यावसरे चक्रनवकवासनामेतामेव कथयित्वा तत्संमत्यर्थं नित्याषोडशिकार्णवे प्रोक्तमिति ग्रन्थेन कालो धामानि भूतानीत्यर्धमेव लिखितम्" (से० पृ० १७५) इत्यनेन तन्त्रराजव्याख्यातुः सुभगानन्दनाथस्य मतेनापि श्लोका इमे नित्याषोडशिकार्णवस्येति सिद्ध्यति, तथापि विमर्शिनी-कारस्य प्राचीनत्वं मनोरमाकारस्य[1] चातिप्राचीनत्वं तदुक्तं (पृ० १७५-१७६) संदिग्धमेव । न ध्यानमित्यादिकोऽत्रत्यः श्लोको विनैव नामनिर्देशमृजुविमर्शिन्यां समुद्धृतः । संयम्येन्द्रियसंचार-मित्यादिकश्च श्लोको दीपिकायामभियुक्तवचनत्वेनोद्धृतो दृश्यते । अनयोः श्लोकयोः सदृश एव

न पूजा बाह्यपुष्पादिद्रव्यैर्या प्रथिताऽनिशम् ।
स्वे महिम्न्यद्वये धाम्नि सा पूजा या परा स्थितिः ॥

इति श्लोकः संकेतपद्धतिस्थस्तत्रावलोक्यते[2] । इमावपि श्लोकौ संकेतपद्धतेरेव स्याताम् ।

---

१. कासुचन मातृकाविवरणसूचीषु मनोरमारचनाकालः १७३० प्रदर्शितः । स च प्रतिलिपिकालः स्यात् । यतो हि 'इण्डिया आफिस पुस्तकालय'-ग्रन्थसूच्यां २५४० संख्याकक्रादिमतमनो-रमामातृकाविवरणे—

आकाशरसतर्केन्दुमितेऽब्दे कार्तिके सिते ।
तन्त्रराजस्य टीकेयं पूर्णायां पूर्णतामगात् ॥

इति तत्रत्यश्लोकं प्रमाणीकृत्य ग्रन्थरचनाकालः संवत् १६६० (ई० १६०३) निर्धारितः । एष श्लोकोऽपि ग्रन्थप्रतिलिपिकर्तुरेवेति संभावयामो वयम् । तथा हि—श्रीनिवासभट्टापर-नामधेयविद्यानन्दनाथेन १६३० वैक्रमे वत्सरे सौभाग्यरत्नाकरो विरचितः (योगिनीहृदय-स्यानुप्रास्ताविके घपृष्ठे टिप्पण्यां प्रमाणवचनानि द्रष्टव्यानि) । एष ग्रन्थस्तेन शिवार्चन-चन्द्रिकायां स्मृतः (ग्रन्थसमाप्तिस्थाः श्लोका द्रष्टव्याः) । तत्र च—"तट्टीकाकृता मनोरमाकारेण" (२४९५९ संख्याका सरस्वतीभवनस्था मातृका, प० २९) इत्येवं मनोरमाकारः स्मृतः । अतश्च सौभाग्यरत्नाकररचनाकालपूर्ववर्तित्वमेव तस्योचितं प्रतिभाति । निश्चितः समयस्तु मनोरमाकारस्य नावबुध्यते साम्प्रतम् ।

२. संकेतपद्धत्यादिषु दृष्टा अन्येऽपि श्लोकाः सेतुबन्धकारेण मूले स्थापिताः । तद्यथा—अर्थरत्नावल्यां (पृ० १०७) संकेतपद्धतिनाम्नोद्धृतः "त्रिपुरा त्रिपुरेशी च" इत्यादिकः श्लोकः सेतुबन्धे (पृ० ८२–८३) मूले स्थापितः । एवमन्यत्रापि ।

स्वसंविदित्यादिकः श्लोकार्धो दीपिकायां स्थलद्वये (पृ० २५०, ३०९) प्रामाणिकवचनत्वे-नाभियुक्तवचनत्वेन चोद्धृतः । शब्दस्पर्शादय इति श्लोकार्धश्च विनैव नामनिर्देशं तत्र दृश्यते, यदा ह्यमृतानन्देन चतुश्शतीश्लोकान् समुद्धरता सर्वत्र तन्नामनिर्देशोऽकारि । एतेन संभाव्यते गच्छता कालेन संकेतपद्धतिप्रभृतीनां ग्रन्थानां विरले प्रचारे तत्रत्याः श्लोका मनोरमा[1]-कारादीनां समये मूले प्रक्षिप्ता इति तस्य नातिप्राचीनत्वम्, किन्तु शिवानन्दाद्यपेक्षयाऽर्वा-चीनत्वमेवेति ।

"सार्धत्रिशदधिकचतुश्शतश्लोकघटिताया अस्याः पञ्चपटल्याश्चतुश्शतीति समाख्या-समर्थनार्थं प्रथमचक्रोद्धारान्ते सार्धत्रयाणां द्वितीयचक्रोद्धाररूपाणां सप्तदशानामत्रत्यानां दशानां च श्लोकानां त्यागः" (पृ० १७६) इत्येष आक्षेपोऽपि सेतुबन्धकारस्य न ऋजु-विमर्शिन्यां घटते, तत्र द्वितीयचक्रोद्धाररूपाणां सप्तदशश्लोकानामुपलब्धेः । न चापतत्यर्थ-रत्नावल्यादिषु, तैश्चतुश्शतीत्वसमाख्याया एवानङ्गीकारात् । वस्तुतस्तु चतुश्शतीसमाख्या-समर्थनार्थमेव शिवानन्देन द्वितीयचक्रोद्धाररूपाः सप्तदशश्लोका मूले संनिवेशिताः । ऋजु-विमर्शिनीं सेतुबन्धं च विहाय न दृश्यन्त इमे श्लोकाः क्वापि मूले । वामकेश्वरीमतविवरणे (पृ० ३२) तु रसमहोदधिस्था इमे श्लोका इति स्पष्टमेवोक्तम् । एवं च ग्रन्थस्यास्य चतुश्शतीति समाख्या न प्राचीना, यद्यप्यमृतानन्दादिभिः शिवानन्दपरवर्तिभिस्तदङ्गीकृता ।

नित्याषोडशिकार्णवयोगिनीहृदययोर्भिन्नशास्त्रत्वम्

एतच्चास्माभिर्योगिनीहृदयस्यानुप्रास्ताविके साधितम् । अत्र तु किमपि नूतनमुच्यते । गणेशग्रहनक्षत्रेत्यादिकेऽत्रत्ये प्रथमसूत्रे स्थितानि गणेशग्रहनक्षत्रराशिपदानि शिवानन्दविद्या-नन्दाभ्यां प्रपञ्चसारमनुसृत्य व्याख्यातानि, न तु योगिनीहृदयम् । वामकेश्वरतन्त्रे कादिविद्या-समुद्धारः, योगिनीहृदये तु मन्त्रसङ्केते सम्प्रदायार्थप्रकरणे हादिविद्या समुद्धृता । अत्र करशुद्धि-करीत्यादिका मूलविद्यया सहाष्टौ विद्या एव दृश्यन्ते, योगिनीहृदये तु सप्तमीं मूर्तिविद्यामङ्गीकृत्य विद्यानां नवकं परिदृश्यते । प्रथमे स्वयम्भ्वादीनि त्रीणि लिङ्गानि, उत्तरषट्केऽप्येवमेव दृश्यते; द्वितीये तु परलिङ्गस्यापि समावेशाच्चत्वारि लिङ्गानि । एवं च—"पूर्वोत्तरचतुश्शत्योरेक-वाक्यता त्वविवादा, पूर्वोत्तरसमाख्याबलात् । पूर्वतन्त्रे कथितानां करशुद्ध्यादिन्यासानामुत्तर-

---

१. सौन्दर्यलहरीटीकायां लक्ष्मीधरायां (पृ० १८८–१८९) "पाशाङ्कुशौ" इति, "करणेन्द्रिय" इति च श्लोकौ वामकेश्वरतन्त्रे आत्मपूजायां वर्तेते इत्युक्तम् । तेन तत्समयेऽपि श्लोका इमेऽत्रत्या एव परिज्ञाता आसन्निति निश्चीयते । म० म० हरप्रसादशास्त्रिसंदृब्धायां सूच्यां (भा० १, पृ० ७१) विवृते १३५४ ई० वर्षे लिखिते वामकेश्वरीमतटिप्पणे तु "कालमृत्युयमादिभिर्न बाध्यते" इति समाप्तिवाक्यदर्शनादधिका इमे श्लोकास्तत्र नासन्निति । लक्ष्मीधरायां (पृ० १६३) कामकलाविलासश्लोका उद्धृताः । तत्कर्ता पुण्यानन्दश्च शिवानन्दपराग्भव इति साधितमन्यत्र । अतोऽपि शिवानन्दादीनां प्राचीनत्वमवगम्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

त्रेऽकथनेन तत्रोद्धृताया मूर्तिविद्यायाः पूर्वतन्त्रेऽनुद्धारादिना च ज्ञापकेन परस्परसाकाङ्क्ष-ान्च" (पृ० ७) इति सेतुवन्वकारस्योक्तिर्न क्षोदक्षमा, पूर्वोक्तोदाहरणैस्तत्रैकवाक्यतायाा दर्शनात्, पूर्वोत्तरसमाख्यायाः सेतुवन्धकारेणान्यैर्वा कैश्चित् तदानीन्तनैर्ग्रन्थकारैः कल्पितत्वा-ृतानन्दनटनानन्दादीनां ग्रन्थेषु तददर्शनाच्च । योगिनीहृदयस्य वामकेश्वरतन्त्राज्ञातार्थप्रकाश-ात्तत्साकाङ्क्षत्वं स्यान्नाम, वामकेश्वरस्य तु न योगिनीहृदयाकाङ्क्षा, तत्र मूर्तिविद्यायाः ंथाऽनुपलम्भात् । एवं चानयोर्भिन्नत्वमेवाङ्गीकर्तव्यम् । भिन्नयोरेतयोः शास्त्रयोरभिन्नत्व-रोप्य सेतुवन्धकारः शिवानन्दविद्यानन्दामृतानन्दादिषु तत्र तत्र दोषानुद्भावयति । तत्परि-रश्च वाहुल्येनानयोर्भिन्नशास्त्रत्वेऽङ्गीकृतेऽनायासेन भवतीति स्वयमेव विचिन्वन्तु विपश्चिद्वर्याः । स्माभिश्च तत्र तत्र टिप्पण्यादिष्वत्र च तत्प्रदर्शितमेव ।

नित्याषोडशिकार्णवस्यैव पञ्चषष्टितमतन्त्रत्वम्

तच्च सेतुबन्धकारेणैवं प्रदर्शितम्—

"सुन्दरीतन्त्रेष्वपि यानि कुलार्णवज्ञानार्णवस्वच्छन्दपरानन्दभैरवीदक्षिणामूर्तिप्रभृतीनि तेषु प्रायेण बहिर्यागस्यैव प्रपञ्चो भूयान्, आन्तरस्य त्वल्पः । वामकेश्वरतन्त्रे तु तद्वैपरीत्यमेवेति सर्वतन्त्रोत्तमत्वादान्तरोपास्तिशीलस्यैवोपासकमूर्धन्यस्यात्राधिकारः । तदेतदुक्तं श्रीमदाचार्यभगवत्पादैः—

चतुष्षष्ट्या तन्त्रैः सकलमभिसंधाय भुवनं
स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रैः पशुपतिः ।
पुनस्त्वन्निर्बन्धादखिलपुरुषार्थैकघटना-
स्वतन्त्रं ते तन्त्रं क्षितितलमवातीतरदिदम् ॥ (सौ० ३१) इति ।

शिवानन्देन गुरुपङ्क्तिसमाराधनस्थानं निर्णीतं प्रपञ्चसारप्रामाण्येन (पृ० २२५), यद्यपि दृश्यते योगिनीहृदयेऽपि तत्स्थाननिर्णयः । भास्कररायं विहाय सर्वैरेव टीकाकारैः पञ्च-पटलात्मको ग्रन्थ एव व्याख्यातः, अत एव योगिनीहृदयदीपिकारम्भेऽमृतानन्दः 'अनन्यो-द्घाटितम्', 'नेदं व्याकृतं पुरा' (पृ० २) इति वदति । किमेतेनैतत्संभावयितुं शक्यते यदेतेषां प्राचीनानां टीकाकाराणां समये योगिनीहृदयं नासीदिति । वामकेश्वरीमतविवरण-संपादकेन केषाञ्चन श्लोकानां स्थलनिर्देशे योगिनीहृदयमङ्कितम् । वस्तुतस्तु न सन्ति तत्रत्या इमे श्लोकाः, उद्धरणानामेकांशस्यैव तत्रोपलब्धेः । योगिनीहृदये (२।७७) महाज्ञानार्णवः स्मर्यते । तस्मिंस्तदनुसारिण्यन्यस्मिन् वा ग्रन्थे एते श्लोकाः स्युः । विद्यायाः षडर्थप्रतिपादनं ग्रन्थविस्तराधानमात्रफलमिति वदन् जयरथस्तन्न प्रमाणयति (पृ० १३६–१३७) । नित्याषोडशिकार्णवयोगिनीहृदययोरैक्येऽङ्गीकृते तत्कथं संभाव्येत । एवं सति डॉ० प्रबोधचन्द्रबागचीमहोदयेन 'स्टडीज इन दी तन्त्राज' इत्याख्ये ग्रन्थे ब्रह्मयामलविवरणावसरे (पृ० १०५) विद्यापीठतन्त्रेषु परिगणितं योगिनीहृदयमितो भिन्नमेव स्यात् ।

चतुष्षष्टितन्त्राणि नामनिर्देशेनानूद्य पुनर्देवीकृतप्रश्नस्यास्मिन्नेव तन्त्रे दर्शना-ल्लिङ्गादिदमेव तन्त्रमस्मिन् श्लोके पञ्चषष्टितमत्वेनाभिप्रेतमित्युन्नीयते । ज्ञानार्णवपरं स्वतन्त्रपदमिति तु गौरीकान्तः । अन्ये तु—तन्त्रराजतन्त्रमेव पञ्चषष्टितमम्, स्वतन्त्र-विशेषणस्येहोक्तस्य तत्रैव दर्शनाल्लिङ्गात् । तथा च स्मर्यते—

तेषामन्योन्यसापेक्ष्याज्जायते मतिविभ्रमः ।
तस्मात्तु निरपेक्षं मे तन्त्रं तासां वद प्रभो ॥ (त० १।३)

इतीत्याहुः । वस्तुतस्तु मोक्षस्य बहिरङ्गसाधने बहिर्यागे तस्य तन्त्रान्तरोक्त-कर्मानपेक्षत्वेऽप्यन्तरङ्गसाधनेऽन्तर्यागेऽस्यैव नैरपेक्ष्यम् । तन्त्रान्तरेष्वेतावतोऽन्तर्याग-प्रपञ्चस्याभावादेव । प्रत्युत तन्त्रराजस्याप्येतत्सापेक्षतैव दृश्यते । यदुक्तं तत्रैव—"नित्या-हृदयसंप्रोक्तस्फुटोपायेन भावयेत्" (३६।१३) इति । नित्याहृदयमित्येतत्तन्त्रोत्तरार्धस्य योगिनीहृदयस्य संज्ञा" (पृ० ५-६) इति ।

तदेतन्मतं प्रमाणान्तरैः स्थूणानिखननन्यायेन सुदृढीक्रियते । "शिवः शक्त्या युक्तः" (श्लो० १), "हरिस्त्वामाराध्य" (श्लो० ५) इत्यादीनां सौन्दर्यलहरीस्थानां श्लोकाना-मवलोकनेन स्पष्टं विज्ञायते यदेषां निर्माणवेलायां नित्याषोडशिकार्णवस्थाः "परो हि शक्ति-रहितः" (४।६), "एतामेव पुराराध्य" (४।६७) इत्यादयः श्लोका मनस्युपारूढा आसन्निति । अत्रैव चतुष्षष्टितन्त्राणि परिगणितानि, अतः "इदमेव तन्त्रमस्मिन् श्लोके पञ्च-षष्टितमत्वेनाभिप्रेतम्" इति सेतुवन्धकारस्योन्नयनं युक्तिमदेव । "स्वतन्त्रमन्यनिरपेक्षं ज्ञानार्ण-वादिरूपं कादिमतेतिप्रसिद्धं स्वतन्त्राख्यतन्त्रं वा" इति सौन्दर्यलहरीव्याख्यायां गौरीकान्त-भट्टाचार्य आह । "स्वतन्त्रं तन्त्रं कादिमताख्यम्" इति सौभाग्यवर्धनीकारः । अन्ये त्वित्या-दिनोद्धृतं मतं कस्येति साम्प्रतं न ज्ञायते । इदमत्रावधेयम्—"अखिलपुरुषार्थैकघटनास्वतन्त्रं ते तन्त्रम्" इत्यत्र ते तव त्रिपुरसुन्दर्यास्तन्त्रमखिलपुरुषार्थैकघटनासु स्वतन्त्रमित्येवान्वय उचितः प्रतिभाति । विशेषणमुखेनैवात्र स्वतन्त्रपदं प्रवर्तते, न विशेष्यमुखेन । एवं च ज्ञानार्ण-वादिरूपमिति वदन् गौरीकान्तः सर्वाणि त्रैपुरतन्त्राण्यत्र संगृह्णाति । त्रैपुरतन्त्रेषु च वामकेश्वर-तन्त्रं प्राचीनतमम् । अत्रत्या द्वादशश्लोकी कादिमते (२।८८–९९) समुद्धृता । कादिमते (१।२) दृश्यते यदितः पूर्वं नित्यानां नव तन्त्राण्यासन्निति । किञ्च, योगिनीहृदयापरपर्यायं नित्याहृदयं कादिमते स्मर्यते, योगिनीहृदये च वामकेश्वरतन्त्रमिति कादिमतापेक्षया पूर्वं क्षितितलं वामकेश्वरतन्त्रमेवावातीतरदिति निश्चप्रचमङ्गीकर्तव्यम् । एवं च 'इदम्' इति पदेन वामकेश्वरतन्त्रमेव सौन्दर्यलहरीकारस्याभिप्रेतमिति सेतुबन्धकारोक्तिरेवात्र ज्यायसी ।

नित्याषोडशिकार्णवस्य व्याख्यानानि

वामकेश्वरीमतमिति नित्याषोडशिकार्णवस्यैव नामान्तरम् । अत्र जयरथकृतं विवरणं कश्मीरसंस्कृतग्रन्थमालायां मुद्रितमुपलभ्यते । भास्कररायविरचितं सेतुवन्धव्याख्यानमानन्दा-श्रमग्रन्थमालायां प्रकाशितं सुप्रसिद्धमेव । ऋजुविमर्शिनी चार्थरत्नावली नेमे अधुना

In Public domain. Digitization Muthulakshmi Research Academy

श्यते । एवमेतद्व्याख्यानचतुष्टयमस्य ग्रन्थस्य साम्प्रतं मुद्रितमुपलभ्यते । म० म० हरप्रसाद-
त्रसंदब्धायां नेपालग्रन्थसूच्यां १३५४ ई० लिखिता वामकेश्वरीमतटिप्पणमातृका कर्तृनाम-
ता दृश्यते । आफ्रेख्टबृहत्सूच्यां (पृ० ५६३) वाराणसीवास्तव्यमुकुन्दलालकृतं व्याख्यानं
नन्दकृतं च व्याख्यानं न्यदर्शि । तत्रैव निर्दिष्टं वामकेश्वरतन्त्रदर्पणं विद्यानन्दकृतमर्थरत्नावली-
ख्यं व्याख्यानमेव । "पूर्वाचार्या अप्याहुः—आश्रीदीपकनाथतो ह्यगणितैरद्यापि वृत्तिः कृता"
० ११५) इत्यादिजयरथोद्धृतपूर्वाचार्यवचनप्रामाण्यतः श्रीदीपकनाथोऽस्य ग्रन्थस्य प्रथमो
ाकार इति ज्ञायते । सेतुबन्धे (४।९) दीपकाचार्य उद्ध्रियते । त्रिपुरसुन्दरीदण्डकं स्तुति-
म् । वृत्तिरेषा ततो भिन्नैव स्यात् । तस्याश्च नोपलब्धः कोऽप्युल्लेखः साम्प्रतमस्माभिः
ापि । ईश्वरशिवो विश्वावर्तश्चेत्याचार्यद्वयं त्रैपुरसम्प्रदायस्य कश्मीरेष्ववतारकमिति
ारथ (पृ० ४८) आह । तत्रेश्वरशिवो रसमहोदधिश्लोकानां साक्षात् प्रवर्तयिता । रसमहो-
श्च वामकेश्वरीमतव्याख्यानपरः कारिकामयो ग्रन्थः प्रतीयते । अस्य विस्तृतान्युद्धरणानि
ारथविवरणे द्रष्टव्यानि । जयरथविवरणे (पृ० ९, १२, ३०) वार्त्तिककारस्यानेकानि
ानानि दृश्यन्ते । एष वार्त्तिककारो विश्वावर्तोऽन्यो वेति प्रमाणाभावान्न वक्तुं शक्यते । "एतान्
ुरुलब्धान् विश्वावर्तः प्रवर्तितवान्" (पृ० ३६) इति, "ततश्च विश्वावर्तमुखेनैव लक्ष्यते
तदेवेदमस्मत्पर्यन्तं शिष्यप्रशिष्यक्रमेण सर्वेषामपि प्राप्तम्" (पृ० ४८) इति च वदन्
ारथस्तस्य महत्त्वं ख्यापयति । शङ्करराशिर्वामकेश्वरीमतस्य व्याख्यातेति जयरथधृतवचनाभ्यां
० ४८, ५४) प्रतीयते । एवमेव अल्लटोऽपि वामकेश्वरीमतव्याख्याता । अस्य व्याख्यानं
ारथेन पदे पदे साक्रोशं खण्डितम् । कल्याणवर्मणाऽपि वामकेश्वरीमतं व्याख्यातमिति तत
० १३७) एव ज्ञायते । कादिमते (२।८८–९९) द्वादशश्लोकीव्याख्यानावसरे सुभगा-
ः कौश्मीरव्याख्यानं स्मरति । कश्मीरेष्वन्यत्र च बहूनि व्याख्यानान्यस्य ग्रन्थस्य विरचिता-
ति—"महाविभूतिसमुदयस्थाने नित्याषोडशिकार्णवे यत्पूर्वैर्व्याकर्तृभिर्व्याकारि, यच्चास्माभिः
श्चिद् व्याक्रियते, तत्रान्तरं त्यक्तावलेपमात्सर्याः स्वयमेव विपश्चितो विचिन्वन्तु" (पृ० १२)
त शिवानन्दवचनेन, "उभे च चतुःशती यद्यपि प्राचीनैर्बहुभिर्व्याख्याते एव, परन्तु ताष्टीका

"त्रिपुरादर्शनस्यापरिचिता आचार्याः कृतयश्च" (सा० सु०, व० २०, अ० २, पृ० २४) इत्यत्र द्रष्टव्यं दीपकनाथविषये ।

आचार्याणामेषां परिचयो डॉ० कान्तिचन्द्रपाण्डेयविरचिते 'अभिनवगुप्त' इत्याख्ये ग्रन्थे (पृ० ५७८–५८३), उपर्युक्ते निबन्धे च (पृ० २०–२१) द्रष्टव्यः ।

उपर्युक्ते निबन्ध एव (पृ० १७, टि० २–३) द्रष्टव्यम् ।

द्रष्टव्यम्—वामकेश्वरीमतविवरणम्, पृ. ५४

ग्रन्थस्याष्टमपृष्ठस्य द्वितीया टिप्पणी द्रष्टव्या ।

उत्तरचतुश्शती केवलममृतानन्देनैव व्याख्याता, नान्येन केनचन प्राचीनेन व्याख्याकारेण ।

भास्कररायपरवर्तिनः काशीनाथस्यैवात्र तृतीयं व्याख्यानमुपलभ्यते ।

अस्थाने विस्तृताः, स्थाने संकुचिताः, क्वचिन्न्यायविरुद्धाः, क्वचित् सम्प्रदायविरुद्धाः, क्वचिन्मूलस्वरसविरुद्धाः, क्वचित् त्यक्तमूलश्लोकाः, क्वचित् तन्त्रान्तरविरुद्धाः, क्वचित् पक्षपातकलुषिता इति तत्तदंशान् परिहृत्यातीव निष्कृष्येतरांशेषु तत्प्रदर्शितदिशैव संक्षिप्य व्याख्यातुमयमुद्योगः" (पृ० ७) इति भास्कररायवचनेन च ज्ञायते । भास्कररायोऽत्र स्वव्याख्यानस्य वैशिष्ट्यं प्रतिपादयन् पूर्वव्याख्यानानि कटाक्षयति । अत्र च यद्वक्तव्यं तदुच्यत एव तत्र तत्र प्रसङ्गानुसारम् ।

उपलब्धव्याख्यानानां प्रत्येकं वैशिष्ट्यम्

उपलब्धेषु चतुर्षु व्याख्यानेषु जयरथकृतं विवरणमेव प्राचीनं प्रतीयते । अत्र ईश्वरशिव-विश्वावर्त-शङ्करराशिप्रभृतय आचार्या अस्य शास्त्रस्य कश्मीरेष्ववतारका इत्युक्तम् । तदनुयायिनां केषाञ्चन व्याख्याकाराणां मतानि दूषयन् जयरथ ईश्वरप्रत्यभिज्ञातन्त्रालोकादिप्रामाण्येन स्वकीयं विवरणमतिशाययति । अत्र समालोचितानि कानिचन मतानि बीजोद्धारादीनि चार्थरत्नावलीकारेण प्रमाणीकृतानि । अतः सेतुबन्धवज्जयरथविवरणस्यापि प्राचीनव्याख्यानानां युक्तायुक्तत्वविषयका विचाराः सावहितं परीक्षणमपेक्षन्ते । तन्त्रालोकविवेककार एव विवरणकारः कथ्यते तत्संपादकैः । विवेककारस्य प्रौढिमा प्रतिभा च नात्र प्रस्फुरति तादृशी । अत्र मूलविद्यासमुद्धारावसरे कादिविद्या समुद्धृता ।

अर्थरत्नावल्या[1] मद्रासभिन्नमातृकासु (पृ० २१४) ऋजुविमर्शिनी स्मर्यते, किन्तु तत्रत्यः श्लोकः प्रस्तुतायामृजुविमर्शिन्यां नोपलभ्यते । अन्या काचन ऋजुविमर्शिन्यत्र स्मृता भवेत् । ऋजुविमर्शिनी-अर्थरत्नावलीकारौ समसामयिकौ स्याताम् । तथापि दार्शनिकदृष्ट्या वर्तते कोऽपि विशेष ऋजुविमर्शिन्याम् । क्षेमराजकृतायाः शिवसूत्रविमर्शिन्याः स्पन्दनिर्णयस्य च व्याख्यानपद्धतिः, प्रतिपादनचातुरी, भाषा, प्रमाणवचनावली चात्रानुकृता शिवानन्देनेति तत्र तत्र ग्रन्थस्थासु टिप्पणीषु स्पष्टम् । नित्याषोडशिकार्णव-उत्तरषट्कप्रदर्शितत्रिपुरापदनिर्वचनलभ्यत्रितत्त्वधामलिङ्गबीजशक्तिवादोऽत्र सम्यग् व्याख्यायत एव, सहैवात्र संकेतपद्धत्यनुसारी तत्त्व-धाम-बीज-शक्तिचतुष्टयवादोऽपि दृश्यते । तत्प्रसङ्गेनानाख्यातत्त्वमत्र व्याख्यातम् । व्याख्यानमेतत् प्राधान्येन ग्रन्थस्य प्रत्यभिज्ञादर्शनानुसारिणीं व्याख्यामुपस्थापयति । तत्र तान्येव प्रमाणवचनानि प्राधान्येन समुपस्थाप्यन्ते, यानि क्षेमराजेन प्रमाणीकृतानि । तन्त्रालोकोऽत्र त्रिशिकाशासन-षडध्वसारशास्त्रप्रभृतिनामभिर्नेकशः स्मर्यते । गणेशेत्यादिप्रथमसूत्रव्याख्यानावसरे गुरुपङ्क्तिसमाराधनस्थलादिनिर्णये चात्र न योगिनीहृदयं स्मर्यते, अपि तु प्रपञ्चसारः सर्वत्र प्रमाणीक्रियते । अत्र हि नागभट्टविरचितत्रिपुरासारसमुच्चयो वारत्रयं स्मृतः, शिवस्तोत्रावली स्पन्दकारिका च रहस्यगुरुप्रवरकृतित्वेन निर्दिष्टा, मन्त्रमातृकापीठमुद्रादीनि च महासंविदात्मकतया व्याख्यातानि । मूलविद्यासमुद्धारप्रकरणेऽत्र हादिविद्या प्रतिपादिता, हादिविद्यापरम्परा

---

१. अर्थरत्नावल्यां (पृ० २५३) मद्रासमातृकासु केचित्पदेन ऋजुविमर्शिनी स्मृता स्यात् ।

In Public domain. Digitization Muthulakshmi Research Academy

दिव्य-सिद्ध-मानवौघत्रयवती समदर्शि । ऋजुविमर्शिनी कौलिकीं प्रक्रियां सूचयत्येव, प्रायः
सर्वाण्येव मूलपदानि प्रत्यभिज्ञादर्शनपद्धत्या तान्त्रिकान्तर्यागपद्धत्या वाऽध्यात्मपरत्वेन
नयति । प्रसन्नगम्भीरा, सरलविशदा, पारम्परिकपदार्थोन्मीलिनी, प्रमाणवचनावलीविरा-
ताऽपि संक्षिप्तपदेयं विमलाशया ऋजुविमर्शिनी मन्ये बलादिव विदुषां मनांस्यावर्जयेन्नूनम् ।

अर्थरत्नावली प्राधान्येन कौलिकं मतमनुव्याख्याति स्पष्टतया । उत्तरषट्कशास्त्रं सिद्ध-
पादः संकेतपद्धतिश्चास्या व्याख्यायाः प्रधानमवलम्बनम् । मतशास्त्रं मतोत्तरं चात्रोद्ध्रियते ।
यं हादिविद्यामेव यद्यपि बहु मानयति, तथाप्यत्र तत्र तत्र प्रकरणेषु कादिविद्यानुसारिणीं
ख्यामुपस्थाप्यैवानन्तरं हादिविद्या व्याख्यायते । ऋजुविमर्शिनी-सेतुबन्धादिषु व्याख्यातश्चक्रो-
रस्य द्वितीयः प्रकारो नात्र दृश्यते । सेतुबन्धकार ऋजुविमर्शिनीं तत्र तत्र प्रमाणयत्यपि,
रत्नावली तु तेन सर्वथैवाप्रमाणीकृता । नित्याषोडशिकार्णवे त्रिसंख्याकं कौलिकमते चतुः-
याकं क्रममते च पञ्चसंख्याकं पदार्थजातं प्रतिपाद्यते । अर्थरत्नावल्यां पीठपञ्चक-वामादिपञ्चक-
छादिपञ्चक-अकारपञ्चक-इकारपञ्चकादीनां हतानाहतोत्तीर्णानां नादानामनिकेत-रसत्रितयादि-
नां च संकेतपद्धतिप्रामाण्येन विवरणं दृश्यते । तेन संकेतपद्धतेरस्याश्च टीकायाः क्रमदर्शना-
तित्वमपि संकेत्यते । पदानामेतेषामत्रत्यं विवरणं चिद्गगनचन्द्रिका-वातूलनाथसूत्रवृत्ति-
नयप्रकाश-महार्थमञ्जरीपरिमलसमुपलब्धं स्वरूपं सर्वथा समर्थयतीति तत्रैव द्रष्टव्यं जिज्ञा-
भिः । नात्र विस्तरभयात् प्रपञ्च्यते । तेनास्या व्याख्यायाः कुलमतक्रमदर्शनानुगतत्वं साम्प्र-
यिकपदार्थानुवर्तित्वं च सम्यक् ख्याप्यते ।

सेतुबन्धः कादिविद्याप्रतिपादकं व्याख्यानम् । ऋजुविमर्शिनी अर्थरत्नावली चात्र
शः समालोच्यते, न केवलं हादिकादिसम्प्रदायभेददृष्ट्यैव, किन्तु विविधपदव्याख्यान-
ङ्गादिष्वपि । उत्तरषट्क-प्रपञ्चसार-संकेतपद्धतिप्रभृतिप्राचीनग्रन्थप्रामाण्यमनुसरत् प्रवृत्तमुक्तं
ख्यानद्वयं सेतुबन्धे योगिनीहृदय-कादिमत-ज्ञानार्णवादिप्रामाण्येन पराक्रियते । एतादृशेषु
पभेदेन वैकल्पिकव्यवस्थाकल्पनमुचितम्, न तु प्रमाणपरिगृहीतस्यार्थस्य सम्प्रदायान्तर-
मतस्य सर्वथा खण्डनम् । सेतुबन्धस्य व्याख्याद्वयसमालोचकानि प्रायः सर्वाणि स्थलानि
थभागे टिप्पणीषु स्थापितानि । तदवलोकनेन ज्ञायते यद् व्याख्यानद्वयातिरिक्तमन्यदपि
ख्यानं तेन समालोच्यते । द्वादशश्लोकीव्याख्यानप्रसङ्गे कादिमतमनोरमोद्धृतं काश्मीर-
ख्यानं सेतुबन्धे स्मर्यते । तदेवात्र समालोचितमन्यद्वेति कथं ज्ञायेत । अपि च, उद्धृताना-
ां व्याख्यानद्वयांशानामवलोकनेनेदमपि स्पष्टीभवति यदत्र क्वचन टीकांशानां भावार्थाः,
चिच्चान्यथाकृत्वाऽपि ते समुद्धृता इति । परवर्तिषु तान्त्रिकदर्शनाचार्येषु वर्तते किमपि
ष्टृथं भास्कररायस्य सौभाग्यभास्कर-सेतुबन्ध-वरिवस्यारहस्यादिप्रणेतुः । सेतुबन्ध-

---

पञ्चमे पटले स्वयम्भ्वादिलिङ्गत्रयव्याख्यानावसरे विद्यानन्देनोत्तरषट्कमेव प्रमाणीकृतम्, न तु लिङ्गचतुष्टयबोधकं योगिनीहृदयम् । अत्र विद्यानन्दभास्करराययोर्मतभेदः प्रमाणभेदप्रयुक्त एव ।

व्याख्यानेन टीकाद्वयव्याख्याता अस्पष्टांशाः सुबोधा जायन्ते, मानवस्वभावसुलभास्त्रुटयः परिमार्ज्यन्ते, यत्र क्वचनाभिनवश्चार्थो युक्त्यनुसारी प्रतिपाद्यते । भास्कररायव्याख्यातं तान्त्रिकं दर्शनं दर्शनान्तरानुप्राणितं समवलोक्यते । दृश्यते च सुन्दरीतापिनीप्रभृतीनामुपनिषदां परानन्द-दक्षिणामूर्तिसंहिता-क्रमसंहिताप्रभृतीनां तन्त्रग्रन्थानां पुराणादीनां चात्र प्रमाणतया समुल्लेखः ।

ऋजुविमर्शिनीकारः शिवानन्दः

महार्थमञ्जरीकारेण महेश्वरानन्देन स्वकीये परिमले पञ्चसु स्थलेषु (पृ० ११२, १२३, १२९, १७८, १९३) ऋजुविमर्शिनी परमगुरुकृतित्वेन स्मर्यते । तत्रत्यानि चत्वारि वचनान्यत्र प्रकाशितायामृजुविमर्शिन्यां (पृ० १३३, ९, ३३, ११३-११४) क्रमशो दृश्यन्ते । १२३ तमे पृष्ठे तत्रत्यं किमपि वचनं नोद्धृतम्, किन्तु "स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा" इति श्लोकार्धमुद्धृत्य "एतच्चास्मत्परमगुरुकर्तृके श्रीमदृजुविमर्शिन्यादौ विमर्शनीयम्" इत्यभाणि । श्लोकार्धं एष तन्त्रराज(कादिमत)तन्त्रे (३५।१३) समवलोक्यते । व्याख्यायते च ऋजुविमर्शिन्याम्—"देशकालाकारैरनियन्त्रितस्वभावत्वान्महत्त्वोपेता नित्यावस्थितसमस्तधर्मपूरणी चिदानन्दघनस्वात्मपरमार्था स्पृहणीयतया हृदयहारिणी संवित्" (पृ० ४७) इत्यादिना तत्र तत्र महात्रिपुरसुन्दर्यभिधाना ललिता । एवमेव सुभगोदयः, सुभगोदयवासनाभिधा क्रमवासना, सौभाग्यहृदयस्तोत्रं च तत्र परमगुरुकृतित्वेन स्मृतम् । अत्रत्यान्यपि सर्वाणि वचनानि परिशिष्टांशे प्रकाशितेषु ग्रन्थेषु द्रष्टुं शक्यन्ते । तेन ऋजुविमर्शिनीकारः शिवानन्दो महेश्वरानन्दस्य परमगुरुरिति परिज्ञायते ।

महार्थमञ्जरीपरिमल एव (पृ० १९७) "अथ सा कालयोगेन शिवानन्दस्य धीमतः" इत्युक्त्वा—

अथ कालक्रमवशाच्चोलदेशशिरोमणिः ।
महाप्रकाशो नामासीद् दैशिको दृक्क्रियोत्तरः ॥
तस्य शिष्योऽभवद् धीमान् गोरक्षो नाम वश्यवाक् ।
महेश्वरानन्द इति प्राप्तपूज्याह्वयो महान् ॥

---

१. महार्थमञ्जरीकारो गोरक्षापरनामधेयो महेश्वरानन्द एष नवनाथेष्वन्यतमाद् गोरक्षनाथादभिन्न इति केचन संगिरन्ते, तन्न; गोरक्षनाथेन सिद्धसिद्धान्तपद्धतौ—"उक्तं च शिवानन्दाचार्यैः—सर्वशक्तिप्रसरसंकोचाभ्यां जगत्सृष्टिः संहृतिश्च भवत्येव न सन्देहः । तस्मात् तां मूलमित्युच्यते । अतः प्रायेण सर्वसिद्धा मूलाधाररता भवन्ति" (पृ० २०) इत्येवं विनैव विशेषणं शिवानन्दाचार्यः स्मर्यते । यद्यप्यस्मदुपलब्धेषु शिवानन्दग्रन्थेषु नैतद्वचनमवलोक्यते, तथापि यदि गोरक्षनाथो महेश्वरानन्दश्चाभिन्ने व्यक्ती स्याताम्, तर्हि तेन स्वकीयः परमगुरुः शिवानन्द एवात्र स्मृतो भवेत् । अत्रत्यं च शिवानन्दाचार्य इति पदं तेनापरिचयमेव तस्य प्रख्यापयति ।

In Public domain. Digitization Muthulakshmi Research Academy

ते। एतेन शिवानन्दस्यापि चोल(केरल)देशेऽवस्थितिरनुमातुं शक्यते।
मलस्य महार्थमञ्जरीग्रन्थस्य मातृकाः केरललिप्यामेव प्राय उपलब्धाः। शिवानन्दस्यान्ये
अपि बाहुल्येन दक्षिणापथ उपलभ्यन्ते। न केवलं शिवानन्दस्य, पुण्यानन्दामृतानन्दादीनां
अपि दाक्षिणात्येषु पुस्तकालयेषु प्रायेणावलोक्यन्ते। कामकलाविलासस्य योगिनीहृदय-
ायाश्च सार्वत्रिकः प्रचारस्तयोर्महत्त्वं ख्यापयति, किन्तु तद्विरचितानामन्येषां ग्रन्थानां
ः प्रायेण दाक्षिणात्येष्वेव पुस्तकालयेषु दृश्यन्ते। अतः सर्वे एते आचार्या दाक्षिणात्या
वयं संभावयामः। महार्थमञ्जरीकारिका महाराष्ट्रप्राकृतनिबद्धाः। ऋजुविमर्शिनी
ज्ञादर्शनमनुसरतीति कृत्वा शिवानन्दः कश्मीराभिजन इति नैव शङ्कनीयम्, काश्मीरस्य
ज्ञाक्रमदर्शनानुसरणस्य महेश्वरानन्दग्रन्थेऽपि दर्शनात्, तेन च स्वयमेव स्वकीयस्य
शाभिजनत्वस्य ख्यापनात्। "सम्प्रदायस्य कश्मीरोद्भूतत्वात्" (ऋजु० पृ० १४४)
चोभङ्गयाऽपि शिवानन्दस्य कश्मीरानभिजनत्वं व्यज्यते।

शिवानन्दस्य देशकालादिविषयेऽस्माभिरन्यत्र[१] परामृष्टम्। अपि च, "स्वच्छन्दभैरवे
इत्यादिकमाचार्यवचनमृजुविमर्शिनी (पृ. २२५) प्रमाणयति। ईशानशिवगुरुदेव-
सोमशम्भुकृतित्वेनैतदस्मारि, उपलभ्यते चैतद्वचनं सोमशम्भुविरचितायां कर्मकाण्ड-
याम् (पृ. ५५)। सोमशम्भुना ग्रन्थोऽयं ११३० वैक्रमे वत्सरे (१०७३ ई०)
। तमिमं ग्रन्थं प्रमाणयता शिवानन्देन तत्परवर्तिनैव भाव्यम्। सौन्दर्यलहरीव्याख्यातु-
रस्य समयः श्रीमता चिन्ताहरणचक्रवर्तिमहोदयेन[४] १४९७-१५३९ ई. मध्ये निर्धा-
लक्ष्मीधरेण कामकलाविलासः स्मर्यते। कामकलाविलासकारश्च शिवानन्दपश्चाद्भव
त्वा शिवानन्दस्य स्थितेः पूर्वापरे सीमनी पूर्वोक्तयोः कालयोरभिमन्तव्ये।
शिवानन्दस्य ग्रन्थचतुष्टयमत्र प्रकाश्यते। शम्भुनिर्णयदीपिकाऽस्यैव शिवानन्दस्य कृतिः।
पूर्णा मातृका मद्रपुरीराज्यपुस्तकालये विद्यते। एवमेव सुभगोदयप्रभाऽपि शिवानन्द-
कृतिः। मद्रासराज्यपुस्तकालये एकस्यामेव मातृकायां R. ४४४५b संख्याकायां
पत्रेषु सुभगोदयः सुभगोदयवासना च वर्तते। ग्रन्थद्वयमपि तत्र सुभगोदयवासना-
विव्रियते। तदनन्तरं R. ४४४५b संख्याका मातृका १०a–१३b संख्यकेषु पत्रेषु वर्तते
यप्रभायाः। अत्रत्येषु विवरणश्लोकेषु दृश्यते यच्छिवानन्देन सुभगोदये नित्यपूजाविधि-
सुभगोदयप्रभायां च नैमित्तिकविधिरुच्यते। अथ च तेन शाम्भवोदयनामा ग्रन्थोऽपि
कृति। तद्यथा—

हाराष्ट्रभुवं भाषां प्रयुञ्जाना स्मितोत्तरम्" (पृ० १९८) इति, "किञ्च भाषा
येव माधुर्यामृतवर्षिणी" (पृ० १९९) इति च महार्थमञ्जरीपरिमले।
ास्ते सततोत्सवा जनपदाः······(म० प०, पृ० २०२)।
पुरादर्शनस्यापरिचिता आचार्याः कृतयश्च" इत्याख्ये निबन्धे, सारस्वती सुषमा,
२०, अ. २, पृ. २४-२५।
तन्त्राज : स्टडीज ऑन देयर रिलीजन एण्ड लिटरेचर, पृ. ७२।

संग्रहोक्तमनुक्तं वा यत्किञ्चित् सुभगोदये।
द्रष्टव्यं तदशेषेण मदुक्ते शाम्भवोदये॥ इति।

संवित्स्तोत्रं त्रिपुरसुन्दरीमन्दिरस्तोत्रं च शिवानन्दकृतित्वेन महार्थमञ्जरीपरिमले[१] उट्टङ्कितम्। स्वतन्त्रानन्दकृतिर्मातृकाचक्रविवेकः शिवानन्दरचितया टीकया सह सरस्वतीभवनग्रन्थमालायां प्रकाशितः। सोऽयं शिवानन्द[२] ऋजुविमर्शिनीकारतो भिन्नः। सिद्धसिद्धान्तसिन्धुकारो जगन्निवासात्मजो गोस्वामिशिवानन्दश्चाभ्यां भिन्नः। एतावता ग्रन्थनवकं साम्प्रतं शिवानन्दस्य कृतित्वेन निश्चीयते निष्प्रत्यूहम्।

महेश्वरानन्दस्य परमगुरुर्महाप्रकाशस्य गुरुरयं शिवानन्दः स्वात्मानन्दस्य[३] शिष्यः प्रतिष्ठानन्दस्य[४] सूनुरिति ऋजुविमर्शिनी-शम्भुनिर्णयदीपिकोपोद्घातपद्यैः परिज्ञायते। मानवौघगुरुष्वन्तिमो वासुदेवमुनिरेव स्वात्मानन्द इति वयं प्रतीमः। तेन हि (वासुदेवमुनिना) पुत्रीकृत ऋजुविमर्शिनीकर्ता शिवानन्दमहायोगी (ऋजु. पृ. २२४)। सौभाग्यसुधोदये मानवौघगुरुष्वन्तिमे द्वे नामनी परमानन्दः स्वात्मानन्द इति दृश्येते। एते च ऋजुविमर्शिन्यादिप्रदर्शितरत्नदेव-वासुदेवस्थानीये। तेन वासुदेव एव स्वात्मानन्दः। तेन पुत्रीकृतत्वाच्छिष्यत्वेन परिगृहीतत्वात् शिवानन्दस्तस्य शिष्यः। मद्रपुरीराज्यपुस्तकालय एव R. ४४४६ संख्याका निष्कलङ्कमचर्चाया मातृका वर्तते। तस्या अयं प्रथमः श्लोकः—

श्रीशिवानन्दपौत्रेण श्रीचिदानन्दसूनुना।
श्रीकण्ठानन्दमुनिना चर्च्यते निष्कलङ्कमः॥ इति।

स्वच्छन्दपद्धतिकर्ता चिदानन्दः शिवानन्दस्य पुत्रः शिष्यश्च। चिदानन्देन[५] प्रार्थितः शिवानन्दः शम्भुनिर्णयदीपिकां रचयामास। चिदानन्दस्य पुत्रः श्रीकण्ठानन्दो निष्कलङ्कमचर्चाकारः। एवं चायमत्र वंशपरम्पराक्रमः—प्रतिष्ठानन्दः, शिवानन्दः, चिदानन्दः, श्रीकण्ठानन्द इति।

सुभगोदयः सुभगोदयवासना च

"ऋजुविमर्शिन्यां विद्या न लिख्यन्ते, सुभगोदये लिखितत्वात्। ऋजुविमर्शिन्यां तु ग्रन्थविवरणं क्रियते। इदमप्युक्तमस्माभिः—

---

१. द्रष्टव्यम्—पृ. १२९, १९५।
२. अत्र प्रमाणं पूर्वोक्तेऽस्मदीये निबन्धे २५ पृष्ठस्थ ४ टिप्पण्यां द्रष्टव्यः।
३. स्वात्मानन्दमहेशानचरणान्तेनिवासिना। (ऋजु. पृ. २)
४. "अजेशप्रभुपात्रेण प्रतिष्ठानन्दसूनुना" इति, "प्रतिष्ठानन्ददुग्धाब्धेः शिवानन्देन्दुरुत्थितः" (श. दी. उपोद्घाते) इति च।
५. "अकरोदर्थितो व्याख्यां चिदानन्देन धीमता" (शं. दी. उपोद्घाते)।

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वं विद्यां गुरोर्लब्ध्वा मूलमृजुविमर्शिनीम् ।
महासारं सुकृतिनः पश्यन्तु सुभगोदयम् ॥"

(ऋजु० पृ० १०६–१०७)

अत्र मूलग्रन्थं नित्याषोडशिकार्णवं तद्व्याख्यामृजुविमर्शिनीं च दृष्ट्वा महासारं सुभगोदयं पश्यन्तु सुधिय इति शिवानन्द ऊचे । नित्याषोडशिकार्णवस्य प्रथमपटलस्थः सर्वोऽपि विषयोऽत्र संक्षेपेण प्रतिपादितः, तत्र सूचिताः सर्वा विद्याश्च समुद्धृता इत्यस्य महासारत्व-विशेषणं समुचितमेव । सुभगोदयस्त्रिपुरसुन्दरीनित्यपूजाप्रतिपादकः[२] संक्षिप्ततमः पद्धतिग्रन्थ इत्यवगन्तव्यम् । ऋजुविमर्शिन्यां बहुश एतत्स्मर्यते । तत्रत्यानि सर्वाणि स्थलानि मुद्रितेऽस्मिन् सुभगोदये समुपलभ्यन्ते । मूलविद्या सुभगोदये न लिखिता, अतिरहस्यत्वात् । नित्याषोड-शिकार्णवे पञ्चदशतिथिनित्याविद्या नोद्धृताः, सुभगोदये तु (पृ० २८९–२९०) दृश्यते तासां समुद्धारः ।

सुभगोदयवासना त्रिपुरसुन्दर्या आन्तरवरिवस्यां समुपदिशति । सुभगोदयः सुभगोदय-वासना च भिन्नावेतौ ग्रन्थौ । महेश्वरानन्दः सुभगोदयवासनां क्रमवासनानाम्ना स्मरति, सुभगोदयं च तन्नाम्नैव । त्रिवेन्द्रम्-मातृकायां सुभगोदय एवास्ते, न सुभगोदयवासना । मद्रासपुस्तकालये तु मातृकायामेकस्यामेवोभौ ग्रन्थौ प्राप्येते, सुभगोदयवासनानाम्नैकग्रन्थत्वेन तौ विवृतौ । सुभगोदयवासना योगिनीहृदयदीपिकायां चिद्वल्ल्यां च स्मर्यते । अनयोर्ग्रन्थयोः साहाय्येनैवास्माभिरत्रत्य एकः श्लोको मातृकायामनुपलब्धः समुद्धृतः । सुभगोदये सुभगोदय-वासनायां सुभगोदयप्रभायां च सप्ततिसंख्यामिताः श्लोकाः सन्तीति स्वयमेव ग्रन्थकारो वदति । महेश्वरानन्दोऽपि महार्थमञ्जर्यां सप्ततिसंख्यामिताः कारिका अनुबध्नाति । शिवानन्दमहेश्वरा-नन्दयोरस्यां संख्यायामभिनिवेशः किंमूलक इति विचार्यम् ।

अम्बास्तवटीकायाम्[३]—"श्रीशङ्कराचार्यकृतौ सौभाग्यविद्यासुभगोदयाख्यौ" इति दृश्यते । एतौ ग्रन्थौ तत्र नैकत्रोद्धृतौ । लक्ष्मीधरायामपि सव्याख्यानः सुभगोदयो नैकत्र स्मृतः (पृ० ४६, ७६, ८०, ८१, ९९, ११०, १४९, १५०, १७२, १७९, १८०, १८७, ३०५,

---

एष श्लोकोऽस्माभिर्दृष्टेषु शिवानन्दग्रन्थेषु नोपलभ्यते । "संग्रहोक्तमनुक्तं वा यत्किञ्चित् सुभगोदये । द्रष्टव्यं तदशेषेण मदुक्ते शाम्भवोदये ॥" इति सुभगोदयप्रभावचनादेतज्ज्ञायते यत् शिवानन्देन शाम्भवोदयनामा विस्तृतो ग्रन्थो लिखितः, यत्र हि सुभगोदये संक्षेपेणोक्ता अनुक्ता वा विषयाः प्रतिपादिता इति । तत्रत्य एवैष श्लोको भवेत् ।

सुभगोदयप्रभा शिवानन्दस्य नैमित्तिकपूजाप्रतिपादको ग्रन्थः । यदुक्तं ग्रन्थारम्भे—

एवं समाप्य विधिवन्नित्यपूजामनन्तरम् ।
नैमित्तिकविधिं वक्ष्ये भक्तानामनुकम्पया ।। इति ।

सरस्वतीभवनपुस्तकालयस्थितायाः २१९२२ संख्यकाया मातृकाया द्वितीयं पत्रं द्रष्टव्यम् ।

३०७) । "सुभगोदयव्याख्यानावसरे निपुणतरमुपपादितमस्माभिः" (पृ० ८१, १८०), "एतत्सर्वं सुभगोदयव्याख्यानावसरे चन्द्रकलायां सम्यङ्निरूपितमस्माभिः" (पृ० ११०) इत्यनेनोद्धरणद्वयेन ज्ञायते यत्स्वयं लक्ष्मीधरेणैव सुभगोदयव्याख्यानं व्यरचि । "यथोक्तं भगवत्पादैः सुभगोदयव्याख्याने—शिखिज्वालारूपः समय इह सैवात्र समया, तयोः संभेदो मे दिशतु हृदयाब्जैकनिलयः । इति" (पृ० १७५) अनेन च ज्ञायते यदत्र भगवत्पाद-व्याख्यानमप्यासीत् । ८० तमे पृष्ठे "परोऽपि शक्तिरहितः" इत्यादिकः श्लोकः सुभगोदय-नाम्नोद्धृतः । एष च श्लोको नित्याषोडशिकार्णवे (४।६) दृश्यते । एवं प्रतीयते यद्यथा सौन्दर्यलहर्यां नित्याषोडशिकार्णवस्थाः केचन विषयाः संनिविष्टास्तथैव सुभगोदयेऽपि ते संनिविष्टाः स्युरिति । अत्रैव ९९ तमे पृष्ठे सुभगोदयस्य कश्चन गद्यांशः समुद्धृतः । तेन ग्रन्थ एष गद्य-पद्यात्मक आसीदिति संभाव्यते । सुभगोदयस्य लल्लेन विरचितायाष्टीकाया उल्लेखो भास्कररायेण स्वकीये ललितासहस्रनामभाष्ये (पृ० ७७) कृतः । एष ग्रन्थश्चात्र (पृ० ७६) वासनासुभगोदयनाम्नापि स्मृतः । ग्रन्थ एष शिवानन्दमुनेः सुभगोदयात् सुभगोदयवासनातश्च भिन्न एव, अत्रत्यानामुद्धृतानां श्लोकानां तत्रानुपलब्धेः । सौभाग्यवर्धनीकारेण कैवल्याश्रमेण तु शिवानन्दमुनिरेव स्मृतः, तत्रोद्धृतस्य (पृ० ३६) सार्धैकस्य श्लोकस्यात्रोपलब्धेः (पृ० २८४) । गौडपादाचार्यकृतिरूपेण प्रसिद्धा सुभगोदयस्तुतिर्न क्वचन प्राचीनेष्वर्वाचीनेषु वा ग्रन्थेषूद्धृतोपलभ्यते । सा च पूर्वोद्धृताभ्यां ग्रन्थाभ्यां पृथगेव ।

अर्थरत्नावलीकारो विद्यानन्दः

योगिनीहृदयानुप्रास्ताविके (पृ. घ) टिप्पण्यामस्माभिः सौभाग्यरत्नाकरादिकर्ता विद्यानन्द एवार्थरत्नावलीकार इत्युदलेखि । नवीनोपलब्धैः प्रमाणैस्तु भिन्नावेतौ ग्रन्थकारौ भवतः । सौभाग्यरत्नाकरकर्तुर्विद्यानन्दस्य गुरुः सच्चिदानन्दनाथः, अर्थरत्नावलीकारस्य तु रत्नेशः । प्रथमः कादिविद्यापद्धतिकारः, द्वितीयश्च हादिमतानुसारिणीं[१] पद्धतिमारचयति । अर्थरत्नावलीकारो यद्यपि स्वात्मानं सम्प्रदायद्वयज्ञत्वेन[२] ख्यापयति, नित्याषोडशिकार्णवसूत्राणि च प्रथमं कादिमतानुसारं व्याख्याति; तथापि तस्य वर्तते कोऽपि पक्षपातो हादिविद्यायाम् । अत एव भास्कररायः सर्वथा तद्व्याख्यानं खण्डयति, अनुमोदयति च सौभाग्यरत्नाकरकार-मतानि सर्वत्र स्वकीयेषु ग्रन्थेषु ।

हादिविद्यामनुसरतो विद्यानन्दस्योपलभ्यते ग्रन्थद्वयं साम्प्रतम्—अर्थरत्नावली, ज्ञान-दीपविमर्शिनी च । अर्थरत्नावली प्रकाशितैवात्र । साऽस्य ग्रन्थकारस्य प्रथमा कृतिः, ज्ञानदीप-

---

१. "···लोपामुद्रामतस्थितैः । सद्भिः संसेवनीयेयं ज्ञानदीपविमर्शिनी ॥" इति ज्ञानदीप-विमर्शिनीस्थ उपोद्घातश्लोकः (१ क) ।

२. सम्प्रदायद्वयज्ञेन (अर्थ. पृ. ४) ।

In Public domain. Digitization Muthulakshmi Research Academy

र्मशिन्याः स्थलत्रयेष्वर्थरत्नावलीस्मरणदर्शनात् । ज्ञानदीपविमर्शिन्या मातृका गायकवाड-
धसंस्थायां केरलविश्वविद्यालयग्रन्थागारे नेपालस्थवीरपुस्तकालये च सन्ति ।

सेयं ज्ञानदीपविमर्शिनी योगिनीहृदयदीपिकायां (पृ० १६०) स्मर्यते । अर्थरत्ना-
या मातृका १६२३ वैक्रमे वत्सरे लिखिता गायकवाडशोधसंस्थायां वर्तते । तत्रत्याया एव
नदीपविमर्शिनीमातृकाया लिपिशास्त्रदृष्ट्या परीक्षणे कृते चतुर्दशशताब्दीतो नवीनः कथमपि
शक्येत साधयितुं समयस्तस्याः । सोमशम्भुग्रन्थः कर्मकाण्डक्रमावली विद्यानन्देन विमल-
त्मशम्भुना ज्ञानदीपविमर्शिन्यां (प० ३४ ख) स्मृतः । सोमशम्भुना चैष ग्रन्थः ११३०
मे वत्सरे पूरित इति पूर्वमुक्तम् । अतो विक्रमस्य द्वादशत्रयोदशचतुर्दशशताब्दीषु कश्चन
योऽस्य स्वीकर्तव्यः । शिवानन्दविद्यानन्दौ समसामयिकौ स्यातामित्यस्माभिः संभाव्यते ।

अर्थरत्नावलीमङ्गलाचरणश्लोकेषु प्रथमे महावनः, द्वितीये प्रियानन्दः, चतुर्थपञ्चमयोश्च
रत्नेशः प्रणम्यते । तदनु शिवः, कामेश्वरी, त्रिविधा दम्पती, कङ्कालप्रभृतयः सिद्धाः,
ाथः, वटुकः, योगिनीवृन्दम् भैरवाश्च स्तूयन्ते । एषु महावनमुनेः श्लोक एष दृश्यते महार्थ-
रीपरिमले—

अलिपिशितपुरन्ध्रीभोगपर्याकुलोऽहं
बहुविधकुलयोगारम्भसंभावितोऽहम् ।
पशुजनविमुखोऽहं भैरवीसंश्रितोऽहं
गुरुचरणपरोऽहं भैरवोऽहं शिवोऽहम् ॥ (पृ० १७०)

त्नावली प्राधान्येन कौलमतं व्याख्यातीति पूर्वमुक्तम् । एष श्लोकोऽपि तन्मत-
एव । अत्र रत्नेशो विद्यानन्दस्य गुरुः, प्रियानन्दः परमगुरुः, महावनमुनिश्च परमेष्ठि-
ति संभाव्यतेऽस्माभिः । शिवः, कामेश्वरी, त्रिविधा दम्पती, कङ्कालप्रभृतयश्च सिद्धाः
यप्रकरणे व्याख्यास्यन्ते । गणनाथः, वटुकः, योगिनीवृन्दम्, भैरवाश्च कौलमतस्य विशिष्टा
इति संकेतपद्धतिज्ञानदीपविमर्शिनीप्रभृतिषु ग्रन्थेषु मङ्गलाचरणश्लोकेषु स्तूयन्ते ।

अमृतानन्दस्तस्य सौभाग्यसुधोदयचिद्विलासे

योगिनीहृदयस्यानुप्रास्ताविके पुण्यानन्दामृतानन्दयोः कृतीरभिलक्ष्य किञ्चिदुक्तम् ।
हृदयदीपिकायां कृतीनामेतासामुद्धरणावसरे दृश्यते द्विप्रकारकः पाठः । मुद्रिते दीपिका-
र्वत्र तेषु स्थलेषु 'इत्यस्मद्गुरूक्तरीत्या' इति पाठो मूले स्थापितः, 'अस्मदुक्तरीत्या'
ठस्तु पाठसंकलनात्मिकासु टिप्पणीषु । एवमेव 'सौभाग्यसुभगोदय' इति पाठो मूले,
षु च 'सौभाग्यसुधोदय' इति दृश्यते । पाठद्वयमेतदस्माभिः बड़ोदा-बम्बई-पूनास्थ-
यतासु दशाधिकासु मातृकासु संवादितम् । सर्वत्र द्वितीय एव पाठः समुपालम्भि ।
तव्यं तदस्माभिस्तत्त्वविमर्शिनीपरिचयावसरे प्रतिपादयिष्यते । भास्कररायप्रभृतिभिः
सुधोदयनाम्नैव स्मृतत्वादिदमेवास्य ग्रन्थस्य नाम । अत्र सन्ति षट् प्रपञ्चाः । तत्र प्रथमे
क्चतुष्टयम्, वर्णोत्पत्तिप्रकारः, तत्त्वानां स्वरूपमुत्पत्तिक्रमश्च प्रादर्शि । षट्त्रिंशत्तत्त्व-

---

च्यम्—२८ क, ४३ ख, ५६ क ।

प्रतिपादका अत्रत्याः श्लोका एव कश्मीरग्रन्थमालायां षट्त्रिंशत्तत्त्वसंदोहनाम्ना प्रकाशिताः । द्वितीये हादिविद्यासमुद्धारः प्रदर्श्यते । तृतीयचतुर्थपञ्चमेषु श्रीचक्रप्रपञ्चः, षष्ठे च प्रपञ्चे गुरुपङ्क्तिक्रमः प्रपञ्च्यते ।

चिद्विलासस्य गपुस्तकेऽमृतानन्दस्तत्कर्तृत्वेन निर्दिष्टः, घपुस्तके च पुण्यानन्दः । 'अस्मद्गुरूक्त' इत्यस्य स्थाने 'अस्मदुक्त' इति पाठस्यैव बाहुल्येनोपलब्धेः, "कायति नानानामप्रपञ्चरूपेण मातृका देवी" (सौ० सु० १।६) इति सौभाग्यसुधोदयोद्धरणस्थले 'अस्मदुक्त' इति पाठस्यैव स्वारसिकत्वाद् दीपिकायां सर्वत्र स एव पाठः परिग्राह्यः । तेन च चिद्विलासस्तवकारोऽमृतानन्द एव सिद्धयति ।

अत्र च गुरुपादुकास्मरणप्रभृतिविसर्जनान्तो मानस उपचारविधिः प्रदर्शितः । भट्टगङ्गाधरस्तोत्र-गीतानिष्यन्द-संकेतपद्धति-विज्ञानभैरवप्रभृतिग्रन्थेषु सूच्यते सा मानसिकी पूजापद्धतिः, या आन्तरवरिवस्यानाम्ना तन्त्रशास्त्रेषु परिगीयते । सुभगोदयवासनायामपि श्रीचक्रस्यान्तरमाराधनमारचितम् । दृश्यते चैवंविधं व्याख्यानमृजुविमर्शिन्यामर्थरत्नावल्यामपि च नित्याषोडशिकार्णवस्य । योगिनीहृदयं त्वन्तर्यागप्रधानमेव स्वीक्रियते ।

एवमत्र सम्पादितानां ग्रन्थानां तत्कर्तॄणां च विषयं विविच्याधुना नित्याषोडशिकार्णवस्य प्रारम्भे परिगणितानि चतुष्षष्टितन्त्राण्युद्दिश्य विचार्यते ।

चतुष्षष्टितन्त्राणि

चतुष्षष्टितन्त्रनामानि जयरथकृततन्त्रालोकविवेकधृतायां श्रीकण्ठ्यां संहितायाम्, नित्याषोडशिकार्णवे, कुलचूडामणौ, सर्वोल्लासतन्त्रे, महासिद्धसारतन्त्रपरिगणितेषु विष्णुक्रान्ता-रथक्रान्ता-अश्वक्रान्ताविभागेषु च दृश्यन्ते । तत्र श्रीकण्ठ्यां संहितायामभेदप्रधानानां चतुष्षष्टिभैरवागमानां समुल्लेख इत्येकः प्रकारः । नित्याषोडशिकार्णवस्थः प्रकारो द्वितीयः, यत्र हि मुख्येषु विभिन्नेषु तान्त्रिकमतेषु तदानीन्तनेषु प्रथितानां तन्त्राणां समावेशः । एतच्चाग्रे प्रतिपादयिष्यते । कुलचूडामणिरिममेव प्रकारमनुसरति । सर्वोल्लासादितन्त्रस्थः प्रकारस्तृतीयः । अत्र विष्णुक्रान्तादिविभागेषु च केषाञ्चन मानवकृतीनामपि समावेशादिमानि तन्त्राणि कालक्रमापेक्षया पश्चादाविर्भूतानीव प्रतीयन्ते । विस्तरभयादत्रापहाय प्रकारद्वयं नित्याषोडशिकार्णवस्थः प्रकार एव प्राधान्येन चर्च्यते ।

चतुष्षष्टिभैरवागमा अष्टाष्टकविभागेनाष्टभिर्भैरवैरुपदिष्टा इति तन्त्रालोकविवेकधृतश्रीकण्ठीयसंहितावचनेभ्यः स्पष्टम् । तत्र स्वच्छन्दादीनि भैरवतन्त्राणि बहुरूपेण, मततन्त्राणि चण्डेन, मङ्गलातन्त्राणि क्रोधेशेन, चक्राष्टकम् असिताङ्गेन, अन्वकाद्यं बहुरूपाष्टकं रुरुणा, वागीशाष्टकं कपालीशेन, शिखाष्टकम् उन्मत्तेन भैरवेण भाषितानि । यामलाष्टकप्रवक्तुर्भैरवस्य नामात्र न दृश्यते । एवमेव भैरव-यामल-मताष्टकेषु प्रत्येकं सप्तैव तन्त्राणि परिगणितानि । श्रीकण्ठीग्रन्थमवलम्ब्यैव भैरवतन्त्राणां परिगणनं द्वित्रेषु ग्रन्थेषु दृश्यते । तत्र काशिकनागरीप्रचारिणीसभाप्रकाशितविश्वकोशस्य पञ्चमे खण्डे 'तन्त्रसाहित्य' इति शब्दविवरणे प्रतिपादितः क्रम एव ग्रन्थानुसारी ।

In Public domain. Digitization Muthulakshmi Research Academy

नित्याषोडशिकार्णवेऽत्रत्यं भैरवाष्टकं बहुरूपाष्टकं यामलाष्टकं च निर्दिष्टम्, नामानि तु गणितानि । मताष्टकनामानि यद्यपि परिगणितानि, तथापि तानि श्रीकण्ठीनामावलीतो न्येव । नित्याषोडशिकार्णवोक्तचतुष्षष्टितन्त्रपरिगणने वर्तते मतभेदष्टीकाकाराणाम् । तत्र श्वरीमतविवरणपाठे, सौन्दर्यलहरीव्याख्याकारलक्ष्मीधरधृतपाठे च चतुष्षष्टिसंख्यासंपत्तिः द्धा, यद्यप्यनयोर्नामावल्योर्नैव साम्यमवलोक्यते । सेतुबन्धाङ्गीकृते कुलचूडामणिस्थे च ा दुरुपपादेति तत्संपत्तये कश्चन मार्गोऽन्वेषितस्तत्र । तथा हि—

"अत्र ऋजुविमर्शिन्यां महामायातन्त्रं शम्वरतन्त्रं चेति तन्त्रद्वयपरं व्याख्यातम् । लक्ष्मणेन[2] तु महामायाशम्वराख्यमेकं तन्त्रमित्युक्तम् । अर्थरत्नावल्यां तु द्वयमपि नोक्तम् । महालक्ष्मीमतं देवेत्यादि वक्ष्यमाणं श्लोकद्वयं कैश्चित्परित्यक्तम्, अन्यैस्तु स्वीकृतम् । परन्तु सर्वेषामेव मते चतुष्षष्टिसंख्यासंपत्तिर्दुरुपपादा । वस्तुतस्तु तत्संपत्त्यर्थमेवास्मिन् श्लोके पूर्वार्धे चत्वारि तन्त्राणि । तत्त्वशम्बरमेकं भैरवाष्टकं चैकमिति षट्तन्त्राणि । केचित्तु—

असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्त एव च ।
कपाली भीषणश्चेति संहारश्चाष्टभैरवाः ॥

इत्युक्तानामष्टानां भैरवाणामष्टौ तन्त्राणीत्याहुः । अन्ये[1] तु—सिद्धिभैरव-वटुकभैरव-कङ्कालभैरव-योगिनीभैरव-महाभैरव-शक्तिभैरव-मायिकभैरव-कङ्कालाग्निभैरवाष्टकप्रतिपादकं तन्त्राष्टकमित्याहुः । तदुभयमपि संख्यासम्पत्तिविरोधाद् यामलादिशब्दवद् भैरवशब्दस्य तन्त्रेषु क्वापि प्रयोगादर्शनाच्च चिन्त्यम् । तस्मात् षोडशनित्यानामेकतन्त्रवदष्टभैरवाणामेकमेव तन्त्रमिति व्याख्येयम् ।…" (पृ० २२) इति सेतुबन्धे ।

अत्र यद्वक्तव्यं तद्यथावसरं वक्ष्यते । अधुना चतुष्षष्टितन्त्राणि परिगण्यन्ते—

१–५. महामायाशम्बरं योगिनीजालशम्बरं तत्त्वशम्बरं चेति त्रीणि तन्त्राणीति धरः । गौरीकान्तो लक्ष्मणमेवानुसरति । महामाया-शम्बर-योगिनी-जालशम्बर-तत्त्वरूपाणि पञ्च तन्त्राणीत्यन्ये सर्वेऽपि व्याख्यातारः । अर्थरत्नावलीकारेण तु ग्रन्थांश एष ाख्यातः । बौद्धतन्त्राणां भोटानुवादेषु महामाया-जालशम्बर-मायाशम्बर-मायाजालनि तन्त्राण्युपलभ्यन्ते । नगेन्द्रनाथवसुसंगृहीते विश्वकोशे शम्वर-डाकिनीजाल-योगिनीनीजाल-मायाजाल-प्रभृतीनि बौद्धतन्त्राणि प्रदर्शितानि । म० म० हरप्रसादशास्त्रिसंदब्धायां ग्रन्थसूच्यां डाकिनीजालशम्बर-योगिनीजालतन्त्रयोर्मातृके दृश्येते । सर्वाण्येतानि तन्त्राणि ता बुद्धेन तदवतारभूतेन वा बोधिसत्त्वादिनोपदिष्टानि स्युः । अत्र तु "एवमेतानि शास्त्राणि यान्यपि कोटिशः ॥ भवतोक्तानि मे देव" (१।२१-२२) इति वचनाच्छिवोपदिष्टानीमानि णीति ज्ञायते । अस्मिन् विषये नाधुना किमप्यधिकं वक्तुं पार्यते ।

वामकेश्वरीमतपाठ एव चतुष्षष्टितन्त्रपरिगणनात्मकोऽत्र प्राधान्येनादृतोऽस्माभिः ।

लक्ष्मणेन = सौन्दर्यलहरीव्याख्यात्रा लक्ष्मीधरेण ।

लक्ष्मीधरगौरीकान्तप्रभृतयः ।

६–१३. भैरवाष्टकविषये भास्कररायलक्ष्मीधरयोर्मतवैभिन्न्यमनुपदमेव प्रदर्शितम् । मन्ये श्रीकण्ठीया तन्त्रनामावली भैरवाष्टकप्रतिपादिका भास्कररायेण लक्ष्मीधरेण च नैव दृष्टा । "असिताङ्गाद्यष्टभैरवाणां पूजाशास्त्राणि" (पृ० ४३) इत्यर्थरत्नावलीकार आह । सेतुबन्धस्थः श्लोकस्तु तेन नोद्धृतः । एतदनुकारः श्लोक उत्तरषट्के दृश्यते । एतेऽसिताङ्गादयोऽष्टौ भैरवाः प्रपञ्चसार-त्रिपुरासारसमुच्चय-ईशानशिवगुरुदेवपद्धतिप्रभृतिग्रन्थेषु दृश्यन्ते । श्रीकण्ठीयसंहितायां तु स्वच्छन्द-चण्ड-क्रोध-उन्मत्त-असिताङ्ग-महोच्छुष्म-कपालीशाख्याः सप्त भैरवा निर्दिष्टाः, अष्टमस्य तु नाम न दृश्यते । ब्रह्मयामले स्वच्छन्द-क्रोध-उन्मत्त-उग्र-कपालि-झङ्कारशेखर-विजयाख्या अष्टौ भैरवा उपदिष्टाः । स्वच्छन्दतन्त्रे कपालीश-शिखिवाहन-क्रोधराजविकराल-मन्मथ-मेघनादेश्वर-सोमराज-विद्याराजाख्या अष्टौ भैरवाः सन्ति परिगणिताः । एवं तन्त्रेषु परस्परं मतभेदे जाग्रति भैरवतन्त्राणामुपलब्धानामुद्धृतानां वा परिमार्गणे क्रियमाणे समुपलब्धानि भवन्तीमानि नामधेयानि ग्रन्था वा—स्वच्छन्दतन्त्रं मुद्रितमुपलभ्यत एव । स्वच्छन्द-चण्ड-त्रिशिरोभैरवा नेत्रतन्त्रोद्योते (भा० १, पृ० २२५) स्मृताः । त्रिशिरोभैरवस्तन्त्रालोके तद्विवेके च बहुशः स्मर्यते । उन्मत्तभैरव ऋजुविमर्शिन्या ग मातृकायामुल्लिखितः । उच्छुष्मभैरवस्तन्त्रं च क्षेमराजेन शिवसूत्रविमर्शिन्यां स्वच्छन्दोद्योतादिषु चोद्धृतम् । उच्छुष्मतन्त्रं बौद्धतन्त्रग्रन्थेऽद्वयवज्रसंग्रहेऽपि (पृ० २८) स्मर्यते । मन्थानभैरवस्य ५८१९ संख्याका मातृका कलिकातास्थ-एशियाटिकसोसाइटी-संस्थायां वर्तते । एवं च बहूनां भैरवतन्त्राणामुपलम्भादत्राष्टौ भैरवतन्त्राणि परिगणितानि, न तु भैरवाष्टकमेकमिति मन्तव्यम् ।

१४–२१. बहुरूपाष्टकं शक्तितन्त्राष्टकमिति शिवानन्दः । ब्राह्म्यादयः सप्त मातरः शिवदूत्येकेत्यष्टानां प्रतिपादकान्यष्टौ बहुरूपतन्त्राणीति लक्ष्मीधरो गौरीकान्तश्च । अन्धक-रुरुभेद-अजाख्य-मूलाख्य-वर्णभण्ठ-विडङ्ग-ज्वालिन-मातृरोदनात्मकं बहुरूपाष्टकमिति श्रीकण्ठीयसंहिता । "बहुरूपाष्टकं शास्त्रं संक्षिप्य चतुश्शतसंख्यापरिमितैर्ग्रन्थैस्तत्सारमुद्धर्तुकामः…" (पृ० ४, ३४) इति विद्यानन्दः । कादिमतमनोरमाकारः सुभगानन्दनाथो नवनित्यातन्त्रेषु बहुरूपाष्टकमेकं परिगणयति । बहुरूपाष्टकतन्त्रं (बहुरूपाष्टकप्रस्तारो वा) सौभाग्यभास्करे (पृ० ४०, १९०) भास्कररायेण समुद्धृतम् । विद्यानन्द-सुभगानन्द-भास्कररााया बहुरूपाष्टकमेकं तन्त्रमङ्गीकुर्वन्ति । अत्र बीजं न जानीमः ।

२२. ज्ञानम् । भास्कररायेण ज्ञानपदं ज्ञानार्णवपरं व्याख्यातम् (से० पृ० २४) । एतच्च तन्त्रं "नित्यानां षोडशानां च नव तन्त्राणि कृत्स्नशः" (१।२) इति कादिमत-(तन्त्रराज)श्लोकव्याख्यानावसरे मनोरमाकारेण सुभगानन्दनाथेन—"नव तन्त्राणि सुन्दरीहृदय-नित्याषोडशिकार्णव-चन्द्रज्ञान-मातृकातन्त्र-संमोहनतन्त्र-वामकेश्वर-बहुरूपाष्टकप्रस्तारचिन्तामणि-मेरुप्रस्ताराख्यानि वर्तन्ते" इत्यत्र परिगणितेषु नवनित्यातन्त्रेषु न दृश्यते । अतो ज्ञानार्णवतन्त्रमेतन्नित्याषोडशिकार्णव-कादिमतादिभ्यः पराचीनमेवेति चतुष्षष्टितन्त्रेषु न तस्य समावेशः । नित्याषोडशिकार्णव-योगिनीहृदयादिषु डाकिन्यादयः षड्योगिन्यः स्मर्यन्ते, व्याख्यायते च तथैव प्राचीनैष्टीकाकारैः । ज्ञानार्णवे (१४।९६–१०३) तु सप्त योगिन्यो निरूपिताः ।

In Public domain. Digitization Muthulakshmi Research Academy

ा, सौन्दर्यलहरीप्रभृतिषु ग्रन्थेषु त्रैपुरं हादिकादि विद्याद्वयमेव दृश्यते, ज्ञानार्णवे तु द्वादश विद्याः
द्धृताः। एतदपि तस्य तन्त्रस्य परवर्तित्वमेव पोषयति। एवं च ज्ञानार्णवानुरोधेन नित्या-
शिकार्णव-योगिनीहृदयादिग्रन्थानामन्यथा व्याख्यानं[1] प्राचीनाचार्यव्याख्यानखण्डनं च कथं
संगच्छताम्? राजेन्द्रलालमित्रसंदृब्धायां सूच्यां ज्ञानतन्त्रं दृश्यते। महाज्ञानार्णवो
ानीहृदये (२।७७) स्मर्यते। ज्ञानमहार्णवो भोटानुवादेषूपलभ्यते। तन्त्राणामेतेषां भिन्ना-
त्वादिविषये साम्प्रतं किमपि वक्तुमशक्यम्।

२३–३०. "ब्रह्मयामल-विष्णुयामल-रुद्रयामल-जयद्रथयामल-स्कन्दयामल-उमायामल-
ीयामल-गणेशयामलान्यष्टौ[2]" (पृ० ४३) इत्यर्थरत्नावलीकारः। श्रीकण्ठ्यां ब्रह्मयामल-
ुयामल-स्वच्छन्द-रुरु-आथर्वण-रुद्र-वेतालाख्यानि सप्तैव यामलानि परिगणितानि।
यामले रुद्रयामल-स्कन्दयामल-ब्रह्मयामल-विष्णुयामल-यमयामल-वायुयामल-कुबेरयामल-इन्द्र-
लानि सन्ति। एतेषु ग्रन्थरूपेणोद्धरणरूपेण वेमानि यामलानि समुपलभ्यन्ते—रुद्रयामलं
तमुपलभ्यते, सज्जीक्रियते चास्यान्यत् संस्करणं वाराणसेयसंस्कृतविश्वविद्यालयस्थेन योग-
विभागेन। ब्रह्मयामलस्य जयद्रथयामलस्य च मातृकाः समुपलब्धाः। विष्णुयामलं स्पन्द-
पिकायामुत्पलवैष्णवेन, स्कन्दयामलं च तन्त्रालोकेऽभिनवगुप्तेन स्मृतम्। रघुनन्दनेन प्राण-
ग्णीकारेण चापि स्मृते एते यामले। प्रथमस्य मातृका अपि समुलभ्यन्ते। गणेशयामलस्य
ामलस्य च मातृका आफ्रेख्टबृहत्सूच्यां निर्दिष्टाः। उपर्युद्धृतेभ्यो यामलेभ्यो भिन्नानि देवी-
ल-वीरयामल-सङ्कर्षणीयामलानि क्रमशस्तन्त्रालोके तद्विवेके स्वच्छन्दोद्योते च, विज्ञान-
त्रविवरणे, तन्त्रालोकविवेके च स्मृतानि। शक्तियामल-कृष्णयामलयोर्मातृकाः सरस्वती-
नग्रन्थालये दृश्यन्ते। आफ्रेख्टबृहत्सूच्यामपि वर्ततेऽनयोर्निर्देशः। भैरवयामलं लक्ष्मीधरायां
दर्यलहरीटीकायाम्, कामकलाविलासटीकायां चिद्वल्ल्याम्, विज्ञानभैरवटीकायां[3] विज्ञानेन्दु-
ग्यां च स्मृतम्।

३१. चन्द्रज्ञानमष्टादशरुद्रागमेष्वन्यतमत्। ग्रन्थ एष शिवसूत्रविमर्शिनी-महार्थमञ्जरी-
मलप्रभृतिषु स्मृतः। मातृकाऽप्यस्य[4] साम्प्रतमुपलभ्यते। सुभगानन्दनाथेन[5] नवनित्यातन्त्रेषु

मूलग्रन्थे ७ पृष्ठस्था ५ टिप्पणी द्रष्टव्या।

सेतुबन्धेऽष्टयामलनामक्रमे कश्चन व्युत्क्रमोऽवलोक्यते। नामान्येतान्येव। कूलचूडामणि-
भूमिकायां (पृ० ६) तु व्युत्क्रमविभ्रमेणान्य एवार्थः कल्पितः, ग्रहयामलस्य च तत्र
समावेशोऽकारि।

ब्रह्मविष्णुरुद्रभैरवाख्ययामलेषु (पृ० ३)।

रौरवागमप्रथमभागे पृ० २११ द्रष्टव्यम्। अपि च, श्रीविद्याप्रतिपादकस्य चन्द्रज्ञानागम-
संग्रहस्य द्वे मातृके D ५६२४–२५ संख्याके मद्रासराजकीयपुस्तकालये विद्येते।

कादिमतमनोरमायाम् १।२

चन्द्रज्ञानं स्मर्यते। भैरवयामलान्तर्गता चन्द्रज्ञानविद्या लक्ष्मीधरेण—"भैरवयामले चन्द्रज्ञान-
विद्यायाम्" (पृ० ९९) इत्येवं स्मृता। उक्तं च—"चन्द्रज्ञानविद्यायां षोडशनित्याप्रति-
पादनम्। नित्याप्रतिपादकत्वेऽपि कापालिकमतान्तःपातित्वाद् हेयमेव। उपादेयचन्द्रज्ञानविद्या
चतुष्षष्टितन्त्रातीता" (पृ० १३८) इति। अत्र चन्द्रज्ञानमातृकाया अवलोकनानन्तरमेव
किमपि याथातथ्येन वक्तुं पार्येत, तथापि चन्द्रज्ञानविद्यातश्चन्द्रज्ञानागमो भिन्न एव स्यात्।
उपादेयचन्द्रज्ञानविद्यापदेन लक्ष्मीधरस्य चन्द्रकलाविद्याष्टकमभिप्रेतम्। एवं स वदति—
"चन्द्रकलाविद्याष्टकं श्रीविद्याप्रतिपादकं तन्त्रम्। चन्द्रकला, ज्योत्स्नावती, (कलानिधिः[1]),
कुलार्णवम्, कुलेश्वरी, भुवनेश्वरी, बार्हस्पत्यम्, दूर्वासमतं चेति" (पृ० १४०) इति। मद्राससंस्करणे
सप्तैव तन्त्राणि परिगणितानि। अष्टमस्य नाम न दृश्यते। मुद्रणजन्या त्रुटिरत्र कारणम्।
एतानि मिश्रतन्त्राणि, कुलसमयोभयमार्गप्रतिपादकत्वात्। चतुष्षष्टितन्त्राणि कुलतन्त्राणि[2]।
समयमार्गप्रतिपादकं शुभागमपञ्चकमेव वैदिकैरादरणीयमित्यादिको लक्ष्मीधरप्रतिपादितः
सिद्धान्तस्तत एवावलोकनीयः (पृ० १३७-१४१)। तन्त्रज्ञानमिति कुलचूडामणिस्थः पाठः।

३२. वासुकिपदस्थाने मालिनीपदं पठति लक्ष्मीधरः। मालिनीविद्या समुद्रयानोपाय-
हेतुः। एवं च मालिनीपदेन मालिनीविजयमपि लक्ष्मीधरस्य नाभिप्रेतम्। वासुकितन्त्रं नाद्याव-
ध्यस्माभिः क्वाप्युद्धरणेष्वपि दृष्टम्।

३३. महासंमोहनम्। अत्र सर्वे टीकाकारा ग्रन्थाश्च संवदन्ति। श्रीकण्ठ्यां संमोहमिति
शिखाष्टकेषूपलभ्यते। संमोहनमिति विष्णुक्रान्तातन्त्रेषु। डा० प्रबोधचन्द्रबागचीसमुद्धृते
कम्बुजशिलालेखे शिरश्छेद-विनाशिख-संमोह-नयोत्तराख्यस्य तन्त्रचतुष्टयस्य समुल्लेखो दृश्यते।
शिखाष्टकेषूपलब्धं शिरश्छेद-वीणाशिख-संमोहाख्यं तन्त्रत्रयमत्र स्मृतमिति श्रीगुरवः।
महासंमोहनं चैतद्भिन्नमेव तन्त्रं स्यात्। कुलचूडामणौ समुल्लेखे सत्यपि तन्त्रज्ञान-वासुकि-
महासंमोहनानि तत्रत्यायां भूमिकायां न प्रदर्शितानि।

३४. महोच्छुष्मम्। उच्छुष्मभैरवं तन्त्रं वा भैरवाष्टकविभागे चर्चितम्। ततो
भिन्नमेतत्तन्त्रम्। श्रीकण्ठ्यां भैरवाष्टकेष्वेतत्परिगणितम्। महासूक्ष्ममिति कुलचूडामणिस्थः
पाठः। तत्रत्यायां भूमिकायां तु महोच्छुष्यमिति नाम। एष एव पाठः सेतुबन्धे दृश्यते।
भूमिकालेखकः कुलचूडामणिस्थं पाठमविगणय्य सर्वत्र सेतुबन्धस्थमेव पाठमङ्गीकुरुते। अत्र
भास्करराय:—"महादेवेति संबुद्धिः। महोच्छुष्ममहादेवमिति पठन्तोऽष्टाक्षरमेकं नामेति तु
केचित्। द्वयमपि भिन्नमेवेति गौरीकान्तः। वामजुष्टं महादेवमिति पठित्वा वामजुष्टं नाम

---

१. मैसूरसंस्करणे सरस्वतीभवनस्थायां १९४३१ संख्याकायां मातृकायां चैतन्नाम दृश्यते।

२. अत्र "वैदिकमार्गदूरवर्तित्वात्।...सकलविद्वल्लोकप्रतारकाणीमानि चतुष्षष्टितन्त्राणि" (पृ०१३७–१३८) इति लक्ष्मीधरः। एतच्च वचनं समयमार्गप्रतिपादकशुभागमपञ्चकपक्ष-पातित्वमेव तस्य द्योतयति, नित्याषोडशिकार्णव-सौन्दर्यलहरीस्वारस्यविरोधात्; प्राचीनानां सर्वविधानां तन्त्राणामत्र समावेशदर्शनाच्च। एतच्च तत्र तत्र मूल एव व्यक्तीक्रियते।

In Public domain. Digitization Muthulakshmi Research Academy

मकेश्वरचतुःशतीत्युच्यत इत्यपि व्याचख्यौ" (पृ० २३) इति । अत्र केचित्पदेन प्रदर्शितं ख्यानमुपलब्धासु नित्याषोडशिकार्णव-सौन्दर्यलहरीटीकासु नोपलभ्यते । "वामजुष्टमहादेवतन्त्रे ाचारप्रवर्तके इति द्वेये" (पृ० १३९) इति लक्ष्मीधरः । "वामजुष्टं वामकेश्वरतन्त्रं चतु:- ोत्यपि कथ्यते । महादेवतन्त्रं वटुकादिसिद्धिकुलाचारप्रदर्शकम्" इति गौरीकान्तः । गौरी- तः सौन्दर्यलहर्या व्याख्याता न तु नित्याषोडशिकार्णवस्येति प्रतिपादितमस्माभिरन्यत्र । मीधरगौरीकान्तौ विहाय सर्वैष्टीकाकारैर्महादेवपदं संबुद्धिबोधकमेव व्याख्यातम् ।

३५–३६. वातुलं वातुलोत्तरं च शैवागमेषु तदुपागमेषु च दृश्येते । तत्र वातुलोत्तरं रत्नसंग्रहे, वातुलं च नानाग्रन्थेषूद्धृतं वर्तते । वाथुलं च नयोत्तरमिति वाक. ख. पाठः । लस्य वाथुलस्य वा मातृका अपि समुपलभ्यन्ते । नयोत्तरमेतत् कम्बुजशिलालेखे स्मृतेषु चतुष्टयेष्वन्यतमदवगन्तव्यम् । एवं च निश्वासतत्त्वसंहिताया भागविशेषो नयोत्तरमिति बागचीमहोदयस्य कल्पनं व्यर्थम्, चतुष्षष्टितन्त्रेषु तस्य परिगणितत्वात् स्वतन्त्रस्यैव तस्य स्य सद्भावात् । तस्य स्वतन्त्रग्रन्थत्व एव ब्रह्मयामलजयद्रथयामलाद्युक्तं नयोत्तरस्य स्रोतस्कत्वम्, निःश्वासतत्त्वसंहितायाश्च मध्यमस्रोतउद्भूतत्वं संगच्छते । वाहनं वाहनोत्तर- त कुलचूडामणिस्थः पाठः ।

३७. हृद्भेदतन्त्रं नास्माभिः क्वाप्युद्धृतमवलोकितम् ।

३८. मातृभेदम् । मातृकाभेदतन्त्रमुपलभ्यते । ततो भिन्नमेतत्तन्त्रमभिन्नं वेति नाधुना तुं शक्यम् । लक्ष्मीधरगौरीकान्तभास्कररायग्रन्थेषु तन्त्रभेदमिति पाठः ।

३९. गुह्यतन्त्रम् । गुप्ततन्त्रं क्षेमराजेन नेत्रतन्त्रोद्योते स्मर्यते । ततोऽभिन्नमेतत्तन्त्रं ।

४०. कामिकं दशशैवागमेषु प्रथमं ग्रन्थाक्षरेषु मुद्रितमुपलभ्यते ।

४१. कलावादम् । कालपादमिति वाक.ख.पाठः । ग्रन्थ एष शिवदृष्टौ स्थलद्वये ११; ३।६३) मालिनीविजयवार्त्तिके (पृ. २०) च स्मर्यते । शिवदृष्टिवृत्तावुत्पलदेवेन कालोत्तरनाम्नाऽभ्यधायि (पृ. १०२, १२२) ।

४२. कलासारम् । कालसारमिति वाक.ख. पाठः । कालज्ञानं वातुलोपागमेषु दृश्यते ।

४३. कुब्जिकामतम् । श्रीमतनाम्नोद्धृतमेतत्तन्त्रमर्थरत्नावल्याम् । अस्य मातृकाः ातास्थ-एशियाटिक-सोसाइटीसंस्थायाम्, नेपालस्थवीरपुस्तकालये चोपलभ्यन्ते । कुण्डिका- ति लक्ष्मीधरगौरीकान्तधृतः पाठः । मतशास्त्रनाम्नाऽन्यत्रास्य विवरणमुपस्थापित- भिः ।

४४. मतोत्तरम् । तन्त्रमेतदर्थरत्नावल्यां बहुशः स्मर्यते । नयोत्तरमिति वाक. ख. नयोत्तरविषये पूर्वमेवोक्तम् । वाक. ख. ग्रन्थयोर्नयोत्तरस्य नाम वारद्वयं दृश्यते ।

चन्द्रशेखरशास्त्री-अभिनन्दनग्रन्थ, संस्कृतविभाग, पृ० १५

डीज इन दी तन्त्राज, पृ० ४-६

तन्त्रोत्तरमिति से. पाठः, मायोत्तरमिति कु. पाठः । मतोत्तरस्य मातृकाया विवरणं म० म० हरप्रसादशास्त्रिसंदब्धनेपालग्रन्थसूच्यां दृश्यते ।

४५. वीणाख्यम् । वीणाद्यमिति वाक. ख. पाठः । "वीणाद्यमिति वीणाशिखोत्तरम्" (पृ० १७) इति जयरथः । तन्त्रमेतत् श्रीकण्ठ्यां शिखाष्टकेषु प्रदर्शितम्, कम्बुजशिलालेखे च विनाशिखनाम्ना स्मृतम् । शिवागमभेदेषु द्वितीयस्य योगजस्योपागमेषु वीणाशिखोत्तरं पठ्यते ।

४६–४७. त्रोतलं त्रोतलोत्तरं च । त्रोतुलं त्रोतुलोत्तरमिति वाक. ख. पाठः । तोतुल- तन्त्रं क्षेमराजेन नेत्रतन्त्रोद्योते स्वच्छन्दोद्योते च समुद्धृतम् ।

४८. पञ्चामृतम् । तन्त्रमेतत् तन्त्रालोकविवेके जयरथेन स्मृतम् । (भा० ९, आ० १५, पृ० १४०) । अहल्याकामधेनुग्रन्थे पञ्चामृतमुद्धृतमिति 'आफ्रेल्ट'-बृहत्सूचीतो ज्ञायते ।

४९. रूपभेदम् । नास्य विषये किमपि ज्ञायते ।

५०. भूतोड्डामरम् । भूतडामरमिति ऋ.कु.गौ.पाठः । रथक्रान्ताविष्णुक्रान्ता- विभागयोरपि भूतडामरतन्त्रं दृश्यते । "भूतडामरमिति भूततन्त्रं डामरतन्त्रम्" (पृ० ४४) इति शिवानन्दः । ख.मातृकायां तु "भूतोड्डामरमिति भूतोड्डामरतन्त्रम्" इति पाठः । सटीकस्य भूतडामरस्य मातृकाणां विवरणमाफ्रेल्टबृहत्सूच्यां दृश्यते । तत्र मातृकाणां मूलद्वयमुपदर्शितम् । तन्त्रमेतद्भोटभाषायामप्यनूदितमुपलभ्यते ।

५१. कुलसारम् । तन्त्रमेतत् शिवसूत्रविमर्शिन्यां (पृ० १३५-३६) स्मर्यते ।

५२. कुलोड्डीशम् । राजेन्द्रलालमित्रसंदब्धायां सूच्यामस्या मातृकाया विवरणं दृश्यते । उड्डीशतन्त्रादेतत् पृथगपृथग् वेति परीक्षणीयम् ।

५३. कुलचूडामणिः शिवसूत्रविमर्शिन्यां (पृ० ५८) स्मृतः । अत्रत्यः श्लोको मुद्रिते कुलचूडामणितन्त्रे नोपलभ्यते । तन्त्रं विश्वात्मकमिति तु कु.पाठः ।

५४. सर्वज्ञानोत्तरम् । तन्त्रमेतत् तन्त्रालोक-तद्विवेक-शिवसूत्रविमर्शिनी-मृगेन्द्रवृत्ति-शत- रत्नसंग्रहादिषु बहुशः स्मर्यते । "ज्ञानोत्तरे इति सर्वज्ञानोत्तरे" (भा० ६, आ० ९, पृ० ४५) इति वदन् जयरथो ज्ञानोत्तरं सर्वज्ञानोत्तरं चाभिन्नमेव तन्त्रमङ्गीकुरुते । "सर्वज्ञानादितन्त्र- पञ्चकं कापालिकसिद्धान्तैकदेशिदिगम्बरमतमिति दूरत एव हेयम्" (पृ० १४०) इति वदन् लक्ष्मीधरस्तदनुयायी गौरीकान्तश्चानवलोक्यैव तन्त्राणीमानि यथेच्छमुच्छास्त्रं व्याख्यातवन्ताविति प्रतीयते । अत एवाह भास्कररायः—"एवं स्थिते यत्सौन्दर्यलहरीव्याख्याने केनचित् प्रलपितमिमानि तन्त्राण्यवैदिकानीत्यादि, तत्प्रतारकभ्रान्तान्यतरजल्पितत्वादुपेक्ष्यम्" (पृ० २४) इति । सर्वज्ञानोत्तरस्य मातृका म०म०हरप्रसादशास्त्रिसंदब्धायां नेपालसूच्यां विवृता । सर्वज्ञानोत्तरवृत्तिरघोरशिवाचार्यविरचिता आफ्रेल्टबृहत्सूचीतः परिज्ञायते । सर्वज्ञानात्मकमिति कु.पाठः ।

१. द्रष्टव्यम्—डा० प्रबोधचन्द्रबागचीविरचिते 'स्टडीज इन दी तन्त्राज' इत्याख्ये ग्रन्थे, पृ० १-२ ।

In Public domain. Digitization-Muthulakshmi Research Academy

५५. महापिचुमतम् । पिचुशास्त्रं तन्त्रालोके स्मर्यते स्थलचतुष्टयेषु (भा०१०, आ०२७,
३६३, ३६५; भा० ११, आ० २८, पृ० १६३; १७५) । तत्संबद्धमेवैतत्तन्त्रं स्यात् ।
कालीमतमिति से.ल.पाठः, महापितृमतमिति कु.पाठः ।

५६. महालक्ष्मीमतम् । मततन्त्रषट्कप्रतिपादकं "महालक्ष्मीमतम्" इत्यादिकं
क्तित्रयं लक्ष्मीधरायामृजुविमर्शिन्यां गौरीकान्तीये च न दृश्यते । जयरथविवरणे,
चूडामणौ, सेतुबन्धे च विद्यते । अस्या महालक्ष्मीमतभट्टारकनाम्नी मातृका नेपालसूच्यां
श्यते ।

५७. सिद्धयोगीश्वरीमतम् । त्रिकदर्शनेषु प्रथिततममेतत्तन्त्रं तन्त्रालोकादिषु बहुशः
र्यते । सिद्धयोगीश्वरतन्त्रं नेपालसूच्यां दृश्यते ।

५८–५९. कुरूपिकामतं रूपिकामतं च । द्वितीयस्य देवरूपिकामतमिति संज्ञेति
स्कररायः, "अत्र प्रथमं देवपदं संबुद्धिः । द्वितीयं तु तन्त्रसंज्ञान्तःप्रविष्टमिति सुवचम्"
० २३) इति हि तदुक्तिः । "डाकिनीरूपिकागणः", (४।५०) इत्यत्र रूपिका काचन
पठ्यते । तेन महालक्ष्मीमतकुब्जिकामतादिवद् रूपिकामतमित्येवोचितं नाम प्रतिभाति ।

६०. सर्ववीरमतम् । तन्त्रमेतद् ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यां (भा० ३, पृ० ३११)
तम् । तन्त्रालोक-तद्विवेक-शिवसूत्रविमर्शिनी-स्वच्छन्दोद्योत-नेत्रतन्त्रोद्योत-प्रत्यभिज्ञाहृदय-
ार्थमञ्जरीपरिमलादिषु स्मृतः सर्ववीरः सर्ववीरभट्टारको वा तन्त्रादस्माद्भिन्न एव स्यात् ।

६१. विमलामतम् । न ज्ञायते किमपि ।

६२. अरुणेशम् । तथैव ।

६३. मोदनेशम् । मोहिनीशमिति से., मोदिनीशमिति ल. ऋ., मोहनेशमिति कु०
ठः । इतोऽधिकं न ज्ञायते किमपि ।

६४. विशुद्धेश्वरम् । तन्त्रमेतद् भास्कररायेण योगिनीहृदयसेतुबन्धे (पृ० २७४)
उद्धृतम् । तन्त्रसार-शाक्तानन्दतरङ्गिणी-आगमतत्त्वविलासादिष्वप्येतत् स्मर्यते । "विशुद्धेश्वर-
त्रान्तश्च चतुष्षष्टितन्त्रोद्देशः" (ऋजु. पृ. ४४) इति शिवानन्दः ।

चतुष्षष्टितन्त्रपरिगणनप्रकरणे—

पूर्वपश्चिमदक्षं च उत्तरं च निरुत्तरम् ।
तन्त्रं वैशेषिकं ज्ञानं वीरावलि तथा परम् ॥

इत्येष श्लोकः पाठभेदैः सह ल.ऋ.से.कु.पुस्तकेषु दृश्यते । वामकेश्वरीमत-
वरणे प्राचीनायां वड़ोदामातृकायां चैष नास्ति । प्रक्षिप्तस्यास्य श्लोकस्य समावेशेनैव लक्ष्मीधरो
तन्त्रषट्कप्रतिपादकं सार्धकं श्लोकं परित्यजति, भास्कररायश्च भैरवाष्टकप्रतिपादकमेकं
त्रमित्युच्छास्त्रं वदति । "विमलं विमलोत्थं च देवीमतमतः परम्" इत्युत्तरार्धपाठो लक्ष्मी-

---

ऋजुविमर्शिन्याः क.मातृकायामिमे चतुष्षष्टितन्त्रपरिगणनात्मकाः श्लोकाः सन्ति,
अर्थरत्नावल्यां तु न तथा । कानिचन पदान्येव च तत्र व्याख्यातानि ।

धरायाम् । "पूर्वादिदेवीपर्यन्तं दिगम्बरैकदेशक्षपणकमतमिति तत्ततोऽपि दूरत एव हेयम्"
(पृ० १४०) इति लक्ष्मीधरः । "पूर्वाम्नायादिसंज्ञाभिः प्रसिद्धाश्चत्वार आम्नायाः । निरुत्तर-
पदेनोर्ध्वाम्नायतन्त्रम् । तस्यानुत्तराम्नायपदेनापि व्यवहारः । तन्त्रं वैशेषिकमित्येकम् । ज्ञानमिति
ज्ञानार्णवपदेन प्रसिद्धम् । वीरावलीत्येकम् ।" (पृ० २३–२४) इति भास्कररायः । अत्र
शिवस्य पञ्चवक्त्रेभ्यो निःसृतानां शास्त्रसमूहात्मकानामाम्नायानां तत्तत्तन्त्रपरकतया संकोचो
भास्कररायेण निष्प्रमाणकमेवाचरितः । ज्ञानार्णवविषये पूर्वमेवोक्तम् । वीरावलीशास्त्रं प्राचीनं
तन्त्रालोक-तद्विवेक-शिवसूत्रविमर्शिन्यादिषूद्धृतम् । वीरावलीहृदयं वीरावलीकुलं वा तस्य
नामान्तरम् । कुलचूडामणौ तु शिवावलिमिति पाठः ।

एवं व्याख्यातानि चतुष्षष्टितन्त्रनामानि । अथाधुना शिवानन्दविद्यानन्दामृतानन्दस्मृतान्
ग्रन्थान् ग्रन्थकारांश्चाधिकृत्य विविच्यते त्रिपुरादर्शनसंबद्धसाहित्यपरिचयाय ।

शिवानन्दादिस्मृता ग्रन्था ग्रन्थकाराश्च

अनन्तशक्तिभट्टारकः

यत्प्रोतं विश्वमेतद्भुवनविरचनात्तत्त्ववर्णाद्यमुद्य-
न्मन्त्रस्फारानुषक्तं व्रतनपदकलाद्वैतरूपं विभाति ।
तद्दीपं शक्तिसूत्रं परमशिवमहापूगदेदीप्यमानं
वन्दे पूजाक्रमस्य प्रचुरफलविधौ हेतुभूतं हृत्स्थम् ॥

अर्थरत्नावलीकारविद्यानन्दविरचितायां ज्ञानदीपविमर्शिन्यामनन्तशक्तिभट्टारककृति-
त्वेनैष श्लोकः समुद्धृतः । वातूलनाथसूत्राणां वृत्तिकारोऽनन्तशक्तिपादोऽस्माद्भिन्नोऽभिन्नो वेति
साम्प्रतं निश्चयेन वक्तुं न शक्येत । अनन्तशक्तिपादो बहुरूपगर्भस्तोत्रस्यापि व्याख्याकार इति
वातूलनाथसूत्राणां भूमिकातोऽवगम्यते । अस्या मातृका लक्ष्मणपुर(लखनऊ)स्थितसंस्कृत-
परिषत्पुस्तकालये वर्तते ।

आज्ञावतारः

स्वेच्छयैव जगत्सर्वं निगिरत्युद्गिरत्यपि ।

इत्येष श्लोकार्धं आज्ञावतारस्थश्चतुर्वारं (पृ० १५, ९४, २६४, ३०७) योगिनीहृदयदीपिकाया-
मुद्धृतः । सेतुबन्धेऽप्येष दृश्यते (पृ० २६७) । एवमेव—

विश्वग्रसनशीलं तद्रूपं तेजोमयं ततः ।

इत्ययमपरः श्लोकार्धस्तत्रत्यो योगिनीहृदयदीपिकायामेव (पृ० २६३) किञ्चिद्व्यत्यस्तरूपेण
दृश्यते । संशोधितः पाठोऽत्र स्थापितः ।

---

१. बड़ोदानगरस्थगायकवाड़शोधसंस्थानमातृका १९६१ संख्याका, प. ३८ क ।

In Public domain. Digitization-Muthulakshmi Research Academy

ाथवर्णत्रिशिका

एष ग्रन्थो ज्ञानदीपविमर्शिन्यां स्मृतः समुद्धृतश्च । तद्यथा—"आथर्वणत्रिशिकाया-
ाथर्वणस्यैव वाग्भवत्वमुक्तम्—

अबिन्दुं सविसर्गं च अका(रो? रं) जपतो महान् ।
उदेति देवि सहसा ज्ञानौघः पारमेश्वरः ॥" इति ।

त्तरषट्कम् (उत्तरपदम्)

उत्तरषट्कस्य श्लोका अर्थरत्नावल्यां नामोद्देशपूर्वकम्, ऋजुविमर्शिन्यां च विनैव नाम-र्देशमुद्धृता दृश्यन्ते । अत्रत्य एव—

व्योमाम्बुजे सहस्रारे सितकेसरसंकुले ।
तत्रासीनं महादेवमपृच्छत् कुलनायिका ॥

त्याद्यः श्लोक उत्तरपदग्रन्थस्येति योगिनीहृदयदीपिका । अतोऽनुमीयते उत्तरषट्कग्रन्थ त्तरपदनाम्नापि प्रथितो भवेत् । अथवा पाठव्यत्यासमात्रमेवात्र स्यात् । उत्तरषट्कमेतद्बहुषु न्त्रग्रन्थेषूद्धृतं कुलदीपिकाव्याख्यानयुतं मद्रपुरीराजकीयपुस्तकालये केरलविश्वविद्यालय-स्तकालये चोपलभ्यते । तद्दर्शनेन ज्ञायते ग्रन्थ एष रुद्रयामलस्यैवांशभूत इति, त्रिपुरा-द्धान्तश्चात्र प्रतिपादित इति ।

दयाकरपद्धतिः

उदयाकरपद्धतिस्था बहवः श्लोका ज्ञानदीपविमर्शिन्यां दृश्यन्ते । तद्दर्शनेन ज्ञायते यदेष शिष्टस्त्रिपुरीपासनापद्धतिग्रन्थो विमर्शिनीवद् बाह्याभ्यन्तरोभयविधपूजादिप्रदर्शक इति । कस्तूरीघुसृणेन्दुचन्दनसुधाभिश्चक्रराजं लिखेत्" इत्येष योगिनीहृदयदीपिकायां (पृ० २५१) मुद्धृतः श्लोकांशोऽत्रत्य एवेति विमर्शिनीदर्शनेन ज्ञायते ।

द्वारोर्ध्वतन्त्रम्

एतत्तन्त्रं योगिनीहृदयदीपिकायां (पृ० २८) स्मर्यते । तद्यथा—"तदुक्तमुद्धारोर्ध्वतन्त्रे ाशक्तिबीजोद्धारे—चन्द्रः शक्तिर्महाशक्तिर्ब्रह्माणी कामिकादिकम्" इति ।

मत्तभैरवः

ऋजुविमर्शिन्या ग.मातृकायामस्य वचनद्वयं समुपलभ्यते । तद्यथा—
"उक्तं च श्रीमदुन्मत्तभैरवेण—

सर्वनामानि नित्यायाः सत्यानन्दघनात्मनः ।
एकात्मनो लक्षकाणि लक्ष्या सा साक्षिणी चितिः ॥" (पृ० १९९)

"श्रीमदुन्मत्तभैरवगुरुणापि—

सुरुचं गीडारामु च महिमोचितजनिजरापरुजमस्यै ।
वद संसिद्ध्यै बुद्ध्यै वाचं याचामहे महेशस्य ॥" (पृ० २१६)

तत्रैव, प. २१ क । २. तत्रैव, पं. १३ ख ।

उपचारोपनिषद्

एषोपनिषद् योगिनीहृदयदीपिकायां समुद्धृतैवम्—
"बहिरपि गन्धपुष्पधूपदीपनैवेद्यानि पृथिव्याकाशवायुतेजःसलिलभावनया देव्यै समर्पयेत्" (पृ० २७२) इति ।

मुद्रितासु मातृकासूचीषूपनिषत्संग्रहेषु च क्वाप्यस्या नाम नोपलभ्यते । ऋजुविमर्शिन्यां पूजा-धूप-गन्ध-दीप-नैवेद्य-ध्यान-होमादिप्रतिपादकाः श्लोकाः पूजोपनिषत् (पृ० ८९), धूपगन्धदीपनैवेद्योपनिषत् (पृ० १३४), ध्यानोपनिषत् (पृ० १४८), होमोपनिषत् (पृ० २७०) इत्येवं स्मृताः । पूजादिरहस्यमिति तत्तदर्थोऽभिमन्तव्यः । तथैवात्रापि दीपिकायामुपचारोपनिषत्पदेनोपचाररहस्यमेव बोधितं स्यात् । नह्यत्रोपचारोपनिषत्पदं कस्यचनोपनिषद्ग्रन्थस्य बोधकमिति वयं संभावयामः ।

क्रमोदयः

प्रविष्टेऽन्तः सिन्धुरसे भेदनिर्हरणात्मके ।
स्थैर्यमेति चमत्कारो विना विषयसङ्गतिम् ॥

इत्येष क्रमोदयश्लोको योगिनीहृदयदीपिकायां (पृ० २६६) दृश्यते । अस्योत्तरार्धस्तत्रैव २८३ पृष्ठे सेतुबन्धे च (पृ० २८६) उद्धृतः । महार्थमञ्जरीपरिमले—

रागो माया कलाऽविद्या नियतिः काल एव च ।
पञ्चवृत्त्याश्रयाः सर्वे पाशाश्चेति प्रकीर्तिताः ॥ (पृ० ५०) इति,
स्त्रियः सर्वेषु वर्णेषु योगिन्यः स्युर्न संशयः ।
देहवद् योनिशुद्धिस्तु आत्मवल्लिङ्गशोधनम् ॥
योनौ नवाक्षरीं न्यस्य लिङ्गे सप्तदशाक्षरीम् ।
गुरुचक्रस्य पूजार्थं कुर्याद् योगिनिमेलनम् ॥
नवाक्षर्या तु मन्त्रेण स्थापयेल्लिङ्गपीठवत् ।
शिवशक्त्यात्मभावेन पुरुषो मन्थकः स्मृतः ॥
मन्थयेदात्मनः शक्तिं मधुवच्छुक्लशोणितम् । (पृ० ८९)

इति च क्रमोदयश्लोका दृश्यन्ते । अत्रत्यः 'प्रविष्टेऽन्तः' इत्यादिकः प्रथमः श्लोको महानयप्रकाशे त्रिवेन्द्रंसंस्कृतग्रन्थमालायां मुद्रिते (९।४३) वर्तते । तत्र 'सिन्धुरसे' इत्यस्य स्थाने 'सीधुरसे' इत्युचितः पाठः । अन्ये श्लोकास्तु तत्र न सन्ति, अतो महानयप्रकाशतो भिन्न एवैष ग्रन्थ इति प्रतीमः ।

क्षेमराजः

प्रत्यभिज्ञाहृदयादिग्रन्थप्रणेताऽभिनवगुप्तपादप्रियशिष्यो नानागमादिव्याख्याता न क्षेमराज ऋजुविमर्शिन्यामेवं स्मृतः—"अस्यार्थः साम्बपञ्चाशिकाविवृतिरचने श्रीक्षेमराजानार्यकृते

In Public domain. Digitization Muthulakshmi Research Academy

ष्टव्यः" (पृ० २२९) इति। बहूक्तमस्य विषये डा० कान्तिचन्द्रपाण्डेयप्रभृतिभिरिति नात्र क्तव्यमवशिष्यते। एतावानेव विशेषो यदनेन ज्ञायते शिवानन्दः क्षेमराजपराग्भव इति।

ङ्गाधरमिश्रः

अस्य श्लोका ऋजुविमर्शिन्याम्, योगिनीहृदयदीपिकायाम्, चिद्वल्ल्यां च दृश्यन्ते। इति भट्टगङ्गाधरस्तोत्रे धूप(गन्ध)दीपनैवेद्योपनिषद्" (पृ० १३४) इत्यृजुविमर्शिनी-माण्यादनेन कश्चन स्तोत्रग्रन्थो रचित इति ज्ञायते। इमेऽत्र तत्रत्याः श्लोकाः—

अपूर्णम्मन्यता व्याधिः कार्पण्यैकनिदानभूः।
क्लेशावहो जुगुप्सश्च सर्वधर्मबहिष्कृतः॥
आनन्दकणभिक्षार्थं शब्दस्पर्शादिपक्वणे।
अटत्यविरतं येन तद्दारिद्र्यं विदुर्बुधाः॥
(ऋ० पृ० ६९)

आत्मेशजगतां भेदं यो नरः कुरुतेऽमतिः।
स महापातकी सत्यं पातकस्य महत्त्वतः॥
(ऋ० पृ० ८०)

देहप्रमातृताशान्तिर्येन सिद्ध्यति तं भजे।
विश्वेन्धनं निजं धूपं ज्ञानपावकसम्भवम्॥
संविन्मार्गगतो योऽयं प्रयत्नस्त्वात्मसंश्रयः।
तमेव संश्रये गन्धमानन्दोदयकारणम्॥
यस्मिन् सर्वमिदं भाति यः सर्वत्रावभासते।
कल्पयामि प्रकाशं तं दीपं पूजाविधौ निजे॥
विश्वं शिवादिभूम्यन्तं चमत्काररसाश्रयम्।
महीयसे महाभोक्त्रे महेशाय निवेदये॥
(ऋ० पृ० १३४)

अत्रत्याः प्रथमद्वितीयान्तिमाः श्लोका योगिनीहृदयदीपिकायामभियुक्तवचनत्वेन ाधश्च चिद्वल्ल्यां (पृ० ६०) विनैव नामनिर्देशमुद्धृताः।

ानिष्यन्दः

"तदुक्तं क्षेमेन्द्रेण गीतानिष्यन्दे" (पृ. ७८) इत्यृजुविमर्शिनीप्रामाण्येन गीतानिष्यन्दः द्रकृतिरिति विज्ञायते। अत्रत्याः श्लोका ऋजुविमर्शिन्याम् (पृ० ७८, १५१), महार्थ-रीपरिमले (पृ० ११२, १२२), चिद्वल्ल्यां च कामकलाविलासटीकायां (पृ० १७) ते। सोऽयं क्षेमेन्द्र औचित्यं काव्यजीवातुरिति सिद्धान्तस्य प्रतिष्ठापयितुः क्षेमेन्द्राद्भिन्नोऽ-वेति विचारणीयम्। इमे चोपलभ्यमानास्तत्रत्याः श्लोकाः—

तावद् व्याघ्रभयं नृपानलभयं वेतालकृत्याभयं
शून्यारण्यभयं महाशनिभयं दुःस्वप्नशङ्काभयम्।
वातोत्पातभयं ग्रहज्वरभयं क्षुद्बाधिवेलाभयं
वैराग्येण न यावदेव गलितः कायाभिमानभ्रमः॥
उत्सृज्यात्मसमाधानं ये ध्यायन्त्यन्यदेवताः।
भिक्षन्ते भूरिवित्तास्ते भिक्षित्वापि बुभुक्षिताः॥
न पादपतनं भक्तिर्व्यापिनः परमात्मनः[1]।
भक्तिर्भावस्वभावानां तदेकीभावभावनम्॥

अन्तिमः श्लोको विज्ञानभैरवोद्योतेऽपि दृश्यते। तत्र कर्तुर्नाम नोट्टङ्कितम्।

चिद्गगनचन्द्रिका

कालिदासकृतित्वेन प्रसिद्धा चिद्गगनचन्द्रिका साम्प्रतं मुद्रितोपलभ्यते। स एष ग्रन्थो महार्थमञ्जरीपरिमले योगिनीहृदयदीपिकायां च नैकश उद्धृतः, ऋजुविमर्शिन्यामर्थरत्नावल्यां ज्ञानदीपविमर्शिन्यां च कुत्रापि न स्मृतः, नतरां चाभिनवगुप्तक्षेमराजादिग्रन्थेषु। लक्ष्मीधरादि-प्रामाण्येन पञ्चस्तवीकर्ता कालिदास इत्यङ्गीकरणीयम्। स एष कालिदासो लघुस्तुतिकर्ता धर्माचार्य एवेति संभावितमस्माभिः[2]। चिद्गगनचन्द्रिकाकारः कालिदासः क इत्यपि प्रश्नः परीक्षणीयताकोटिमेव साम्प्रतमाटीकते। एष ग्रन्थो महार्थसम्प्रदायस्येति नात्र विसंवादः।

ज्ञानदीपविमर्शिनी

ज्ञानदीपविमर्शिनी योगिनीहृदयदीपिकायां (पृ० १६०) समुद्धृता। अस्या मातृका गायकवाडप्राच्यशोधसंस्थायां केरलविश्वविद्यालयग्रन्थागारे नेपालस्थवीरपुस्तकालये च सन्ति। अस्य प्रणेतार्थरत्नावलीकारो विद्यानन्द एव। अत्र स्थलत्रये[3]ऽर्थरत्नावलीसमुद्धरणादस्या-स्तदपेक्षया परवर्तित्वमवसीयते।

ज्ञानसारः

ज्ञानसारश्लोका अर्थरत्नावल्यां (पृ० १८३) दृश्यन्ते। इमे श्लोका ऋजुविमर्शिन्यामपि (पृ० १८५) सन्ति। तत्र ग्रन्थनामनिर्देशो नास्ति। अर्थरत्नावल्या मद्रासमातृकास्वेव तन्निर्देशो दृश्यते। वाराणसीस्थे सरस्वतीभवनग्रन्थागारे वर्तते ज्ञानसारमातृका। तत्र नोपलब्धा इमे श्लोकाः।

---

१. 'परमेशितुः' इति विज्ञानभैरवोद्योते पाठः।

२. द्रष्टव्यम्—सारस्वती सुषमा, व० २०, अ० २, पृ० १३–२६।

३. द्रष्टव्यम्—प. २८ क, ४३ ख, ५६ क।

In Public domain. Digitization: Muthulakshmi Research Academy

त्रविमर्शिनी

"इन्द्रेशानदिशोर्मध्ये स्थानमन्यत्प्रकीर्तितम् ।
नैर्ऋताम्बुदिशोर्मध्ये स्थानमन्यत्प्रकीर्तितम् ॥

त्रविमर्शिन्यामस्मद्गुरूक्तरीत्या" इति दृश्यते योगिनीहृदयदीपिकायाम् (पृ० २३५) । 'अस्मद्-
क्त' इत्यस्य स्थाने 'अस्मदुक्त' इति पाठ उपलभ्यतेऽन्यासु मातृकासु । एवमेव—

चिदम्बुधिमहाभङ्गभिन्नसंकोचसुन्दरः (पृ० १९६) ।
यद्यद् बाह्यं वक्ष्यमाणं तत्तदान्तरमाचरेत् (पृ० २४५) ।
कादिठान्तं चादिठान्तं वर्णजातं क्रमोऽक्रमात् ।
द्वयं द्वयं प्रयोक्तव्यं कलाश्च तदनन्तरम् ॥ (पृ० २५५)
कामो[1] देवः स काम्यत्वात् (पृ० २६३) ।
श्वासद्वयनिरोधेन कुण्डलीत्रयमेलनात् ।
यज्जीवशिवयोरैक्यं तेनासावान्तरो बलिः ॥ (पृ० ३३९)

तिपूद्धरणेष्वपि तथैव ।

चिद्वल्ल्याममृतानन्दयोगिन इमे श्लोका उद्धृताः—

बैन्दवे[2] परमाकाशे सच्चिदानन्दलक्षणे ।
निष्प्रपञ्चे निराभासे निर्विकल्पे निरामये ॥
अनुत्तरचमत्कारपरामर्शपवित्रिते ।
निरुत्तरमहाशून्ये शून्यशून्यान्तवर्जिते ॥
स्त्रीपुंनपुंसकाख्याभिः कल्पनाभिरकल्पिते ।
आदिमध्यान्तनिर्मुक्ते भावपञ्चकभासिते ।
सर्वोपमानरहिते प्रकाशानुभवात्मिके ॥ (पृ० २४-२५) ।
रश्मिचक्रं च परितो भक्तिनम्रः प्रपूजयेत् । (पृ० ५४-५५) ।

अमृतानन्दविरचितस्य तत्त्वविमर्शिनीग्रन्थस्य मातृका केरलविश्वविद्यालयग्रन्थालये
ते । सर्वाणीमान्युद्धरणानि तत्रत्यान्येव स्युरिति वयं संभावयामः । यतो हि दीपिकायाम्
० १०६)—"कायति नानानामप्रपञ्चरूपेण मातृका देवी" (१।६) इति सौभाग्यसुधो-
द्धरणावसरे 'अस्मदुक्त' इति पाठस्यैवौचित्यम्, न तु 'अस्मद्गुरूक्त' इत्यस्य । यदीमान्युद्ध-
नि तत्रोपलभ्यन्ते, तदैतन्निश्चयेन वक्तुं शक्येत यद् दीपिकायां सर्वत्र 'अस्मद्गुरूक्त' इत्यस्य
'अस्मदुक्त' इत्येव पाठ उचित इति । तदैव च तत्त्वविमर्शिनीचिद्विलासस्तवयो-
ानन्दकृतित्वं निर्विचिकित्सं सिद्ध्येत ।

---

[1] "कामो देवः प्रकाम्यमानत्वात्" (४।३) इति सौभाग्यसुधोदयस्थः पाठः । एतेनापि 'अस्मदुक्त' इति पाठस्यैवौचित्यं प्रतीयते ।

[2] "बैन्दवे" इत्यादिकः श्लोकः ६८ पृष्ठेऽपि वर्तते चिद्वल्ल्यामेव ।

तन्त्रसद्भावः

तुलामेलकयोगः श्रीतन्त्रसद्भावशासने ।
य उक्तः शम्भुनाथेन स मया दर्शितः क्रमात् ॥ (३०।२१४)

इति तन्त्रालोकप्रामाण्यात्तन्त्रसद्भावशासनं शम्भुनाथकृतिरिति डा० कान्तिचन्द्रपाण्डेय-महोदयाः प्रतिपादयन्ति । शिवसूत्रविमर्शिन्यामृजुविमर्शिन्यां चिद्वल्ल्यां च तत्रत्या बहवः श्लोका दृश्यन्ते । तेषां दर्शनेन ज्ञायते भगवता शङ्करेण भगवत्यै उमायै शास्त्रमेतदुपदिष्टमिति । चिद्वल्ल्यां (पृ० ३५) स्पष्टमस्यागमशास्त्रत्वमङ्गीकृतम् । शम्भुनाथोऽभिनवगुप्तस्य साक्षात् कौलिकदीक्षागुरुरिति तन्त्रालोकादिषु तत्र तत्र स्पष्टमेव[1] । तदत्र विशये एवं समाधातुं शक्यते—अद्वैतवादिष्वागमदर्शनेषु साधकस्य शिवाद्याराध्याभिन्नत्वं सत्सहधर्मिण्याः साधिकायाश्च देव्य-भिन्नत्वमावेशदशायामङ्गीक्रियते । अस्यां दशायामवतीर्णानां शास्त्राणामागमत्वव्यपदेशोऽकारि साधकैः । तन्त्रसद्भावक्रमसद्भावादीनि शासनान्येवमेवाविर्भूतानि स्युः । अस्मिन् प्रसङ्गे श्रीमतां चिन्ताहरणचक्रवर्तिमहोदयानां ग्रन्थो[2] विशेषजिज्ञासुभिरवश्यं द्रष्टव्यः ।

तन्त्रालोकः

ऋजुविमर्शिन्यां त्रिकशास्त्र-त्रिकसारशास्त्र-त्रिशिकाशासन-षडध्वसारशास्त्रवचनत्वेनो-द्धृताः प्रायः सर्वे श्लोकास्तन्त्रालोके समुपलभ्यन्ते, अतो नेमानि ग्रन्थान्तराणि । सर्वत्र ग्रन्थकारेण तन्त्रालोक एव तत्तन्नाम्ना स्मृतः । तन्त्रालोकश्चाभिनवगुप्तपादस्य कृतित्वेन प्रथिततम एव ।

तिमिरोद्घाटः

करन्ध्रचितिमध्यस्था ब्रह्मपाशावलम्बिकाः ।
पीठेश्वर्यो महाघोरा मोहयन्ति मुहुर्मुहुः ॥

इत्येष तिमिरोद्घाटश्लोकः शिवसूत्रविमर्शिन्यां स्थलद्वये (पृ० १७, १०२), ऋजुविमर्शिन्यां (पृ० २८) च दृश्यते ।

यः प्रियो यः सुहृद्बन्धुर्यो दाता योऽतिवल्लभः ।
तदङ्गभक्षणाद् देवि ह्युत्पतेद् गगनाङ्गना ॥

इति शिवसूत्रविमर्शिन्यां (पृ० ६८) दृष्टेऽस्यैव ग्रन्थस्य वचने स्थितेन 'देवि' इति संबोधन-पदेनास्यागमकोटौ समावेशो भवति ।

त्रिपुरसुन्दरीकल्पलता

"त्रिपुरसुन्दरीकल्पलतायामभियुक्तोक्तिः—
प्राणो देवीसखाद्यो दशशतनयनः शम्भुरग्निस्त्रिमूर्तिः
शून्यश्चन्द्रार्धनादः शिखिरुचिरुचिरो वाग्भवोऽस्यावकीलः ।"

---

१. द्रष्टव्यम्—अभिनवगुप्त, पृ० ५८३ (द्वितीयं संस्करणम्) ।

२. "तन्त्राज् : स्टडीज् ऑन देयर रिलीजन एण्ड लिटरेचर" इत्याख्यस्य ग्रन्थस्य "आथरशिप ऑफ द तन्त्राज्" इति शीर्षकस्तृतीयोऽध्यायः, पृ० १९-२८ ।

In Public domain. Digitization: Muthulakshmi Research Academy

र्विमर्शिन्यामेतद् दृश्यते (पृ.१११)। अर्थरत्नावल्यां तु—"तत्र सन्ध्यावन्दन-मण्डलार्घशुद्धिपर्यन्तं श्रीमहात्रिपुरसुन्दरीकल्पलतायामुक्तप्रकारेण द्रष्टव्यम्" (पृ. ११५) इति न कश्चन भेदोऽवलोक्यते। ज्ञानदीपविमर्शिन्यां विनैव नामनिर्देशमिमे श्लोका दृश्यन्ते—

प्राणो देवीसखाद्यो दशशतनयनः शम्भुरग्निस्त्रिमूर्तिः
शून्यश्चन्द्रार्धनादोऽहिमरुचिरुचिरो वाग्भवोऽसावकीलः।
सोऽयं ध्यानाज्जपाद्वा मुखकुहरलसद्गद्यपद्यप्रबन्धं
छन्दोऽलङ्कारतर्कागमविशदमतिर्वाक्पतिर्जायते च॥
त्रिस्थाने जननस्थितिक्षयतया यच्छैवबीजत्रयं
सृष्ट्यः स्पष्टमयोऽपि शक्तिमदनाच्चैन्द्रं तु बीजं स्थितेः।
संहारस्य तथाऽनलस्तदनु खं चन्द्रस्त्रिमूर्तिध्वनी
रक्तं ध्यायति कामराजकमिदं यस्तस्य वश्यं जगत्॥
सोमः कामश्च शक्रः पशुपतिरनलो वैष्णवी पूर्णचन्द्रो
नादः शक्त्याख्यबीजं तदिदमनिलसत्कीरकुन्देन्दुगौरम्।
यो ध्यायेद्धयेतदन्तर्भवति हि निखिला खेचरी दिव्यसिद्धि-
र्देव्या लोकैकमात्रा उपशमति च विषं याति कैवल्यतां सः॥

च श्लोकास्त्रिपुरसुन्दरीकल्पलताया एवेति ऋजुविमर्शिनीदर्शनादुन्नीयते।

चक्रं बैन्दवमम्बिकामयमिदं वामा त्रयो ये भ्रमा
ज्येष्ठेयं यदिदं पुरन्दरपुरे रेखाचतुष्कं बहिः।
योऽयं शक्त्यनलत्रिकोणनिवहो रौद्रीयमित्यामृशन्
योऽर्चाधारमकृत्रिमं कलयते मातः स ते पूजकः॥

प श्लोकोऽर्थरत्नावल्यां (पृ. ८३) वामकेश्वरीमतविवरणे (पृ. २९) च,

आ श्रीदीपकनाथतो ह्यगणितैरद्यापि वृत्तिः कृता
यस्याऽन्यैश्च करिष्यते गुरुवरैः स्वस्वाशयौचित्यतः।
देवि त्वच्चरणाब्जरेणुशरणः कामस्थमित्यादिक-
श्लोकस्यार्धयुतस्य तस्य सुकृती कोऽप्यर्थवित्तत्त्वतः॥

यं श्लोको वामकेश्वरीमतविवरणे (पृ. ११५),

पिण्डो वाचकविस्तरस्य महतः संस्कारशेषस्थिति-
र्नादोऽसौ तव देवि मूर्ध्नि समनासीमानमुल्लङ्घयन्।
घण्टाक्वाण इव क्रमेण विरमन्नन्यामणीयस्तरी-
माजिघ्रन् परचिद्दशामनुभवन् मूर्तिं पुराणीं मम॥ (पृ.१३१,३१५-१६)

द्रष्टव्यम्—प. २० ख।

विश्वक्षिप्तपदप्रमेयसुभगां ब्राह्मीं महावाग्भवे
विश्वोत्तीर्णमहाप्रकाशवपुषं शक्तिं च नैसर्गिकीम्।
प्रामाण्यप्रवणत्रिशक्तिखचितां मध्ये तु चातुर्दशीं
संचिन्त्याम्ब समिन्धयन्नुभयतो मथ्नामि तन्त्रारणिम्॥ (पृ. २६४-६५)

इतीमौ च श्लोकौ योगिनीहृदयदीपिकायां दृश्येते। कस्यचनैकस्यैव स्तवस्येमे श्लोकाः स्युरिति संभाव्यते।

त्रिपुरार्णवः

कामं प्राणं प्रकुर्वीत मन्मथं कारयेत्तनुम्।
कन्दर्पं मन्दिरं कृत्वा द्विधाभूतं च पार्वति॥
मकरध्वजं न्यसेद्देवि षट्स्थानेष्वस्य सुव्रते।
मोहनाभ्यन्तरे कृत्वाऽऽवेष्टयेत्तस्य मायया॥

अर्थरत्नावल्यां (पृ. २४१) श्लोकावेतौ त्रिपुरार्णवस्येति प्रदर्शितम्। नित्याषोडशिकार्णव-सेतुबन्धे (पृ. १५०) तन्त्रान्तरवचनत्वेनोद्धृताविमौ श्लोकौ। अनयोरर्थस्तत्रैवावलोकनीयः। त्रिपुरासम्प्रदायस्य प्राचीन एष आगमग्रन्थः प्रतीयते। नानाग्रन्थेषु बाहुल्येनोद्धृतान्यस्य वचनानि।

देवीसंस्थानम्

एष ग्रन्थो ज्ञानदीपविमर्शिन्यामेवमुद्धृतः—
"तदुक्तं देवीसंस्थाननाम्न्यागमे—

आत्मा त्वादित्यहंसोऽयं पक्षौ चास्य सितासितौ।
तदन्तर्वर्तते राहुस्तत्र सन्ध्ये गमागमे॥
कृष्णे संक्रमते नाडी शुक्ले निष्कलवाहिनी।
एतत्पक्षद्वयं वाहे प्राणाचार्यस्तु चन्द्रमाः॥ इति।

नवशतीशास्त्रम्

अस्य ग्रन्थस्य—

अनन्तं परमं ज्योतिः सर्वप्राणिहृदि स्थितम्।

श्लोकार्धमात्रमेतद् योगिनीहृदयदीपिकायां (पृ. ६३) समुद्धृतं दृश्यते। 'अनन्तम्' इत्यस्य स्थाने 'अनच्कम्' इति पाठान्तरं मातृकासु कासुचित्। चतुश्शतीशास्त्रं यथा चतुश्शत-श्लोकानां समाहारस्तथैव शास्त्रमेतन्नवशतश्लोकमयं स्यात्। "अनच्कं यत्परं ज्योतिः सर्वप्राणिहृदि स्थितम्" इत्यादिकः सार्धद्वयश्लोकः सिद्धनाथपादकृतेः कुलरत्नशास्त्रस्येत्यर्थरत्नावलीतो

---

१. द्रष्टव्यम्—प. ८ क।

In Public domain. Digitization-Muthulakshmi Research Academy

[. २०५) ज्ञायते । किमेतत् कुलरत्नशास्त्रमेव नवशतीशास्त्रम् ? तन्त्रालोकादिषूद्धृता]रत्नमाला रत्नमाला वाऽभिन्नो ग्रन्थ इति तत्रोद्धृतवचनानां पर्यालोचनेन ज्ञायते । परमार्थ-]स्य योगराजकृतायां टीकायां (पृ. १६३) कुलरत्नमालिका साहस्रिकेतिविशेषणेन संयो-]ता । तेन् सहस्रश्लोकात्मकोऽयं ग्रन्थ इत्यायाति । कुलरत्नशास्त्रं कुलरत्नमाला चोद्धरणेभ्यः]लमतप्रतिपादको ग्रन्थ इत्यध्यवसीयते । सर्वाणीमानि वचनानि तन्त्रालोकार्थरत्नावल्यादिषूप-]धान्येकस्यैव ग्रन्थस्य सिद्धनाथपादकृतेः स्युरिति वयं संभावयामः । नवशतीशास्त्रस्य]स्रश्लोकात्मकता सेतुवन्धप्रदर्शित(पृ.१७६) रीत्या समाधेया । कुलरत्नमालायामुपलभ्य-]नानि देवीत्यादीनि संवोधनपदानि तन्त्रसद्भावपरिचये प्रदर्शितरीत्या समाधेयानि ।

]गभट्टः

त्रिपुरासारसमुच्चयकारो नागभट्टः सुप्रसिद्धस्तन्त्रवाङ्मये योगशास्त्रग्रन्थेषु च ।]जुविमर्शिन्यां (पृ. ११९) भट्टनागनाम्नाऽयमुद्धृतः । अन्यान्यपि द्वित्रवचनानि विनैव]मनिर्देशमत्रोट्टङ्कितानि । ग्रन्थोऽयं सवृत्तिकः प्रकाशितः कलिकातानगरीतः । योगशास्त्रग्रन्थे-]प्यस्योल्लेखः किमपि वैशिष्ट्यमस्य प्रख्यापयति । सरस्वतीभवनस्थसटीकलघुस्तवमातृकायां[1]]पुरासारसमुच्चयः कविहस्तमल्लोक्त इति समुदटङ्कि ।

]हस्तभट्टारकः

एष ग्रन्थो ज्ञानदीपविमर्शिन्यामुद्धृतः[2] । अत्रत्य एक एव श्लोकस्तत्र दृश्यते—

प्राणार्कौ सन्नयेत् पश्चात् शश्यन्तमयते यदा ।
त्रिपथे जायते सन्ध्या त्वन्तस्था कुलयोगिनाम् ॥ इति ।

]स्यैव ग्रन्थस्य केरलविश्वविद्यालयमातृकायां तु "श्रीपद्महस्तभट्टारके" इत्यस्य स्थाने "तथा]सहस्रभट्टारकेणापि सन्ध्यानिर्णयः कृतो यथा" इति पाठो वर्तते ।

]ापञ्चाशिका

ग्रन्थ एष योगिनीहृदयदीपिकायां चिद्वल्ल्यां सौन्दर्यलहरीटीकायां सौभाग्यवर्धन्यां च]द्धृतो वर्तते । अत्रत्याः सर्वेऽपि श्लोकाः कश्मीरग्रन्थमालायां प्रकाशितायामादिनाथविरचि-]यामनुत्तरवोधपञ्चाशिकायां दृश्यन्त इति तदभिन्न एवैष ग्रन्थ इति मन्तव्यम् । अशुद्धि-]यिष्ठमेतत्संस्करणम् । सरस्वतीभवनपुस्तकालयेऽन्यत्र चास्या द्वित्रा मातृकाः समुपलभ्यन्ते ।]ासामाधारेण नूतनमस्य संस्करणमावश्यकम् ।

---

[1] द्रष्टव्यम्—२३६१६ संख्याकाया जैनाचार्यसोमतिलकसूरिकृतटीकासहिताया लघुस्तव- मातृकायास्तृतीयं पत्रम् ।

[2] द्रष्टव्यम्—प. ८ क ।

प्रपञ्चसारः

पद्मपादाचार्यविरचितेन भाष्येण सह शङ्कराचार्यप्रणीत एष ग्रन्थः साम्प्रतं मुद्रित उपलभ्यते । ऋजुविमर्शिनीकारेणाभियुक्तवचनत्वेन बहुश उद्धृत एष ग्रन्थो भगवता आद्येन शङ्कराचार्येण विरचितोऽन्येन वा तच्छिष्यपरम्परासु स्थितेनेत्यत्र विवदन्ते ऐतिहासिकाः साम्प्रतिकाः । अर्थरत्नावलीकारेण विद्यानन्देन ज्ञानदीपविमर्शिन्यां[1] स्वकृतौ प्रपञ्चसारस्थः "मूलाधारात्" (१०।७) इत्यादिकः श्लोकः शङ्कराचार्यकृतित्वेनोल्लिख्यते । ईशान- शिवगुरुदेवपद्धत्यां प्रपञ्चसारस्थाः श्लोका दृश्यन्ते । एष ईशानशिवः सोमशम्भुग्रन्थं स्मरति । सोमशम्भुना कर्मकाण्डक्रमावलिः ११३० वैक्रमे वत्सरे समापिता । ईशानशिवगुरुदेवपद्धतिश्च तत्त्वप्रकाशव्याख्यात्रा कुमारेण स्मर्यते । कुमार एष गुर्जरचालुक्यनृपतेर्मूलराजस्य गुरोः कुमारशिवादभिन्नो यदि स्वीक्रियेत तर्हि ख्रीष्टीयैकादशशताब्द्या अन्तिमो भाग ईशानशिवस्य स्थितिकालः सिद्ध्यति । प्रपञ्चसारस्य रचना ततः पूर्वं संजातेत्यङ्गीकर्तव्यमेव । शिवभूषणे पद्धतिप्रणेतारोऽष्टादश शिवाचार्याः श्रूयन्ते—

उग्रोत्तरज्योतिरथोपसद्यः श्रीरामकण्ठोऽपि च वैद्यकण्ठः ।
नारायणश्चापि विभूतिकण्ठः श्रीनीलकण्ठावपि सोमशम्भुः ॥
ईशानशम्भुर्हृदयादिना स्याद् विरञ्चिवैराग्यकयुग्मवाच्यौ ।
ज्ञानस्त्रिणेत्रो वरुणेश्वरौ तावित्यादयस्ते स्युरघोरशम्भुः ॥ इति ।

प्रायश्चित्तसमुच्चय–निमित्तक्रियानुसन्धान-प्रतिष्ठादर्पणप्रभृतिषु प्राचीनेषु पद्धतिग्रन्थेषु गवेषितेषु प्रपञ्चसारस्य स्थितिकाल इतोऽपि प्राचीनः साध्येत ।

प्रपञ्चसारः शारदातिलकं च यद्यपि तन्त्रशास्त्रग्रन्थौ, तथापि नेमौ शैवं शाक्तं वैष्णवं स्कान्दं गाणपत्यं वा मतमैकान्त्येन प्रतिपादयतः । स्मार्तपञ्चायतनपूजायां यथा सर्वेषामेषां पूजनं विधीयते, तथैवानयोर्ग्रन्थयोरासां सर्वासां तन्त्रदृष्टीनां समन्वयो विराजते । अनयोर्ग्रन्थयोर्विषय- प्रतिपादने किमुत श्लोकानुपूर्व्यामपि तत्र तत्र वर्तते साम्यम्, अतः कश्चिदेकोऽन्यमनुकरोती- त्यङ्गीकर्तव्यम् । अनयोरेकस्य कर्ता शङ्कराचार्यभगवत्पादः, अन्यस्य चाभिनवगुप्तगुरुर्लक्ष्मणोऽ- भिमन्यते । अनेन प्रपञ्चसारस्य प्राचीनत्वमायाति । वैदिकधर्मस्य पुनः प्रतिष्ठाप- यित्राऽऽद्येन शङ्कराचार्येण वेदवाह्यान् मतान् निरस्यता वेदानुवर्तिनीनां दृष्टीनां समन्वयः स्मार्त- धर्मप्रतिष्ठामुखेनाकारीति श्रूयते । ब्रह्मसूत्रतर्कपादव्याख्यानप्रसङ्गे यद्यप्येता दृष्टयः समा- लोचिताः, तथापि प्रपञ्चसारे दृश्यते नाम तत्समन्वयः । तन्त्रग्रन्थेष्वेवंविधेषु प्रपञ्चसार इदम्प्रथमतया प्रवृत्तः, उताऽऽसन्नन्येऽपीदृशा ग्रन्थाः पूर्वमित्यन्वेषणीयम् ।

---

१. द्रष्टव्यम्—प० ११ क ।

In Public domain. Digitization: Muthulakshmi Research Academy

तशास्त्रम्

यत्र यत्र मनस्तुष्टिस्तत्र तत्रैव धारयेत् ।
तत्र तत्र परानन्दस्वरूपं संप्रकाशते ॥

त्येप श्लोको [1]मतशास्त्रस्येत्यर्थरत्नावलीकारः (पृ. ८०) । एवमेव—"संवर्तामण्डलान्ते मपदनिहितानन्दशक्तिः सुभीमा" इत्येष श्लोकखण्डोऽप्यर्थरत्नावल्यां (पृ. २०५) मत-ास्त्रस्यैवोद्धृतः । एष च श्लोकखण्डः कुब्जिकामतस्येति तत्रैव टिप्पण्यामस्माभिः प्रतिपा-तम् । नित्याषोडशिकार्णवे चतुष्षष्टितन्त्रेषु कुब्जिकामतं परिगणितम् ।

वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम् ।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम् ॥

[2]भिनवगुप्तप्रभृतिभिरुद्धृतेऽस्मिन् वचने मतसिद्धान्तः पृथगेव परिगणितः । अस्मिन् षयेऽस्माभिस्त्रिपुरादर्शनविषयके निबन्धे १६-१७ पृष्ठयोष्टिप्पण्यामुक्तपूर्वम् । कुब्जिका-तस्य प्रकाशनानन्तरमेव विषयेऽस्मिन् निश्चयेन किमपि वक्तुं शक्यते । अभिनवगुप्तेन परा-शिकाव्याख्यायाम्—"तथा च कुब्जिकामते खण्डचक्रविचारेऽमुमेवार्थं प्रधानतयाधि-त्यादिष्टम्—मायोपरि महामाया त्रिकोणानन्दरूपिणी । इत्यादि" इत्येवं कुब्जिकामतमुद्धृतम् । हार्थमञ्जरीपरिमलादिष्वपि (पृ. ४) तद्वचनान्युपलभ्यन्ते । तन्त्रालोके तद्विवेके च द्धयोगीश्वरीमतमपि मतनाम्ना स्मृतम् । कुब्जिकामतसिद्धयोगीश्वरीमतयोर्मतनाम्नोद्धृतानां चनानां विवेकोऽनयोर्मातृकयोः परिदर्शनानन्तरमेव संभवेत् ।

तोत्तरम्

अर्थरत्नावल्यामिमे श्लोका मतोत्तरीया उद्धृताः सन्ति—

एतत्तन्मण्डलं दिव्यं यत्र विश्वं प्रतिष्ठितम् (पृ. १९) ।
पिण्डं कुण्डलिनी शक्तिः पदं हंसः प्रकीर्तितः ।
रूपं बिन्दुः समाख्यातो रूपातीतं तु निष्कलम् ॥ (पृ. २४)
भैरवोऽहं कुलोऽहं वै बिन्दुस्त्वं नादकुण्डली ।
उभयोः सङ्गमो योऽयं परानन्दस्वभावकः ॥ (पृ. १३९)

त्यं द्वितीयमुद्धरणं योगिनीहृदयदीपिकायां (पृ. ५९) सेतुबन्धे (पृ. ६०) च स्वच्छन्द-हवचनत्वेनोद्धृतम् । ऋजुविमर्शिन्यां (पृ. १३३) त्रैलोक्यमोहनमित्यादि नवमं सुरसुन्दरी-त्तं सार्धश्लोकद्वयं मतोत्तरीयमुद्धृतम् । अत्र द्वयोर्मातृकयोर्ग्रन्थस्य नाम वामिकोत्तरमिति ते । मतोत्तरस्य मातृकाया विवरणं म०म०हरप्रसादशास्त्रिसंकलितनेपालग्रन्थसूच्यां द्रष्टव्यम् ।

---

[1] स्वल्पेन पाठभेदेन सहैव विज्ञानभैरवेऽपि (श्लो. ७४) दृश्यते ।

[2] द्रष्टव्यम्—परात्रिंशिकाविवृतिः, पृ. ९२

महाज्ञानार्णवः

एष ग्रन्थो योगिनीहृदये "महाज्ञानार्णवे दृष्टः शङ्का तत्र न पार्वति" (२।७७) इत्येवं स्मृतः । जयरथेन च विवरणे "महाज्ञानार्णवे दृष्टं ष (ङ्कं? ट्कं) तन्त्रेऽत्र पार्वति" (पृ. १३९) इत्यागमवचनमुद्धृतम् । उभयत्रापि षड्विधमन्त्रार्थप्रकरणे तत्स्मर्यते, अत उभयत्रापि प्रकरण-मेतन्महाज्ञानार्णवानुसारि व्याख्यायत इति मन्तव्यम् । विवरणे आगमवचनेन योगिनीहृदयमेव स्मर्यत इति तत्संपादकाभिमतं न रोचतेऽस्मभ्यम्, अत्रोद्धृतानां वचनानां सर्वेषां योगिनी-हृदयेऽनुपलम्भात् । अतः पृथग् ग्रन्थद्वयमेतदङ्गीकर्तव्यम् । तदाधारभूतश्च ग्रन्थो महाज्ञानार्णव इति । अत्र यद्वक्तव्यं तत् १२ पृ० १ टि० उक्तम् ।

मुख्याम्नायक्रमः, मुख्याम्नायरहस्यविधिश्च

योगिनीहृदयदीपिकायाम्—

"स्वीकुर्यात् सततं वस्तु यदानन्दसुखं भवेत्" (पृ. २६५) ।

इत्येष श्लोकार्धो मुख्याम्नायक्रमनाम्नोद्धृतः । एवमेव—

इन्द्रियद्वारसंग्राह्यैर्गन्धाद्यैरात्मदेवता ।
स्वाभेदेन समाराध्या ज्ञातुः सोऽयं महामखः ॥

इति श्लोको मुख्याम्नायरहस्यस्थ इत्युक्तम् (पृ. १९६, २७२) । एष श्लोकः सेतुबन्धेऽपि (पृ. १९८) आम्नायरहस्यश्लोकत्वेनोक्तः । महार्थमञ्जरीपरिमले (पृ. ६६) चैषोऽभि-युक्तवचनत्वेनोद्धृतः । मुख्याम्नायक्रमो मुख्याम्नायरहस्यं च भिन्नौ ग्रन्थावभिन्नौ वेति विचार्यम् ।

मृत्युञ्जयभट्टारकः

तन्त्रालोक-शिवसूत्रविमर्शिनी-ऋजुविमर्शिन्यादिषु मृत्युञ्जयभट्टारकनाम्नोद्धृताः सर्वेऽपि श्लोका नेत्रतन्त्रे समुपलभ्यन्ते । अतो नेत्रतन्त्रमेव मृत्युञ्जयभट्टारक इति निश्चप्रचम् । एतच्च तन्त्रं कश्मीरग्रन्थमालायां प्रकाशितमुपलभ्यते।

यागसारः

देव्यासनोपयोग्यस्य तीरे यस्य सुवर्तुला ।
तुर्यास्रे दिग्विदिक्सूत्रैः पालितैर्वृत्तिमालिखेत् ॥
तदन्तरेषु रेखाष्टौ सूत्राणि समया ततः ।
तदन्तस्तु त्रिधा वृत्ति समन्तात् परिवर्तयेत् ॥
दलाग्रं दलसन्धि च केशराणि च कर्णिकाम् ।
क्रमशः संविधायाशु रजोभिस्तत्र नोन्नतम् ॥
पीता च कर्णिका रक्ता नवभिः कृष्णबीजकैः ।
मूलमध्याग्रसंस्थानि पीतरक्तसितानि वा ॥

In Public domain. Digitization Muthulakshmi Research Academy

केशराणि दलान्याशु श्वेतवारणरेखया ।
शुक्लानि प्रोन्नताग्राणि भुक्तिकामस्य वर्तयेत् ॥
समानि मुक्तिकामस्य दलोग्राणि विजानता ।
कन्दर्पादिषु योगेषु तीक्ष्णाग्राणि शुभानि च ॥
दिगीशैः संचराग्राणि गोकर्णाग्राणि चान्यथा ।
विघ्नेशानां ग्रहाणां च प्रमथानां निगद्यते ॥
मण्डलाग्राणि कार्याणि वाणीदुर्गार्चनेषु च ।
बोधिपत्राग्रतान्येव विदधीत गुरूत्तमः ॥
प्रत्यक्षमिव संपाद्य देव्या आसनपङ्कजम् ।
मध्याद्यन्ताधिकं चान्यद् यन्न्यूनं तत्समं भवेत् ॥

गसारस्था इमे श्लोका ज्ञानदीपविमर्शिन्यामुद्धृता विद्यानन्दनाथेन (प. १४ ख–१५ क)।

ससारसंग्रहः

"विद्यां तु नवमीं सम्यक्" इत्यादि "वाग्भवोऽसावकीलितः" इत्यन्ता रससारसंग्रहस्थाः ोका ऋजुविमर्शिन्याम् (पृ. ११०) अर्थरत्नावल्यां (पृ. ११४) चिद्वल्ल्यां (पृ. ३९) च मुपलभ्यन्ते । "कीलिता या रहस्यत्वान्मादनेत्यादितः क्रमात्" इत्यत्र "मादनं तदधः शक्तिः" १।१११) इत्यादिनित्यापोडशिकार्णववचनपरामर्श इत्युन्नीयते ।

प्रोत्कीलनं विधायास्या देवदेवेन दर्शितम् ।
चतुर्विंशतिसाहस्रे रससारकसंज्ञके ॥

यृजुविमर्शिनीधृताभियुक्तवचनप्रामाण्यतो रससारसंग्रह एष चतुर्विंशतिसहस्रश्लोकप्रमाणो देवेन शिवेन प्रोक्त आगमग्रन्थ इति प्रतीयते । अत्र चतुर्थचरणस्य 'रससारकसंग्रहे' त पाठ उचितः प्रतिभाति । अत्र हादिविद्यायाः समुद्धारादेष न प्रमाणीकृतः सेतुबन्धकारेण ृ. ६५) कादिविद्योपासकेन ।

यामलम्

नित्यापोडशिकार्णवे वारद्वयं रुद्रयामलं स्मृतम् । "एवं मन्त्रफलावाप्तिरित्येतद्रुद्र-मलम्" (श्लो. ३६) इत्येतस्मिन् परात्रीशिकान्तिमश्लोकेऽस्य ग्रन्थस्य रुद्रयामलसारभूतत्व-गम्यते । "श्रुतं देव मया सर्वं रुद्रयामलसंभवम्" (श्लो. १) इत्येतस्मिन् विज्ञानभैरवाद्यपद्ये द्रयामलतन्त्रस्य सारमद्यावधारितम्" (श्लो. १६२) इत्युपान्त्ये पद्ये च स्पष्टमेव रुद्रया- निर्दिष्टम् । नित्याषोडशिकार्णवे चतुष्षष्टितन्त्रपरिगणनप्रकरणे यामलाष्टकेष्वन्यतम-र्वटीकाकारसम्मतं तन्त्रम् । अर्थरत्नावल्यादिपूद्धृतमुत्तरपट्कं रुद्रयामलस्यैव भाग इति ष्पिकावाक्येभ्यः परिज्ञायते । एवं विशिष्टेष्वागमग्रन्थेषु स्मृतस्यास्य रुद्रयामलस्य वैशिष्ट्यं ीनत्वं च निर्विवादम् । ग्रन्थस्यास्य मातृकाः प्रायः सर्वेष्वेव ग्रन्थालयेषु समुपलभ्यन्ते ।

सन्ति च स्तोत्रपटलादीनि बहूनि पुस्तकानि रुद्रयामलान्तर्गतत्वेन निर्दिष्टानि । रुद्रयामल-संबद्धयावदुपलब्धसामग्रीसंकलनमुखेन ग्रन्थस्यास्य प्रामाणिकं संस्करणं नितान्तमपेक्षितम् । तच्च सज्जीक्रियते वाराणसेयसंस्कृतविश्वविद्यालयस्थेन योगतन्त्रविभागेनेत्युक्तमेव ।

लक्षणसारः

अत्रत्या इमे श्लोका ऋजुविमर्शिन्यामुद्धृता वर्तन्ते—

अनेन हेतुना सर्वपापविध्वंसकारिणा ।
समस्ताज्ञासिद्धिदेहदायिना तर्पयेज्जगत् ॥ (पृ० १३५)
अर्घान्निसलिलं पात्रं सहेतु दत्तपुष्पकम् ।
समन्त्रं नेत्रपात्रेण त्रिधा शान्तिबलिं भजेत् ॥
मुक्तकेनालिवर्णेन सर्वविघ्नविनाशिना ।
सर्वसिद्धिप्रदेनैव ध्यात्वा भूतादिवेष्टितम् ॥ (पृ० १४०-१४१)
जातवेदसि भूतेशे यातुधाने समीरणे ।
देवीमौलौ चतुर्दिक्षु क्रमाद् हृदादिकं यजेत् ॥ (पृ० २२५)

ऋजुविमर्शिन्या गमातृकायां (पृ० २२५) ग्रन्थस्यास्य लक्षणसागर इति नाम ।

वत्सराजः

सौन्दर्यलहरीटीकायामरुणामोदिन्याम्—
"कामसिद्धिस्तोत्रे भगवतीभक्तिलोलचूडामणिः श्रीवत्सराजोऽप्याह—

लोकाश्चतुर्दश महेन्द्रमुखाश्च देवा
मूर्तित्रयं मुनिगणाश्च वसिष्ठमुख्याः ।
सद्यो भवन्ति न भवन्ति समस्तमूर्ते-
रुन्मीलनेन तव देवि निमीलनेन ॥" (पृ० २२१)

इत्येवं वत्सराजविरचितस्य कामसिद्धिस्तोत्रस्योल्लेखो विद्यते । नेपालस्थवीरपुस्तकालये वर्ततेऽशेषकुलवल्लरीमातृका । तस्यां मातृकायामादितश्चतुर्थपत्रस्य निरङ्कपृष्ठपर्यन्तं महाराजाधिराजविद्याधरचक्रवर्तिवत्सराजविरचिता वामकेश्वरीस्तुतिर्दृश्यते । तत्रान्वेष्टव्य एष श्लोकः ।

विरूपाक्षपञ्चाशिका

विरूपाक्षपञ्चाशिकावचनानि महार्थमञ्जरीपरिमले (पृ० ५४, ७३, ७६, ७७, १२४, १३६) कामकलाविलासटीकायां चिद्वल्ल्यां (पृ० ४, १५, १७, ३१, ४३, ६८) च समुद्धृतानि सन्ति । एष ग्रन्थः त्रिवेन्द्रसंस्कृतग्रन्थमालायां प्रकाशितः । ग्रन्थस्यास्य वैशिष्ट्यमनेनैव प्रतीयेत यदेष शिवपुराणे—'श्रीविरूपाक्षनिर्मिते । शास्त्रे पञ्चाशिके" (६।१९।४४) इत्येवं स्मृतः ।

In Public domain. Digitization Muthulakshmi Research Academy

ठसंहिता

पृथङ्मन्त्रः पृथङ्मन्त्री न सिद्ध्यति कदाचन ।
ज्ञानमूलमिदं सर्वमन्यथा न प्रसिद्ध्यति ॥
आदिमान्तिमहीनास्तु मन्त्राः स्युः शरदभ्रवत् ।
गुरोर्लक्षणमेतावदादिमान्त्यं च वेदयेत् ॥

विमौ श्रीकण्ठसंहितायां इत्यृजुविमर्शिन्यामुक्तम् । श्रीकण्ठीयसंहितेति ख. ग. पाठः । त्रविमर्शिन्यामत्रत्यः प्रथमः श्लोकः श्रीकण्ठीयसंहितास्थ इत्युक्तम् (पृ० ४८), न्तामणिविवृतौ (पृ० ९३) तु श्रीकण्ठसंहितास्थ इति । अत्रत्याः श्लोकास्तन्त्रालोक- -स्वच्छन्दोद्योत-नेत्रोद्योतादिषु दृश्यन्ते ।

ाक्रमः

योगिनीहृदयदीपिकायां श्रीपराक्रमस्याः श्लोका दृश्यन्ते २४५, २५४, २६३ पृष्ठेषु ।

पद्धतिः

अर्थरत्नावल्याम्, ज्ञानदीपविमर्शिन्याम्, योगिनीहृदयदीपिकायाम्, सौन्दर्यलहर्याः यवर्धनीव्याख्यायां च संकेतपद्धतिवचनानि बहुश उद्धृतानि । अत्रत्यानि बहूनि वचनानि न्देनाभियुक्तवचनत्वेन पूजोपनिषदित्यादिनोपनिषद्विशेषणत्वेन च निर्दिष्टानि स्वकीयाया- र्मर्शिन्याम्, चिद्वल्ल्यां नटनानन्देन (पृ० ३५) त्वागमवचनत्वेन । ज्ञानदीपविमर्शिन्यां न्देन यथा गणेशवटुकादयः स्तुताः, तथैवात्रापि गणेशादीनां स्तुतिपराः श्लोका दृश्यन्ते । ामप्यत्रत्यानां सर्वेषां वचनानां परीक्षणेनेदमेवावसीयते यदेष पद्धतिग्रन्थः केनचन हादि- ुयायिना मनीषिणा विरचित इति, यो हि पश्चात्तनानां पद्धतिकाराणां व्याख्याकाराणां म्प्रदायिकपदार्थपरिज्ञानाय प्रधानमवलम्बनमासीत् । हन्त ! साम्प्रतमेष ग्रन्थो नोपलभ्यते । ास्य परिमार्गणेऽवधातव्यमन्वेषणरुचिभिर्विद्वद्भिः ।

अकारस्य शिरो रौद्री वक्त्रं वामा प्रकीर्तिता ।
अम्बिका बाहुरित्युक्ता ज्येष्ठा चैवायुधं स्मृता ॥

संकेतपद्धतिस्थः श्लोकस्तन्त्रालोकविवेकेऽपि (भा० २, पृ० ८०) दृश्यते । अत्रत्य षयो वातूलनाथसूत्रवृत्तौ (पृ० १६-१७) विद्यते ।

स्वेच्छाविभावितानन्तजगद्रश्मिवितानवत् ।
नौमि संविन्महापीठं शिवशक्तिपदाश्रयम् ॥

ऋजुविमर्शिन्यां (पृ० ११) चिद्वल्ल्यां (पृ० १२, २९) च समुद्धृतः श्लोकः द्धतेर्मङ्गलाचरणमिति वयं संभावयामः । अनेन श्लोकेन सह चिद्वल्ल्यां द्वितीय एष दृश्यते—

त्यम्-योगिनीहृदयदीपिका, पृ० २६८

अखण्डितस्वभावोऽपि विचित्रां मातृकल्पनाम् ।
स्वहृन्मण्डलचक्रे यः प्रथयेत्तं नुमः शिवम् ॥ (पृ० १२) इति ।

एवमेव—

अनेककोटिभेदैस्तु गदितं त्रैपुरं महः ।
तन्मध्ये तु परा दीप्ता महात्रिपुरसुन्दरी ॥
प्रोत्कीलनं विधायास्या देवदेवेन दर्शितम् ।
चतुर्विंशतिसाहस्रे रससारकसंज्ञके ॥ (पृ० १०७-१०८)

इत्येवमृजुविमर्शिन्यामभियुक्तवचनत्वेनोद्धृताविमावपि श्लोकौ तत्रत्यावेव स्याताम् । अत्रत्यः प्रथमः श्लोकश्चिद्वल्ल्यामपि (पृ० ५५) दृश्यते । यावदुपलब्धानामस्य श्लोकानां संग्रहोऽन्यत्र विधास्यते ।

साम्बमिश्रः

ऋजुविमर्शिन्याम्—"या सा मित्रावरुणसदनादुच्चरन्ती" (पृ० २२९) इत्येतावानंशः साम्बमिश्रकृतेरुद्धृतः । एष च साम्बपञ्चाशिकायाः पञ्चमश्लोकस्य प्रथमश्चरणो वर्तते । क्षेमराजाचार्यकृतया विवृत्या सह साम्बपञ्चाशिका निर्णयसागरमुद्रणालयतः प्रकाशिता । अन्यया कयाचन टीकया सहैष ग्रन्थस्त्रिवेन्द्रंसंस्कृतग्रन्थमालायामपि प्रकाशितो विद्यते ।

सिद्धनाथपादः

सिद्धनाथपादस्य श्लोका अर्थरत्नावल्यां (पृ० ४१, १३४, १७१, २०५, २६८-२६९) दृश्यन्ते । अत्रत्यौ २६८-६९ पृष्ठस्थौ श्लोकावृजुविमर्शिन्यां (पृ० २६८-६९) ज्ञानदीपविमर्शिन्यां (प० ३२ ख) चापि दृश्येते । शिवसूत्रविमर्शिन्याम्—

श्रयेत् स्वातन्त्र्यशक्तिं स्वां सा श्रीकाली परा कला । (पृ० ९२) ।

इत्येष श्लोकार्धः श्रीनाथपादानामुद्धृतः । श्रीनाथपादा इमे सिद्धनाथपादतो भिन्ना अभिन्ना वेति परीक्षणीयमास्ते । एवमेव स्पन्दप्रदीपिकायां (पृ० ४) योऽभेदकारिकाकृत् सिद्धनाथः स्मर्यते, तद्विषयेऽपि मन्तव्यम् ।

सिद्धामतम्

सात्र कुण्डलिनी बीजं जीवभूता चिदात्मिका ।
तज्जं ध्रुवेच्छोन्मेषाख्यं त्रिकं वर्णास्ततः पुनः ॥

इत्येष श्लोकः सिद्धामतस्येत्यृजुविमर्शिनीकारः । अस्य ग्रन्थस्य सिद्धान्तमतमिति कपुस्तके नाम, ओड्डामरमिति खपुस्तके, सिद्धामृतमिति शिवसूत्रविमर्शिन्याम्, सिद्धयोगीश्वरीमतमिति तन्त्रालोके । सिद्धयोगीश्वरीमतं चतुष्षष्टितन्त्रेषु परिगणितम्, तन्त्रालोके च बहुशः स्मृतम् । अतो ग्रन्थस्यास्यैतदेव नाम वास्तविकम् । सिद्धामतमिति मतमिति वा तस्य संक्षिप्तं नाम। सिद्धातन्त्रनाम्नाप्येतत् स्मर्यते । त्रिकशास्त्रस्य प्रधानतमेषु तन्त्रालोकेनैकस्मृतेषु (भा० १,

In Public domain. Digitization Muthulakshmi Research Academy

४९) सिद्धा-नामक-मालिन्याख्येष्वन्यतमदेतत्तन्त्रं परिगण्यते। नानाग्रन्थेषूपलभ्यन्ते ांस्यस्य। नेपालपुस्तकालये सिद्धयोगीश्वरतन्त्रमुपलभ्यते। तत्रान्वेषणीयानि तानि।

मशम्भुग्रन्थः

ज्ञानदीपविमर्शिन्यां विद्यानन्दनाथेन पवित्रारोपणपद्धत्याम् (प० ३४ ख)—"सौवर्णं ातं ताम्रं कृतादिषु यथाक्रमम्" इत्यादिः "सादाख्यः सर्वदेवाश्च क्रमेण नवतन्तुषु" इत्यन्तः मशम्भुग्रन्थः समुद्धृतः। इमे च श्लोकाः सोमशम्भुविरचितकर्मकाण्डक्रमावल्यां (पृ० ४२) ुपलभ्यन्ते। एवमेव—"स्वच्छन्दभैरवे तन्त्रे" इत्यादिक ऋजुविमर्शिन्यामाचार्यवचनत्वेनोद्धृतः कोऽप्यत्रैव (पृ० ५५) दृश्यते। एष ग्रन्थो द्वाभ्यां संस्थानाभ्यां प्रकाशित उपलभ्यते।

च्छन्दसंग्रहः

योगिनीहृदयदीपिकायां महास्वच्छन्दं महास्वच्छन्दसंग्रहः स्वच्छन्दभैरवं स्वच्छन्दसंग्रह ति चत्वारो ग्रन्थाः पृथक् पृथगुद्धृताः। स्वच्छन्दतन्त्रं मुद्रितमुपलभ्यते। तत्र महास्वच्छन्दस्य च्छन्दभैरवस्य च वचनानि दृश्यन्ते, महास्वच्छन्दसंग्रहस्य स्वच्छन्दसंग्रहस्य तु प्रायो न। ारवागमेषु दक्षिणस्रोतःसमुत्थेषु स्वच्छन्दचण्डत्रिशिरोभैरवादिषु" (१०।१-१०) इति नेत्र- त्रोद्योतवचनाधारेण स्वच्छन्दतन्त्रमेव स्वच्छन्दभैरवमित्युन्नीयते, तस्य दक्षिणस्रोतः- ुत्थत्वेन भैरवागमत्वस्य निष्प्रत्यूहत्वात्। महास्वच्छन्दवचनस्य स्वच्छन्दतन्त्रे समुपलम्भेऽपि य भिन्नत्वाभिन्नत्वविषये न किमपि वक्तुं साम्प्रतं शक्येत। महास्वच्छन्दसंग्रह-स्वच्छन्द- ाहयोः पृथक्त्वापृथक्त्वविषयेऽपि तथा। स्वच्छन्दसंग्रहस्य भूयांसि वचांसि योगिनीहृदय- पिकायां कानिचनान्यत्रापि च दृश्यन्ते। आगमिकयोगशास्त्रस्य विशिष्टस्यास्य ग्रन्थस्य कापि मातृकाऽस्माकं दृग्गोचरीभूता, न च कासुचिदपि मातृकासूचीषु तस्योल्लेखो यते। नितान्तं महत्त्वपूर्णोऽयं ग्रन्थोऽवश्यमेवान्वेषणीय आगमिकयोगदर्शनयोरनुशीलन- ायणैर्मनीषिभिः।

निर्णयो हंसभेदो वा

घोषः कांस्यं तथा घण्टा वीणा वेणुश्च वांशकम्।
दुन्दुभिः शङ्खघोषश्च नवमं निर्विशेषकम्॥

श्लोको हंसनिर्णयस्येत्यर्थरत्नावल्यामुक्तम् (पृ० ३६)। अत्र क.ग.पुस्तकयोर्ग्रन्थस्य निर्भेद इति संज्ञा, छपुस्तके तु हंसभेद इति। हंसभेदस्थाः केचन श्लोका महार्थमञ्जरी- मले (पृ० ६, ५७, ११९) दृश्यन्ते। हंसभेद एव हंसनिर्णयः, भिन्नो वैष ग्रन्थ इति प्रतं नैव वक्तुं पार्येत।

ारमेश्वरम्

"मा शक्तिस्तु" इत्यादि "निष्कीलितात्मकौ" इत्यन्ता हंसपारमेश्वरस्थाः श्लोका विमर्शिन्याम् (पृ० ११०) अर्थरत्नावल्यां (पृ० ११४-११५) चिद्वल्ल्यां (पृ० ३९)

ष्टव्यम्—स्वच्छन्दोद्योते, भा० १, पृ० ८

च समुपलभ्यन्ते। अत्र हादिविद्यायाः समुद्धारादेष न प्रमाणीकृतो भास्कररायेण (नि० से० पृ० ६५) कादिसम्प्रदायानुयायिना। अत्रत्या चतुर्थी पङ्क्तिर्योगिनीहृदयदीपिकायामप्युद्धृता (पृ० १५८)। नेत्रोद्योते (भा० २, पृ० १२२-२३) क्षेमराजेन—

सर्वार्चनं स्थण्डिले स्यान्न च तत्राधिवासनम्।

इत्युपक्रम्य "निष्कलः सकलः" इत्यादि "वीजाभिख्यासमन्वितम्" इत्यन्तं हंसपारमेश्वरं समुद्धृतम्। स्वच्छन्दोद्योतेऽपि—

शिवशक्तिरमोघेयं कर्तरी परिकीर्तिता। (भा० ४, पृ० ८१)

इति श्लोकार्धोऽत्रत्यो दृश्यते। स्पन्दप्रदीपिकायां च—

पशुभावे स्थिता मन्त्राः केवला मन्त्ररूपिणः।
सौषुम्णेऽध्वन्युच्चरिताः पतित्वं प्राप्नुवन्ति ते॥ (पृ० ३३)

इति तत्रत्यः श्लोकः स्मृतः।

एतावता ग्रन्थपरिचयप्रपञ्चः प्रदर्शितः। अथ वामकेश्वरशास्त्रसारभूते नित्याषोडशि- कार्णवस्याद्ये गणेशेत्यादिके सूत्रे सूचितानां विषयाणां प्रतिपादनाय प्रथमं तन्त्रशास्त्रावतार- क्रमस्तद्वैशिष्ट्यं तच्छाखाप्रशाखाश्च विविच्यन्ते।

तन्त्रशास्त्रावतारक्रमस्तद्वैशिष्ट्यं च

भारतीये वाङ्मये निगमागमशब्दौ बहुलप्रचारौ। वैदिकवाङ्मयमभिलक्ष्य प्रवर्तते निगमशब्दः, तान्त्रिकं च वाङ्मयं सूचयत्यागमशब्दः। नह्ययमैकान्तिको नियमः, भर्तृहरि-प्रभृतिभिरागमपदस्य निगमार्थेऽपि प्रयुक्तत्वात्[1]। अथापि परवर्तिनि काले न केवलं दशाष्टादशवस्वष्टभेदभिन्नेषु शैवरौद्रभैरवागमेषु, वैष्णवाद्यागमेष्वपि प्रायुज्यत स शब्दः। तन्त्रशब्दोऽपि तत्समानार्थक एव, वैष्णवाद्यागमेषु लक्ष्मीतन्त्र-पाद्मतन्त्र-पारमेश्वरतन्त्रप्रभृति-ग्रन्थदर्शनात्। एवं सत्यपि वैष्णवेषु शैवेषु चागमशब्दः, शाक्तेषु बौद्धेषु च तन्त्रशब्दो बाहुल्येन प्रयुज्यते। एवं चागमतन्त्रशब्दाभिलप्यस्य वाङ्मयस्य निगमशब्दबोध्यवाङ्मयापेक्षया केनापि वैशिष्ट्येन भाव्यम्।

महाभारते नारायणीयोपाख्याने—

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।
ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै॥
(शान्ति० मोक्ष० ३४९।६४)

इति श्रूयते, "स्वयंप्रमाणान्येतानि न हातव्यानि हेतुभिः" इत्यादिना च तेषां प्रामाण्यमङ्गी-क्रियते; तथापि भगवता बादरायणेन ब्रह्मसूत्रतर्कपादे वेदबाह्यैर्बौद्धजैनमतैः सह मतानामेतेषा-

---

१. द्रष्टव्यम्—वाक्यपदीये, १।१३२

In Public domain. Digitization Muthulakshmi Research Academy

दिकत्वं संप्रासाधि, व्याख्यातं च तथैव शङ्करभगवत्पादैः। "विरोधे त्वनपेक्षं स्यादसति
नुमानम्", "हेतुदर्शनाच्च" (१।३।३-४) इति जैमिनिसूत्रद्वयं व्याचक्षाणाः कुमारिलभट्टपादा
पि सांख्ययोगपाञ्चरात्रपाशुपतशाक्यनिर्ग्रन्थमतानामवैदिकत्वमाचक्षीरन्। परवर्तिनि काले
मुनाचार्यप्रभृतिभिः पाञ्चरात्रादितन्त्राणां वैदिकत्वसाधने यद्यप्यायस्तम्, "त्रयी सांख्यं योगः
शुपतिमतं वैष्णवमिति" (श्लो० ७) इतिमहिम्नस्तोत्रदिशा प्रस्थानभेदमाश्रित्य धर्मशास्त्रनिबन्ध-
रैर्भास्कररायप्रभृतिभिश्च यद्यपि स्मृतिसतत्त्वं तन्त्राणामङ्गीक्रियते, तथापि तेषु तेषु तन्त्रेषु
दानामधरशासनत्वं ख्याप्यमानं बादरायणकुमारिलशङ्कराद्युक्तिमेव परिपुष्णाति।

भगवतो बुद्धस्य महावीरस्य च प्रादुर्भावसमयेऽत्र नानादृष्टयः प्रसृता आसन्, परवर्तिनि
ले वा प्रादुर्भूताः। ताश्च वेदानुवर्तिन्यः, वेदविरुद्धाः, स्वतन्त्राश्चेति विभागत्रयेषु संग्रहीतुं
शकाः। वेदविरुद्धा दृष्टयः सौगतानां निर्ग्रन्थानां च, स्वतन्त्राश्च सांख्य-योग-पाञ्चरात्रादि-
दाम्। भगवद्गीतासून्मिषितया भारतीयदर्शनानां समन्वयात्मिकया दृष्ट्या महाभारते
राणेषु स्मृतिषु तन्त्रेषु निबन्धग्रन्थेषु च प्रस्थानभेदाधिकारिभेदमुखेन विरोधः प्रक्षीणता-
लायि दृष्टीनामेतासाम्। भगवता शङ्कराचार्येण माहेश्वरा भागवताश्च वेदबाह्यत्वेन
याख्यायन्त, किन्तु शैवाः पाञ्चरात्रिकाश्च साम्प्रतं वेदानां प्रामाण्यमुखेनैव प्रवर्तन्ते। अत्र
रयमेव यत्ताः स्वतन्त्रा दृष्टयो गच्छता कालेन स्वस्वातन्त्र्यं परिहाय शनैः शनैर्वेदकुक्षि-
क्षिप्ता अभूवन्।

तान्त्रिकीषु वैदिकीषु च दृष्टिषु वर्तते बहुविधं वैभिन्न्यम्। वाक्चतुष्टयात्मकस्य
दब्रह्मण उपासनं षडध्वमुखेन जगत्प्रपञ्चसर्जनप्रविलापनं च तान्त्रिकदृष्टीनामेकं वैशिष्ट्यम्।
न्त्रेषु स्त्रीशूद्रादीनामधिकारप्रयुक्तं वैभिन्न्यमपि तत्र जागर्तितराम्। यद्यपि व्याकरणागमेऽपि
दब्रह्मण उपासनं श्रूयते, वर्तते च वाक्चतुष्टयप्रतिपादिका श्रुतिः—"चत्वारि वाक्परिमिता
ानि" (ऋ० १।१६४।४५) इत्यादिका, सूच्यते च—"अकारः सर्ववर्णाग्र्यः...अनयोः साम-
तत्परस्मिन्नहमि स्फुटम्" इत्यादिसंकेतपद्धतिविवृतोऽर्थः—"अ इति ब्रह्म तत्रागतमह-
ति" (ऐ० आ० २।३।८), "अकारो वै सर्वा वाक्" (ऐ० आ० २।३।६), "छन्दःपुरुष
यमवोचामाक्षरसमाम्नाय एव तस्यैतस्याकारो रसः" (ऐ० आ० ३।२।३), "वाचीमा
वा भुवनान्यर्पिता" (तै० ब्रा० २।८।८।४), "वागक्षरं प्रथमजा ऋतस्य" (तै० ब्रा०
।८।५), "अनाहतशीर्ष्णी वाग् जुषाणा सोमस्य तृप्यतु" (तै० सं० ३।२।५।१) इत्यादि-

वरिवस्यारहस्यप्रकाशे, पृ० ७

द्रष्टव्यानि—"उत्तमाः पञ्चरात्रस्था मध्यमास्तु त्रयीमयाः" (२२।३६) इति लक्ष्मीतन्त्रे,
"सर्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं परम्" (२।७) इति कुलार्णवे, "वेदाच्छैवं ततो
वामं ततो दक्षं ततः कुलम्" (पृ. ९२) इत्यादीनि च परात्रिंशिकाव्याख्यादिषूद्धृतानि
वचनानि।

ध्वारण्यकब्राह्मणसंहितावचनेषु, तथापि षडध्वमुखेन शब्दब्रह्मणः प्रपञ्चो यथा दृश्यते तन्त्रेषु न
तथा वेदेषु। वेदाध्ययनादिषु स्त्रीशूद्रादीनामधिकारो नैवाङ्गीक्रियते। तन्त्रेषु तु वर्तते
सर्वेषामधिकारः[1]।

अत्रैवमैतिहासिका विवेचयन्ति—भिन्नप्रकृतिकमेतच्छास्त्रद्वयं वैदिकं तान्त्रिकं चेति।
सिन्धुसभ्यताचिह्नानां शिवलिङ्गवृषभयोगिप्रभृतीनां वेदेष्वदर्शनाद् वैदिकसभ्यतातो भिन्ना तत्र
काचन सभ्यताऽवर्तत। ततः प्रावर्तत तान्त्रिकी धारा। वैदिकसभ्यतया संजातेऽस्याः संपर्के
प्रकृतिपुरुषयोरिव धर्माणां संक्रमस्तत्र समजायत। अस्यामेव प्रक्रियायामथर्ववेदे तान्त्रिकं
कर्मकाण्डम्, यजुर्वेदे च तान्त्रिकः शिवो रुद्ररूपेण प्रतिष्ठामलभत। अथर्ववेदस्य प्रामाण्यविषये
न्यायमञ्जरीकारो जयन्तभट्टस्तर्कानाश्रयते। वेदेषु त्रयीशब्दप्रयोगोऽप्यर्थगर्भः। एवं च वैदिकी
तद्भिन्ना चेति संस्कृतिद्वयमत्र प्रचलदासीत्। एकत्र विशिष्टानामेवापरत्र साधारणानामपि
जनानां प्रवेशोऽधिकारश्च स्वीक्रियते स्मेति।

यद्यपि संभावनामात्रमेतत्, तथापि बादरायणकुमारिलशङ्कराचार्यवचनैस्तन्त्रशास्त्रेषु
तत्र तत्र परिदृश्यमानाभिर्वेदविषयिणीभिरुक्तिभिश्च स्पष्टमेतावत्परिज्ञायते यद् यद्यपि
बौद्धार्हतवन्नैताभिर्दृष्टिभिः सर्वथैव वेदप्रामाण्यं प्रत्याख्यातमथापि कियताप्यंशेन लोकसंग्रहाय
वाऽन्यस्मै वा कस्मैचित्प्रयोजनाय तत्परित्यक्तमेव। वेदविरुद्धा अप्येता दृष्टयो भारतीये
समाजे संमानिता अभूवन्। दक्षिणे भारते आळवारादीनां परम्परासु, उत्तरे च भारते
सिद्ध-नाथ-सन्तप्रभृतीनां वचनेषु स ज्ञानप्रवाहो निर्बाधं प्रवहति साम्प्रतमपि।

वेदवन्मन्यते दृष्टीनामासामप्यपौरुषेयत्वमेव। ब्रह्मा पूर्वकल्पस्थितान् वेदान् स्मरति,
तन्त्राणि च तानि तानि शिवनारायणबुद्धप्रभृतिभिर्ऋषिमुनिपरम्परासूपदिश्यन्ते। ऐति-
हासिकास्तु नैतदङ्गीकुर्वते। कालक्रमेण तन्त्रशास्त्रं नानाशाखाप्रशाखासु प्रावर्ततेति वर्तते
तेषां सिद्धान्तः।

तन्त्राणां शाखाप्रशाखाः

सिद्धान्ते भूततन्त्रे च वामे स्रोतसि दक्षिणे॥
भैरवे च तथान्येषु पशुपाशुपतादिषु।
विष्णुतन्त्रे च बौद्धे च तथा दिक्पालदर्शने॥ (२।२२-२३)

इत्यजितागमे क्रियापादे,

गारुडं भूततन्त्रं च भैरवं वामतन्त्रकम्॥
कापालं पाञ्चरात्रं च लाकुली कुलशास्त्रकम्।

१. एतच्च—"अस्यां च पूजायां सर्वजातीनामधिकारः" (पृ० २२३) इत्यादिना ग्रन्थेन
भास्कररायेण सौभाग्यभास्करे प्रतिपादितम्।

In Public domain. Digitization Muthulakshmi Research Academy

तन्त्रं पाशुपतं .... ॥
....बौद्धमार्हतं मतमेव च । (१।११४-११६)

जितागमभूमिकाधृतकामिकागमे,

शैवं[1] चतुर्विधं ज्ञेयं शैवं पाशुपतं तथा ।
सोमं लाकुलमित्येते चतुर्भेदाः प्रकीर्तिताः ॥ (२६।५८)

जितागमभूमिकाधृतपूर्वकारणागमे,

गारुडे भूततन्त्रे च वाग्विधानेषु सर्वतः ॥
....।
यामले[2] चैकवीरे च नवके त्रिकभेदतः ॥
समभेदे च देव्याख्ये दुर्गाख्ये विन्ध्यवासिनि ।
चण्डिकाद्ये चतुष्के च स्वयम्भूत्थे महेश्वरे ॥
प्राक्प्रतिष्ठितरूपे वा ऋषिमानुषयोजिते ।
आयुधे विविधे चैव विद्यापीठेषु सर्वतः ॥
सर्वपातालतन्त्रेषु नागेषु द्रामिडेषु च । (१३।३८-४२)

नेत्रतन्त्रे,

शैववैष्णवदौर्गार्कगाणपत्येन्दुसंभवैः[3] ।
मन्त्रैर्विशुद्धचित्तस्य कुलज्ञानं प्रकाशते ॥ (२।२९)

कुलार्णवे च तन्त्राणां विविधा भेदा दरीदृश्यन्ते । सर्वानन्यान् भेदोपभेदान् परिहायात्र
ं शैवशाक्ततन्त्राणि चर्चयिष्यन्ते । एतेष्वपि—

चतुर्विधाः शैवा अस्माभिः "शिवपुराणीयं दर्शनम्" इत्याख्ये निबन्धे व्याख्याताः । द्रष्टव्यम्—पुराणपत्रिका, व. ७, अ० १, पृ० १६२-१६५

"यामल इति ब्रह्मयामलरुद्रयामलादौ, एकवीर इति परात्रीशिकामतत्रिंशिकादौ, नवक इति नवात्मचक्रादौ, त्रिक इति षडर्धनयेषु, समभेदे चेति समविषयाख्येषु मतनयेषु, देव्याख्ये इति महाघोराजयादिभेदेषु, विन्ध्यवासिनीत्येतदाख्यदेवताप्रतिपादके, चण्डिकाद्ये चतुष्क इति दक्षिणवामस्रोतसि तत्तद्देवताचतुष्टयाराधनप्रतिपादिनि" इति नेत्रतन्त्रोद्योते ।

इन्दुसंभवं जैनदर्शनम् (सौ० भा० पृ० १९४)।

प्रसङ्गेऽस्मिन् "तन्त्राज् : स्टडीज ऑन देयर रिलीजन एण्ड लिटरेचर" इत्याख्यस्य ग्रन्थस्य श्रीचिन्ताहरणचक्रवर्तिरचितस्य ५०-५८ पृष्ठानि दर्शनार्हाणि ।

वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम् ।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम् ॥ (पृ० ९२)

इति परात्रिंशिकाव्याख्योद्धृतवचनतः,

वाम[1]मार्गाभिषिक्तोऽपि दैशिकः परतत्त्ववित् ।
संस्कार्यो भैरवे सोऽपि कुले[2] कौले त्रिकेऽपि सः ॥ (पृ० ९२)

इति तत्रैवोद्धृतनिशाचारवचनतः,

सर्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं परम् ।
वैष्णवादुत्तमं शैवं शैवाद्[1] दक्षिणमुत्तमम् ॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम् ।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं नहि ॥ (२।७-८)

इति कुलार्णववचनतश्चाधरोर्ध्वीभावः प्रतिपाद्यते ।

तदेवं तरतमभावेन स्थितानामेषां तन्त्राणां त्रिविधो विभागो दृश्यते । तत्र प्रथमः स्रोतोविभागः, अपरः पीठविभागः, तृतीयश्चाम्नायविभाग इति ।

त्रिस्रोतोविभागः

तेषु स्रोतोभेदः प्रथमतस्त्रिविधो दृश्यते,

वामदक्षिणसिद्धान्तस्त्रिविधं शुद्धशैवकम् ।
मूलावतारतन्त्रादि शास्त्रं यद्वामशैवकम् ॥

---

१. वामशब्दार्थस्तन्त्रालोके (१५।२७९) तद्विवेके च व्याख्यातः । वामपदस्यात्र पृथगुपादानात् कुलकौलमते इतो भिन्ने । "वेदशैववामकौलत्रिकाद्यैः" (पृ० २२) इत्यस्मिन्नृजुविमर्शिनीवचनेऽपि वामकौलमतयोः पार्थक्यमेव ।

२. अत्र कुल-कौलशब्दयोः पृथगुल्लेखेन मतद्वयमेतदिति ज्ञायते । अत्र—

होत्री दीक्षा तु सिद्धान्ते तन्त्रे योजनिका स्मृता ।
त्रिके समावेशवती कुले स्तोभात्मिका मता ॥
सामरस्यमयी कौले दीक्षा पञ्चविधोदिता ।

इति तन्त्रालोकविवेक(भा० ८, पृ० १८२)धृतवचनमेतत् कुलकौलमतयोर्भिन्नत्वं पोषयति ।

३. शैवशब्देनात्र चतुर्धा विभक्तेषु शैवदर्शनेषु शैवसिद्धान्तभिन्नस्य विभागत्रयस्य परामर्शः ।

४. डा० प्रबोधचन्द्रबागचीमहोदयेन "स्टडीज इन द तन्त्राज" (पृ० ३) इत्यत्र विभागत्रयमेतत् प्रतिपादितम् ।

In Public domain. Digitization Muthulakshmi Research Academy

स्वच्छन्दादीनि तंत्राणिं दक्षिणं शैवमुच्यते ।
कामिकादीनि तंत्राणि सिद्धान्ता इति कीर्तिताः ॥ (२६।५९-६०)

ितागमभूमिकाधृतपूर्वकारणागमवचनात्, "वामदक्षिणसिद्धान्तभेदत्रयविभेदतः" (१६।२) नेत्रतन्त्रापराभिधमृत्युञ्जयभट्टारकवचनाच्च । शिव एव सदाशिव-भैरव-तुम्बुरुरूपधारी न्त-वाम-दक्षिणस्रोतसामुपदेष्टेति नेत्रतन्त्रत[2] एव ज्ञायते । सिद्धान्तशिखामणौ तु शैवा-तुर्धा व्याख्यातः—

शक्तिप्रधानं वामाख्यं दक्षिणं भैरवात्मकम् ।
सप्तमातृपरं मिश्रं सिद्धान्तं वेदसम्मतम् ॥ (५।११)

व वचनं पूर्वोक्तं कारणागमवचनमुपोद्बलयद् मिश्राख्यं चतुर्थं विभागं प्रतिपादयति । वागचीमहोदयै[1]र्भैरवस्रोतश्चतुर्थत्वेन परिगणितः । अजितागभूमिकायां च कापाल-काला-अघोरादयो वामभेदे, स्वच्छन्दभैरवादिद्विनवतिशैवागमाश्रितं त्रिकमिति संज्ञितं कश्मीर-र्शनं च दक्षिणभेदेऽन्तर्भावितम् । उभयत्र मूलं मृग्यम् । "भैरवागमेषु दक्षिणस्रोतः-येषु स्वच्छन्दचण्डत्रिशिरोभैरवादिषु" (भा० १, पृ० २२५) इति नेत्रतन्त्रोद्योते क्षेमराजो ागमानां दक्षिणस्रोतोऽनुवर्तित्वमेव प्रदर्शयति । कापाल-कालामुख-अघोरादीनि तन्त्राणि शास्त्रं च भिन्नान्येव । नहि तानि शुद्धशैवविभागे क्वापि परिगणितानि । त्रिकदर्शनं च यायिभिः सर्वत्र पृथगेव पर्यगण्यत । साम्प्रतं तन्त्राणां वा[4]मदक्षिणमार्गभेदेन द्विविधो गः प्रचलितो दृश्यते । तदनुरुध्य यथाकथञ्चिदेतत्समाधातुं शक्येत ।

ोतोविभागः

नेत्रतन्त्रे "पञ्चस्रोतोविनिर्भिन्नम्" (१९।३३) इत्यत्र पञ्च स्रोतांसि सूचितानि, परि-ानि च तानि मृगेन्द्रागमे चर्यापादे—

ुम्बुरोश्चतुर्मुखेभ्यो विनिःसृतानि शिरश्छेद-विनाशिख-संमोह-नयोत्तराणि तन्त्राणीति, योगवासिष्ठ(निर्वाण, १।१८।२३–२६)प्रामाण्याच्च तुम्बुरुभैरवौ शिवस्यावतारा-विति च डा० प्रबोधचन्द्रबागचीमहोदयाः प्रतिपादयन्ति (स्टडीज इन द तन्त्राज, पृ० २, २२)। तुम्बुरोः शिवावतारत्वं नेत्रतन्त्रप्रामाण्येनापि (९।११) समर्थ्यते, किन्त्वत्र वाममार्गोपदेष्टृत्वं तुम्बुरोरुच्यते । कम्बुजशिलालेखे तु तुम्बुरोरेव चतुर्मुखेभ्यश्चतुर्णां शास्त्राणामवतार इति विशेषः ।
शिवः सदाशिवश्चैव भैरवस्तुम्बुरुस्तथा" (९।११) इति नेत्रतन्त्रे, "सिद्धान्तवाम-क्षिणादिशास्त्रोक्त···" इति तत्रैवोद्योते ।
टडीज इन द तन्त्राज, पृ० ३
त्र "वामावर्तेन पूजयेत्" (१।१७६) इत्यत्रत्यो नित्याषोडशिकार्णवसेतुबन्धः पृ० ८९–९०), ललितासहस्रनामस्थितस्य 'सव्यापसव्यमार्गस्था' (श्लो० २२०, ० १८१–१८४) इति नाम्नः सौभाग्यभास्करव्याख्यानं चेति भास्कररायस्य न्थद्वयमवलोकनीयम् ।

स्रोतांसि कामिकाद्यूर्ध्वमसिताङ्गादि दक्षिणम् ।
संमोहाद्युत्तरं प्राच्यं श्रोतलादि सुविस्तरम् ॥
आप्यं चण्डासिधारादि चण्डनाथपरिग्रहम् । (१।३५-३६)

आप्यं पश्चिममित्यर्थः ।

तन्त्रालोकविवेक[1]धृतश्रीकण्ठ्यामपि दशाष्टादशभेदभिन्नं शिवरुद्राभिधं ज्ञानमूर्ध्वमुखो-द्गतमेवाङ्गीकृतम् । चतु[2]र्विंशतिभेदो दक्षिणो मार्गः, चतुष्षष्टिरद्वयप्रधाना भैरवभेदाश्च दक्षिणवक्त्रनिःसृताः, तत्पुरुषवक्त्रतोऽष्टाविंशतिभेदं गारुडं तन्त्रम्, पश्चिमतो भूततन्त्राणि च निःसृतानीति तत्रोक्तम् । वामदेवमुखात्तु यज्जातं तत्तत्र नोद्धृतम् ।

शतरत्नसंग्रहोल्लेखनीधृतकामिकागमे—

सिद्धान्तं गारुडं वामं भूततन्त्रं च भैरवम् ।
ऊर्ध्वपूर्वकुबेराप्ययाम्यवक्त्राद् यथाक्रमम् ॥

इति दृश्यते । व्याख्यातं च तत्र—"ऊर्ध्वपूर्वकुबेरवरुणयाम्यसंबन्धाद् मुक्तिप्रदसिद्धान्त-सर्व-विषहरणगारुड-सर्ववशीकरणवाम-भूतग्रहनिवारकभूततन्त्र-शत्रुक्षयकरभैरवसंज्ञकम्" (पृ० ९)इति।

अजितागमेऽन्य[3]त्र च दशाष्टादशभेदभिन्नाः शैवा रौद्राश्चागमाः शिवस्य पञ्चवक्त्रेभ्यो विनिर्गता इत्युक्तम् । तदयमजितागमस्थः क्रमः—

ऊर्ध्व(ईशान)मुखोद्भवाः—कामिकं योगजं चिन्त्यं कारणम् अजितं दीप्तं सूक्ष्मं सहस्रम् अंशुमत् सुप्रभेदं च ।
सद्योजातमुखोद्भवाः—विजयं पारमेशं निश्वासं प्रोद्गीतं मुखबिम्बं च ।
वामदेवमुखोद्भवाः—सिद्धं सन्तानं शर्वोक्तं चन्द्रज्ञानं विमलं च ।
अघोरमुखोद्भवाः—स्वायम्भुवं वीरं रौरवं मकुटं किरणं च ।
तत्पुरुषमुखोद्भवाः—ललितम् आग्नेयं वातुलं च ।

अन्य[4]त्र तु—

ईशानमुखोद्भवाः—प्रोद्गीतं ललितं सिद्धं सन्तानं शर्वोक्तं पारमेश्वरं किरणं वातुलं च ।

---

१. द्रष्टव्यानि तत्रत्यानि ४०–४४ पृष्ठानि प्रथमभागस्य ।
२. चतुर्विंशतिभेद एष दक्षिणो मार्गो नान्यत्र क्वापि विवृतो दृश्यते ।
३. मालिनीविजयवार्त्तिके (पृ० ३६–३८) तदनुवर्तिनि तन्त्रालोकविवेके च (भा० १, पृ० ३६–४१) शिवस्य पञ्चवक्त्रेभ्यो दशानां शैवागमानामष्टादशानां रौद्रागमानां चतुष्षष्टिसंख्याकानां च भैरवागमानामाविर्भावप्रकारो निरूपितः । एष च विषयः परमश्रद्धास्पदैः कविराजमहोदयैः "तान्त्रिक वाङ्मय में शाक्तदृष्टि" इत्याख्ये स्वकीये ग्रन्थे (पृ० ४६–४९) स्पष्टं व्याख्यातस्तत एवावलोकनीयः ।
४. रौरवागमप्रथमभागभूमिकाया एकादशं पृष्ठम्, हिन्दीविश्वकोशस्य पञ्चमे खण्डे 'तन्त्र-साहित्य' इति शब्दस्य विवरणं (पृ० २८०) च द्रष्टव्यम् ।

In Public domain. Digitization: Muthulakshmi Research Academy

ातमुखोद्भवाः—कामिकं योगजं चिन्त्यं कारणम् अजितं च ।
नमुखोद्भवाः—दीप्तं सूक्ष्मं सहस्रम् अंशुमत् सुप्रभेदं च ।
मुखोद्भवाः—विजयं निश्वासं स्वायम्भुवम् अनलं वीरं च ।
षमुखोद्भवाः—रौरवं मकुटं विमलं चन्द्रज्ञानं बिम्बं च ।

क्रमो दृश्यते । आगमानामेतेषां वक्तारोऽनुवक्तारः श्रोतारश्च, श्लोकसंख्या, २०७ संख्याका माश्चाजितागमेऽन्यत्र चोपवर्णिताः । पाठभेदादिप्रदर्शनमुखेन त इमे पाण्डिचेरीतो मुद्रिते ागमप्रथमभागे चर्चितास्तत एवावलोकनीयाः ।

ोतांसि

मृगेन्द्रागमे चर्यापादेऽनुस्रोतांस्यष्टौ कथितान्येवम्—शैवम्, मान्त्रेश्वरम्, गाणम्, दिव्यम्, ्, गौह्यकम्, योगिनीकौलम्, सिद्धकौलं च । तत्र—

योगिन्यो लेभिरे ज्ञानं सद्यो योगावभासकम् ।
येन तद्योगिनीकौलं नोत्तीर्णं ताभ्य एव तत् ॥ (१।४०)

योगिनीकौललक्षणम् । अन्येषां लक्षणानि तत एवावसेयानि । इति स्रोतोविभागप्रपञ्चः ।

िभागः

अधुना पीठविभागः प्रदर्श्यंते । स च चतुर्विधः, विद्यापीठ-मन्त्रपीठ-मुद्रापीठ-मण्डल- ादात् । डा० वागचीमहोदयेन[1] ब्रह्मयामलस्य स्रोतोनिर्णयाख्यस्य ३९ तमपटलस्याधारेणैष ाः परिगणितः । विवरणं तु तत्र न दृश्यते । ब्रह्मयामलस्य मातृका नास्त्यस्माकं सविधे, त्र विषये न किमपि विशेषेण वक्तुं पारयामः । अस्मिन्नेव ग्रन्थेऽन्यत्रोद्धृतेभ्यो[2] ब्रह्मया- चनेभ्य एतावदेव ज्ञायते यद्भैरवाष्टकं यामलाष्टकं च विद्यापीठाद्विनिर्गतम्, योगिनीजाल- ीहृदय-मन्त्रमालिनी-अघोरेशी-अघोरेश्वरी-क्रीडाघोरेश्वरी-लाकिनीकल्प-मारीचि-महामारी- द्यागणतन्त्राणि विद्यापीठसंबद्धानि, वीरभैरव-चण्डभैरव-गुडकाभैरव-महाभैरव-महा- ा मुद्रापीठसंबद्धा इति । जयद्रथयामलं विद्यापीठसंबद्धमेवेति तत्पुष्पिकावाक्येभ्यो । स्वच्छन्दोद्योतधृते[3] सर्ववीरे तु भैरवाष्टकं मन्त्रपीठात्मकमित्युक्तम् । स्वच्छन्दं[4] ीठं महातन्त्रमिति स्वच्छन्दतन्त्रमाह । एतं चार्थमुपोद्बलयति तत्रैव स्वच्छन्दोद्योते ्मेतत्सर्ववीरवचनम्—

डीज इन द तन्त्राज, पृ. ३ ।
व, पृ. १०४—१०५
च्छन्दभैरवश्चण्डः क्रोध उन्मत्तभैरवः । ग्रन्थान्तराणि चत्वारि मन्त्रपीठं वरानने ॥
भा० १, पृ० १०)
ुष्पीठं महातन्त्रं चतुष्टयफलोदयम् ॥ (१।५)

मुद्रामण्डलपीठं तु मन्त्रपीठं तथैव च ।
विद्यापीठं तथैवेह चतुष्पीठा तु संहिता ॥ इति ।

अर्थरत्नावलीधृतसंकेतपद्धतिग्रन्थे ओड्याण-पूर्णगिरि-जालन्धर-कामरूपपीठानि क्रमश आज्ञापीठ-मन्त्रपीठ-विद्यापीठ-मुद्रापीठत्वेन व्याख्यातानि । किमेतेन नैतदुन्नेतुं शक्येत यदेतेभ्यश्चतुर्भ्यः पीठेभ्य आविर्भूतानि तानि तानि तन्त्राणि विद्यापीठादिविभागेषु विभक्तानीति । तर्हि पूर्वोद्धृतस्वच्छन्द-सर्ववीरवचनयोश्चतुष्पीठात्मकतन्त्रसंहिताप्रतिपादकयोः का गतिः ? महार्थ-मञ्जरीपरिमलधृतचरणसूत्रे पीठचतुष्टयस्यास्य व्याख्यानमेवं दृश्यते—

विद्येति मातृकापीठं तत् पार्थिवमुदाहृतम् ।
मण्डलं कुण्डलीपीठं तदाप्यं परिकीर्तितम् ॥
मन्त्रसंज्ञं क्रियापीठं तैजसं तत् प्रकीर्तितम् ।
ज्ञानपीठं तु मुद्राख्यं तद्वायव्यं सुरेश्वरि ॥
परेच्छामुखतो व्योम पीठत्वेनेह नाद्दतम् । इत्यादि ।

अत्र हि पीठानां पार्थिवत्वादिकं प्रतिपाद्यते । विषयान्तरोपादानादेतदुपस्थितानां प्रश्नानां समाधानाय नालम् । तन्त्रालोके स्थलद्वयमेतत्संबद्धमवलोक्यते[1] । तत्रैकोनत्रिंशाह्निके जय-रथः—"इह विद्यामन्त्रमुद्रामण्डलात्मतया चतुष्पीठं तावच्छास्त्रम् । तत्र मन्त्रमुद्रात्मनः पीठद्वयस्य संप्रदाय उक्तः । इदानीमत्रैवावशिष्टस्य विद्यामण्डलात्मनोऽप्यस्य संप्रदायं निरूपयति" (पृ.११४) इत्यवतरणिकामाह । पूर्वोद्धृतस्वच्छन्दसर्ववीरवचनानुगुणमेतद्व्याख्यानम् । तेनैवं प्रतीयते यद्यथा सिद्धान्ताद्यागमा ज्ञानक्रियाचर्यायोगप्रतिपादकास्तथैव दक्षवामकौलाद्यागमा विद्यामन्त्रमुद्रामण्डलाभिधायका इति । अग्रे च सप्तत्रिंशाह्निके शास्त्रस्य पञ्चस्रोतोमयत्व-मभिधाय पीठचतुष्टयात्मकत्वं न्यरूप्यत । उपसंहृतं चैवम्—

विद्यापीठप्रधानं च सिद्धयोगीश्वरीमतम् ॥
तस्यापि परमं सारं मालिनीविजयोत्तरम् । (३७।२४-२५)

अत्रागमशास्त्रस्य स्रोतोविभागवत् पीठविभागोऽप्यङ्गीक्रियते । अत्रैवं समाधातुं शक्यते यत्कानिचन तन्त्राणि विद्यापीठादिषु कस्यचनैकस्यैव प्रतिपादकानि, अन्येषु च पीठचतुष्टय-मपि व्याख्यायत इति । विषयोऽयमन्येषां ब्रह्मयामलादीनां प्राचीनानां तन्त्राणां संजाते प्रकाशने विशदीभवेत् ।

आम्नायविभागः

तृतीय आम्नायविभागो विभागद्वयापेक्षया प्रसिद्धतर इति डॉ० वागचीमहोदयाः[2] ।

१. अत्रत्यानि २२०—२२२ पृष्ठानि द्रष्टव्यानि ।
२. द्रष्टव्यम्—स्टडीज इन द तन्त्राज, पृ० ३ ।

In Public domain. Digitization Muthulakshmi Research Academy

इमे चाम्नायाः[1] शिवस्य तत्पुरुष-सद्योजात-अघोर-वामदेव-ईशानाख्येभ्यः पञ्च वक्त्रेभ्यो निःसृता क्रमशः पूर्व-पश्चिम-दक्षिण-उत्तर-ऊर्ध्वाम्नायपदभाजो विद्यन्ते[2] । स एव दिग्विभाग-क्रमस्तन्त्रालोकेऽपि (१५।२०४-२०५) स्वीकृतः । स्रोतोविभाग आम्नायविभागश्च शिवस्य पञ्चवक्त्रेभ्यो विनिर्गत इति नामभेदं विहाय न कोऽपि भेदोऽत्र दृश्यते, अथापि स्रोतोविभागः शैवागमसंमतः, आम्नायविभागश्च शाक्तागमसंमत इति वक्तुं शक्यते, स्रोतोविभागे शैवागमानामाम्नायविभागे च शाक्तागमानामूर्ध्ववक्त्रोद्भवत्वस्य स्वीकारात् । कुलार्णवेऽत्र कश्चन विशेषः परिदृश्यते[3]—

मन्त्रयोगं विदुः पूर्वं भक्तियोगं च दक्षिणम् ।
पश्चिमं कर्मयोगं च ज्ञानयोगं तथोत्तरम् ॥
पूर्वाम्नायस्य संकेताश्चतुर्विंशतिरीरिताः ।
दक्षिणाम्नायसंकेताः पञ्चविंशतिरीरिताः ॥
पश्चिमाम्नायसंकेता द्वात्रिंशत् समुदाहृताः ।
विदुः षट्त्रिंशदाम्नाये संकेताः श्रीमदुत्तरे ॥
ऊर्ध्वाम्नायस्य चैतानि न सन्ति कुलनायिके । (३।४२-४५)

नित्याषोडशिकार्णवे तु "चतुराज्ञाकोशभूताम्" (१।१२) इत्यत्र चत्वार एवाम्नाया अङ्गीकृताः । व्याख्यातं त तथैव शिवानन्दविद्यानन्दाभ्याम् । अमृतानन्दादिग्रन्थेष्वपि तथैव दृश्यते । भास्कररायेण तु "ऊर्ध्वाम्नायस्यापि चतुःपदमुपलक्षकम्" (से० पृ० २०) इति वदता पञ्चाम्नाया अत्राङ्गीकृताः । वरिवस्यारहस्यप्रकाशे तु तेनापि—"अन्वयाः प्राग्दक्षिणपश्चिमान्वया उत्तरान्वयश्च । एत एव समयपदेनाम्नायपदेन च कथ्यन्ते" (पृ० २३) इत्येवं चत्वार एवाम्नाया इति प्रतिपादितम् । अत्राम्नायविभागः समयपदेनान्वयपदेनापि चाख्यातः । दृश्यते चैतयोः पदयोः प्रयोगोऽमृतानन्दादिग्रन्थेष्वपि ।

सौन्दर्यलहर्यां "रसाम्नायमहसा" (१।१०) इति पदेन षडाम्नायाः सूच्यन्ते । "रसाम्नायाः षडाम्नायाः पूर्वदक्षिणपश्चिमोत्तरोर्ध्वानुत्तराः" (पृ० १७) इति व्याख्यातं च कैवल्याश्रमेण । नेत्रतन्त्रोद्योतेऽपि—

---

१. कुलार्णवेऽपि—

मम पञ्चमुखेभ्यश्च पञ्चाम्नायाः समुद्गताः ।
पूर्वश्च पश्चिमश्चैव दक्षिणश्चोत्तरस्तथा ॥
ऊर्ध्वाम्नायश्च पञ्चैते मोक्षमार्गाः प्रकीर्तिताः । (३।७)

२. पञ्चभिर्मुखैः पञ्चाम्नायान्···प्रणिनाय" (१।२) इति परशुरामकल्पसूत्रव्याख्याने तु—"पञ्चभिर्मुखैः सद्योजात-वामदेव-अघोर-तत्पुरुष-ईशानसंज्ञकैः पञ्चाम्नायान् पूर्वाम्नाय-दक्षिणाम्नाय-पश्चिमाम्नाय-उत्तराम्नाय-ऊर्ध्वाम्नायनामकान्" (पृ० २१) इति क्रमो दृश्यते ।

३. कुलार्णवतन्त्रस्य तृतीय उल्लासोऽवलोकनीयः ।

गारुडे मातृतन्त्रे च वामे स्रोतसि दक्षिणे ।
ज्येष्ठे चण्डासिधारे च प्रत्यक्षफलदा क्रिया ॥ (१६।७६)

एतस्य व्याख्याने षट्स्रोतांसि व्याख्यातानि । तद्यथा—"गारुडे पूर्वस्मिन्, मातृतन्त्रादौ पश्चिमे, जयादित्रये वामे, भैरवशास्त्रे च दक्षिणे, चण्डासिधारादावूर्ध्वे, ज्येष्ठे च मतकुलादौ रहस्ये स्रोतसि" इति । तन्त्रालोकोऽप्येनमर्थमुपोद्वलयति । तद्यथा—

ईशे ऊर्ध्वं प्रकाशत्वात् पूर्वं वक्त्रं प्रसारि यत् ।
पुरुषो दक्षिणा चण्डो वामा वामस्तु सौम्यकः ॥
पराङ्मुखतया सद्यः पश्चिमा परिभाष्यते ।
पातालवक्त्रमधरमप्रकाशतया स्थितेः ॥ (१५।२०४-२०६)

व्याख्यातं च विवेककारेण—"यद् यस्मादीशः प्रकाशैकरूपत्वादूर्ध्वा दिगुच्यते, तत्पुरुषः प्रकाशोन्मुख्येन प्रसरणात् पूर्वा, अघोरः प्रसृतप्रकाशोद्रेकानुकूल्याद् दक्षिणा, वामदेवस्तत्प्रातिकूल्याद् मेयेन्दुसंस्पर्शप्रधाना वामा उत्तरा, सद्योजातः प्रकाशवैमुख्यात् पश्चिमा, पिचुवक्त्रं प्रकाशसंस्पर्शायोग्यत्वादधरा चेति" (पृ० १०२) इति । एवं च षडाम्नायविभागोऽपि प्राचीन एवाभिमन्तव्यः ।

आम्नायविभागे त्रिपुरोपास्तेः स्थानम्

तदेवमत्र शैवानां शाक्तानां च तन्त्राणां त्रिस्रोतोविभागः, पञ्चस्रोतोविभागः, अनुस्रोतोविभागः, पीठविभागः, चतुःपञ्चषडाम्नायविभागश्च व्याख्यातः । तत्र स्रोतोविभागः प्राधान्येन शैवानाम्, पीठविभागो भैरवागमानां कौलागमानां च, आम्नायविभागश्च शाक्तागमानामभिमत इति प्रतीयते ।

त्रिपुरा विद्या चतुराम्नायसाधारण्यपि दक्षिणपक्षपातिनीति विद्यानन्दः (अर्थ० पृ० ४१) ऊचे । इममर्थममृतानन्दोऽपि (दी० पृ० ११०) संमनुते । दक्षिणपक्षपातिनीतिपदेन भैरवागमानुवर्तित्वमस्य ख्याप्यते । त्रिपुरसुन्दरीदण्डके—"सुस्फुटं वाममार्गस्य सर्वोत्तमत्वं समुपदिश्यते" इत्युक्तवता दीपकनाथेन त्रिपुराविद्यायां वाममार्गसेव्यत्वमप्युपदिष्टम् । एवं च दक्षवामाभ्यामुभाभ्यामपि मार्गाभ्यां रुचिभेदेन देवी महात्रिपुरसुन्दरी समुपास्यते साधकैः । तत्र वामो मार्गः कौलानाम्, दक्षश्च तदितरेषामिति वक्तुं शक्यते ।

लक्ष्मीधरप्रतिपादितं त्रिपुरोपास्तिमतत्रयम्

सौन्दर्यलहरीव्याख्यात्रा लक्ष्मीधरेण तु त्रिपुरोपासनायां मतत्रयमुपपादितम्—कौलमतम्, मिश्रमतम्, समयिमतं चेति[1] । तत्र कौलानां चतुष्षष्ट्यागमा नित्याषोडशिकार्णवे[2] प्रदर्शिताः ।

---

१. द्रष्टव्यम्—पृ० १३७-१४१ ।

२. प्रथमे पटले १४–२१ श्लोकेषु । एते च पूर्वमत्र निर्दशिताः ।

श्रमतानुयायिनामष्टौ आगमांश्चन्द्रकलाज्योत्स्नावतीप्रभृतयः । समयिनां तु शुभागमपञ्चकम् । त्रविधानामेषामागमानां परिचयस्तेन "चतुष्षष्ट्या तन्त्रैः" (१।३१) इति श्लोकस्य व्याख्याने वस्तरेण प्रत्यपादीत्युक्तप्रायम् । वसिष्ठसनकशुकसनन्दनसनत्कुमारैः पञ्चभिर्मुनिभिः शुभागम-ञ्चकनाम्ना प्रथितासु पञ्चसु संहितासु प्रदर्शितो मार्गः समयाचारनाम्ना व्यवह्रियते । समया-चारो नाम आन्तरपूजारतिः । समयिनां मते समयस्य सादाख्यतत्त्वस्य सपर्या सहस्रदलकमल एव क्रियते, न तु बाह्ये पीठादौ । कुलाचारो नाम बाह्यपूजारतिरिति लक्ष्मीधर आह (पृ० ६४, १२९) । अपि च, श्रीचक्रस्य वियच्चक्रमिति नामान्तरमस्ति । वियच्चक्रत्वं तु वियत्पूज्यत्वात् । वियत्पूज्यत्वं द्विविधम्—दहराकाशजं बाह्याकाशजं चेति । बाह्याकाशजं नाम बाह्याकाशावकाशे पीठादौ भूर्जपत्रशुद्धपटहेमरजतादिपट्टतले लिखित्वा समाराधनम् । एतदेव कौलपूजा । दहराकाशजं नाम हृदयाकाशावकाशे चक्रस्य पूजनम् । इदमेव समयपूजा (पृ० ६४) । किञ्च, पञ्चशक्तिचतुर्वह्निसंयोगात् श्रीचक्रस्य निष्पत्तिः सर्वत्र प्रतिपाद्यते । स्वाभिमुखाग्रत्रिकोणपरम्परायाः शक्तिसंज्ञात्वम्, विपरीतायाः वह्निसंज्ञात्वमिति समयः (ऋजु० पृ० ५०) । कौलमतानुसारेण त्वधोमुखानि चत्वारि त्रिकोणानि शिवात्मकानि, ऊर्ध्वमुखानि पञ्च त्रिकोणानि शक्त्यात्मकानि (ल० पृ० ७२) । कौलमते संहारक्रमेण श्रीचक्रस्य लेखनं भवति, समयिनां मते तु सृष्टिक्रमेण (ल० पृ० ७२, ७९, ८१-८३) ।

कौलमतं द्विविधम्—पूर्वकौलम्, उत्तरकौलं च । तत्र "शरीरं त्वं" (१।३४) इत्येष श्लोकः पूर्वकौलमतप्रतिपादकः । अत्र भैरवीभैरवयोर्नवविधैक्यं प्रतिपाद्यते । "मनस्त्वं" (१।३५) इत्यादिकश्च श्लोक उत्तरकौलमतप्रतिपादकः । "त्वया हृत्वा" (१।२३) इत्य-स्मिन् श्लोकेऽप्युत्तरकौलसिद्धान्त एव प्रतिपाद्यते । उत्तरकौलसिद्धान्ते शक्तितत्त्वादन्यत् शिवतत्त्वं नास्ति । अतश्च शिवतत्त्वं शक्तितत्त्वेऽन्तर्भूतमिति तदेवोपास्यम् (पृ०१२२) । "तवाज्ञाचक्र" (१।३६) इत्यादिश्लोकषट्केन सामयिकं मतं निरूप्यते । एवमेव "कदा काले" (२।४९) इत्यत्र चरणनिर्णेजनजलमिति वदता समयिमतमेवोक्तम् । कौलमते भुजगाका-रेणैव देव्या अवस्थानाच्चरणनिर्णेजनजलस्याभावात् सहस्रकमल एव चरणनिर्णेजनजलस्योप-लब्धेः । अत एव "सुधाधारासारैः" (१।१०) इतीदमर्धं समयिमतप्रतिपादकम्, "अवाप्य स्वां" (१।१०) इतीदमर्धं च कौलमतप्रतिपादकम् (पृ० २८२) । शिरःस्थितं चन्द्रमण्डलं सर्वयोगशास्त्रसिद्धम् । तत्तु समयिनां मते श्रीचक्रमेव चन्द्रमण्डलम्, षोडशकलात्मकत्वात् । श्रीविद्यायाः प्रतिपदादिषोडशदिनेषु कलावृद्धिक्षययोर्वक्ष्यमाणत्वाच्चन्द्रमण्डलमेतदेव । अतश्च शिरःस्थितसहस्रदलकमलान्तर्गतश्रीचक्रात्मकशशिबिम्बमध्यस्थिताया भगवत्याश्चरणकमल-निर्णेजनजलैः सुधामयैः साधकस्य सकलशरीरं संप्लाव्य पुनर्भुजङ्गरूपेणाधारकुण्डं प्रविश्य सुषुम्नामवष्टभ्य सा भगवती स्वपितीति श्लोकस्यास्याभिप्रायः (पृ०७६) । एवमुपर्युद्धृतस्थलेषु

१. "भूवस्त्रकायपीठाख्यं धाम चोत्कर्षभाक् क्रमात्" (२९।१५) इति तन्त्रालोके ।

श्लोकेषु "सरस्वत्या लक्ष्म्या" (२।५८) इति श्लोकव्याख्यायां च लक्ष्मीधरेण समयिसिद्धान्त-रहस्यं कौलसिद्धान्तरहस्यं च साधु प्रतिपादितम् । विशेषजिज्ञासुभिस्तत्तत एवावलोकनीयम् ।

चन्द्रकलाविद्याष्टकं तु कुलसमयानुसारित्वेन मिश्रकमित्युच्यते । चतुष्षष्टितन्त्राणि कुलमार्ग एव । "मिश्रकं कौलमार्गं च परित्याज्यं हि शाङ्करि" इतीश्वरवचनाद् मिश्रकमतं कौलमार्गं च परित्याज्यम् । शुभागमपञ्चकमेव वैदिकैरादरणीयम्, केवलसमयमार्गप्रदर्शन-परत्वात् (ल० पृ० १४०-१४१) ।

एवमस्यां लक्ष्मीधरप्रतिपादितायां समयिमताख्यत्रिपुरोपासनायां तान्त्रिकोपासनाया वैदिकीकरणप्रक्रिया परिसमाप्यते । एवमत्र प्रतीयते—हिंसाबहुलं वैदिकं कर्मकाण्डं बुद्ध-महावीरादिभिः समालोचितं सद् यथा साम्प्रतं विरलतामापेदे, तथैव सौन्दर्यलहरीकारेण लक्ष्मीधरप्रभृतिभिश्च—"अर्घपात्रं यागधाम दीप इत्युच्यते त्रयम् । रहस्यं कौलिके यागे तत्रार्घः शक्तिसंगमात् ॥" (तन्त्रा० २९।१४-१५) इत्यभिनवगुप्तप्रदर्शितं रहस्यात्म कौलिकं बाह्यमर्चनं निषिध्य योगप्रधानमान्तरमर्चनं समयिमतनाम्ना वैदिकप्रक्रियायां परिगृहीतमिति ।

अर्थरत्नावल्यां (पृ० ७४) अकुल-कुल-कुलाकुल-कौल-शुद्धकौलाख्यकुलपञ्चकशास्त्रं स्मर्यते । सरस्वतीभवनस्थायां २१९२२ संख्याकायामम्बास्तवव्याख्यामातृकायां २१३ पृष्ठे सुभगोदयादिप्रामाण्येन कौलानां सप्तभेदाः प्रदर्शिताः । तदित्थम्—तत्र कौला द्विविधाः— पूर्वकौला उत्तरकौलाश्च । तत्रापि पूर्वकौलास्त्रिविधाः—मूलाधारनिष्ठाः, स्वाधिष्ठाननिष्ठाः, उभयनिष्ठाश्चेति । उत्तरकौलाश्चतुर्विधाः—मातङ्गी, वाराही, कौलामुखी, तन्त्रनिष्ठा चेति । पदोत्तिष्ठकौल-महाकौल-मूलकौल-योगिनीकौल-वह्निकौल-वृषणोत्थकौल-सिद्धकौलाख्या इतो भिन्नाः सप्तभेदाः कौलज्ञाननिर्णये व्याख्याता दृश्यन्ते । एतेषु योगिनीकौलसिद्धकौलौ मृगेन्द्रागमचर्यापादप्रदर्शिताऽनुस्रोतोविभागे पठितौ । चतुष्षष्टितन्त्राणां कौलिकादिमत-प्रतिपादकत्वेन हेयत्वदर्शनपरं लक्ष्मीधरव्याख्यानमत्र पूर्वं समालोचितम् । श्रीचक्रस्योभयविध-मपि समुपासनं लक्ष्मीधरेण समयिमतकौलिकमतनाम्नोपपादितमृजुविमर्शिन्यामर्थरत्नावल्यां च दृश्यते । शाक्तागमेषु शक्तिपारम्यपक्ष एवाश्रीयत इति प्रतिपादयिष्यते पुरस्तात् । कुलार्णवादिषु शाक्तागमग्रन्थेषु कौलसिद्धान्तस्य सर्वोत्कृष्टत्वं ख्याप्यते । अभिनवगुप्तपादोऽपि कौलिकं सिद्धान्तं श्रद्धया समुपास्ते, भास्कररायोऽपि । एवं च लक्ष्मीधरस्यैतत्कुलसमयि-मतप्रतिपादनं तस्य वैदिकसिद्धान्तेषु श्रद्धातिशयमेव ख्यापयति, न वस्तुस्थितिम् । कौलिकसिद्धान्तानां तेषां भेदोपभेदानामुपासनापद्धतेश्च सम्यगधिगमाय प्राचीनानां ग्रन्थाना-मभिनवगुप्तप्रभृतिभिः सूचितानामधिगतिरावश्यकी । तदनन्तरमेव प्रामाण्यपुरस्सरं लक्ष्मीधरमतसमालोचनं विधीयेत ।

नित्याषोडशिकार्णवप्रथमसूत्रावतारणम्

नित्याषोडशिकार्णव ऋजुविमर्शिन्यां त्रिकदर्शनानुगुणमर्थरत्नावल्यां च कौलमतानुगुणं व्याख्यातः, वामकेश्वरदर्शननाम्ना च संकेतपद्धत्याम् । अत्रत्यः सर्वोऽपि विषय आद्ये सूत्रे क्रोडीकृत्य दर्शित इति तदेवात्र व्याख्याद्वयमाधृत्य विव्रियते ।

गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ।
देवीं मन्त्रमयीं नौमि मातृकापीठरूपिणीम् ॥

योगिनीहृदयेऽन्यत्र च विनायकवाचित्वेन प्रसिद्धोऽपि गणेशशब्दोऽत्र ऋजुविमर्शिन्यामर्थरत्नावल्यां च प्रपञ्चसारप्रामाण्येन श्रीकण्ठादिरुद्रपरत्वेन व्याख्यातः । किमत्र बीजमिति न जानीमः । ग्रहनक्षत्रयोगिनीराशयः सर्वत्रैकार्थका एव । यत्र विशेषस्तन्मूलग्रन्थटिप्पणीषु दर्शितः । देवीशब्दोऽत्र ऋजुविमर्शिन्यां (पृ० ९) महार्थमञ्जरीपरिमले च (पृ० १८०) सम्यग् व्याख्यातः । नास्त्यत्र किमप्यधिकं वक्तव्यमस्माकम् । योगिनीपदस्य टीकाटिप्पणीषु व्याख्यातेभ्योऽर्थेभ्यो व्यतिरिक्तोऽक्षोभ्यादिचतुष्षष्टियोगिनीरूपोऽर्थस्तन्त्रशास्त्रेषु विशेषतः कुलागमेषु दृश्यते, अष्टाष्टकपूजासु[2] तदर्थस्यैव परिग्रहणात् । सप्तकोटिमन्त्राणां जननी मातृकैव, अतोऽत्र मन्त्रपदविवरणात् पूर्वं मातृकैव व्याख्यायते । तदनु च मन्त्रपीठो ।

मातृकास्वरूपविमर्शः

नित्याषोडशिकार्णवे द्वादशश्लोक्यां प्रथमेष्वेकादशश्लोकेषु मातृकैव स्तूयते । परावागात्मानाहतभट्टारकपरमशिवस्वरूपा षट्त्रिंशत्तत्त्वप्रसरणहेतुभूता संविदत्र ऋजुविमर्शिन्यां (पृ०९) मातृकापदेनोक्ता । शब्दराशिर्मातृका मालिनी कालिकेत्यादिभिः पदैस्तत्र तत्र शास्त्रेषूच्यमाना परभैरवीयपरावागात्मिका मातृका ज्येष्ठारौद्र्यम्बिकाख्यशक्तिप्रसरसंभेदवैचित्र्येण सर्ववर्णोदयकारणभूता वर्णसंघट्टशरीराणां सप्तकोटिमहामन्त्राणां जननी । अत एव तन्त्रसद्भावे—"सर्वे वर्णात्मका मन्त्रास्ते च शक्त्यात्मकाः प्रिये । शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिका ॥" इत्येवं सा वर्णिता । "अखिलमनाहतमूर्तिर्मात्युत्तीर्णस्वरूपिणी तरति । कायति नानानामप्रपञ्चरूपेण मातृका देवी ॥" (१।६) इति च तस्या निरुक्तिरुक्ता सौभाग्यसुधोदये । अत्रायं भावः—शिवशक्त्यादिप्रतिनियतव्यपदेशासहिष्णुरनाख्यः परपरामर्शात्माऽनुत्तरः प्रकाश एवं परं तत्त्वम् । स एव स्वस्वातन्त्र्याद्विश्वमवबिभासयिषुः प्रथमं शिवशक्तिरूपतां स्वात्मन्यवभासयति, अकारादिहकारान्तां मातृकामुल्लासयतीति यावत् । अत्रानुत्तरलिपिरकारः, विमर्शरूपिश्च हकारः । एतमर्थम्—"अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः । हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः ॥" इति संकेतपद्धतिवचनमुपोद्बलयति । तन्त्रालोके—"अकुलस्यास्य देवस्य कुलप्रथनशालिनी । कौलिकी सा परा शक्तिरवियुक्तो यया प्रभुः ॥" (३।६७) अनेन स एवार्थः प्रतिपादितः ।

सरस्वतीभवनस्थायां २३६१६ संख्याकायां मातृकायां १७ तमे पत्रे, २५६१० संख्याकायां मातृकायां प्रथमे पत्रे च चतुष्षष्टियोगिनीनामानि दृश्यन्ते, तत्र न दृश्यतेऽक्षोभ्या । प्रपञ्चसारे (११।१६-२४), शारदातिलके (७।३५-४३) च योगिनीनामस्वक्षोभ्याऽऽदौ न परिगणिता । अतोऽत्र कौलिकाष्टाष्टकपूजासु परिगणितानां योगिनीनां नामावली गवेषणीया ।

२. द्रष्टव्यम्—योगिनीहृदयदीपिकायाम्, पृ० ३३५

वाक्चतुष्टयात्मिका मातृका

एष ह्यनुत्तरनाथोऽवस्थाचतुष्टयात्मना नादरूपेणावतिष्ठते । तच्चावस्थाचतुष्टयं विलयक्रमेण हत-अनाहत-अनाहतहत-अनाहतहतोत्तीर्णरूपम् । अत्रानाहतहतोत्तीर्णा परा वाक्, अनाहतहता पश्यन्ती, अनाहता मध्यमा, हता च वैखरी । एतच्च वातूलनाथसूत्रेषु तद्वृत्तौ च

---

१. नादोऽसौ तन्त्रालोके (५।९७–१००) ब्रह्मयामलप्रामाण्येन रावनाम्ना प्रतिपादितः । परावाग्रूपस्याहंविमर्शात्मनो रावस्य प्रथमं तावद्भूवादिभवत्वात् पश्यन्तीमध्यमावैखरीरूपतया त्रैविध्यम्, प्रत्येकं च स्थूलसूक्ष्मपरत्वेन त्रैविध्ये नवधात्वम् । एषां नवानामपि भित्तिभूतः परावागात्मा दशमः । सेयं परावागात्मा राविणी—

नदते दशधा सा तु विश्वानन्दप्रदायिका ।
चिणीति प्रथमः शब्दश्चिञ्चिणीति द्वितीयकः ॥
चीरवाकी तृतीयस्तु शङ्खशब्दश्चतुर्थकः ।
तन्त्रीघोषः पञ्चमश्च षष्ठो वंशरवस्तथा ॥
सप्तमः कांस्यतालस्तु मेघशब्दरवस्तथा ।
नवमो दावनिर्घोषो दशमो दुन्दुभिस्वनः ॥
नवशब्दान् परित्यज्य दशमो मोक्षदायकः ।

इत्येवं विवृता जयरथोद्धृतागमवचनैः । एव एवार्थो नेत्रतन्त्रोद्योते (२१।१९), चिद्वल्लीधृतपरमहंसोपनिषदि (पृ० ४९) च दशविधनादपदेनोक्तः । "चिञ्चिणीचीरवाकादिप्रभेदाद्दशधा ध्वनिः" (१२।१२) इति मालिनीविजये तु ध्वनिपदेनोक्तः सः । तन्त्रालोकविवेकधृतवचने (आ० ३, पृ० ७६) रावोऽयमेवं स्तुतः—

अनाहतहतोत्तीर्णो महाविषमचिद्गतिः ।
वीरहृद्घट्टनोद्युक्तो रावो देव्या विजृम्भते ॥

शिवपुराणादिषु हठयोगग्रन्थेषु च नादानुसन्धानविधेः कोऽपि महिमा वर्ण्यते । तदन्यत्र विस्तरेण प्रतिपादयिष्यते ।

२. अत्र च—"वाक्चतुष्टयोदयविरामप्रथासु स्वरः प्रथते" (७ सू०) इत्यादीनि सूत्राणि द्रष्टव्यानि । तेषु त्रयोदशसूत्रस्था वृत्तिरियं विशेषतोऽवधेया—"अकारस्य हतानाहतानाहतहतानाहतहतोत्तीर्णतया चतूरूपत्वम् । तत्र हतस्तावद् हृत्कण्ठताल्वादिस्थानकरणसंनिवेशैर्हतोऽकारादिहकारपर्यन्तनानापदार्थावभासकः । अनाहतश्चास्वरमूलोल्लसितपरनादविस्फारस्तन्त्रीमध्यमास्वरसंकेतक आकण्ठकूपान्तादुपचारतः कृतप्रतिष्ठः । अनाहतहतश्चोभयाश्रितोन्मिषितोऽहतो विश्रान्तशष्कुलीश्रवणगोपनोद्भिन्नप्रथः श्रवणयुग्ममध्यवर्त्याकाशात् तत्त्वप्रतिबिम्बतत्त्वदेहतोऽपि हतोऽनाहतहतः । अनाहतहतोत्तीर्णश्च महानिरावरणधामसमुल्लसितोऽविकल्प ईषच्चलत्तात्मकमहास्पन्दप्रथमकोटिरूपः स्वरः संकोचविकासविरहात् परमविकाशरूपोऽस्पर्शधर्मानुच्चार्यमहामन्त्रप्रथात्मकः । तथा चानाहतहतोतीर्णो यः स

In Public domain. Digitization Muthulakshmi Research Academy

स्पष्टम् । एवं च परावागात्मानाहतेत्यत्रानाहतपदेन ऋजुविमर्शिनीकारस्यानाहतहतोत्तीर्णावस्थैवाभिप्रेता ।

सा हि परा वाक् स्वस्वातन्त्र्योल्लासस्पन्दादेकाऽप्यनेकधा वितता भवति । तेन च वर्णाम्बिकायाः पश्यन्तीरूपमभिव्यज्यते । तच्चैकादशधा विभक्तं भवति । तद्यथा—अकारस्य शिवरूपस्य वामाज्येष्ठारौद्र्यम्बिकाख्यकलाचतुष्टयं तत्समष्टिरूपमकार इति पञ्चकम्, शक्तिरूपस्य हकारस्य इच्छाज्ञानक्रियाशान्ताख्यकलाचतुष्टयं तत्समष्टिरूपेण हकारेण सह पञ्चकम् । एवं द्वाभ्यां शिवशक्तिवर्णाभ्यामाद्यन्ताभ्यां दशकं जातम् । तयोः परस्परं बीजाङ्कुरन्यायेन समरसभावादेकमित्येकादशधा पश्यन्ती । एष चार्थः—"आ[1]दावस्य शिरो रौद्री" इत्यादिना संकेतपद्धतावुक्तः, व्याख्यातश्च तथैव विद्या[2]नन्दपुण्या[3]नन्दामृता[4]नन्दादिभिः । सौभाग्यसुधोदयेऽपि—

एकाऽप्येकादशधा जाता माता परैव पश्यन्ती ॥
पश्यति सर्वं स्वात्मनि करणानां सरणिमपि यदुत्तीर्णा ।
तेनेयं पश्यन्तीत्युत्तीर्णेत्यप्युदीर्यते माता ॥ (पृ० ३०७)

पश्यन्तीतोऽनाहताख्या नादनवकमयी मध्यमा वाग् भवति । शून्यस्पर्शनादध्वनिबिन्दुशक्तिबीजाक्षरक्रमात्मना विकृतनादाष्टकं तत्समष्टिरूपं नवममित्येवं ना[5]दनवकमवगन्तव्यम् । यतो

भृङ्गाटकाकारो रौद्रीस्वभावस्तुर्यः । अनाहतहतश्चानचक्रकलात्मकवक्त्रसंस्थानो वामारूपः सुषुप्तः । अनाहतश्च बाहुरूपाम्बिकाशक्तिर्या आगमे निरूपिता तत्स्वरूपः स्वप्नः । हतश्चायुधाकारो ज्येष्ठास्वभावो जाग्रत्" (पृ० १६–१७) इति । अनेन—

अकारस्य शिरो रौद्री वक्त्रं वामा प्रकीर्तिता ।
अम्बिका बाहुरित्युक्ता ज्येष्ठा चैवायुधं स्मृता ॥

इति श्लोकार्थोऽपि विवृतो भवति ।

१. योगिनीहृदयदीपिका, पृ० १७०–१७१ ।

२. अर्थरत्नावली, पृ० ३५ ।

३. कामकलाविलासः, पृ० ४३, श्लो० २३–२४ ।

४. योगिनीहृदयदीपिका, पृ० १७० ।

५. शून्यः स्पर्शस्तथा नादो ध्वनिर्बिन्दुस्तथैव च ।
शक्तिबीजाक्षरं चैवेत्यष्टधाऽनाहतः स्मृतः ॥

इति संकेतपद्धतिवचनव्याख्यानमुखेनार्थरत्नावल्यादिष्वेतन्नादनवकं वर्ण्यते । एतच्च मूलाधारादिषट्के नादे नादान्ते ब्रह्मरन्ध्रे चावतिष्ठत इति भास्करराय: (व० र० पृ० १७) आह । अर्थरत्नावलीकार इतो भिन्नमपि नादनवकं हंसनिर्णयप्रामाण्येन वर्णयति । तद्यथा—

घोषः कांस्यं तथा घण्टा वीणा वेणुश्च वांशकम् ।
दुन्दुभिः शङ्खघोषश्च नवमं निर्विशेषकम् ॥ (पृ० ३६)

अस्मिन् प्रसङ्गे नेत्रतन्त्रोद्योते (२१।३९)—

हीयं पश्यन्तीव न केवलमुत्तीर्णा, नापि वैखरीव बहिः स्फुटतरनिखिलावयवा, किन्तु मध्यगता, अतो मध्यमापदाभिलप्या । नवनादात्मिकया मध्यमया नववर्गात्मिका वैखरी वागभिव्यज्यते ।

स्थानकरणप्रयत्नैरभिहतपवनप्रवर्तितार्णत्वात् ।
हृतनामधेयमस्या विहितं वर्णोदयक्रमाभिज्ञैः ॥ (सौ० सु० १।१४)

वै निश्चयेन स्पष्टतरत्वात् खं कर्णविवरवर्तिनभोरूपश्रोत्रेन्द्रियं राति गच्छतीति वैख[1]रीपदनिर्वचनं भवति । अस्यां वैखर्यां वाचि सप्तचत्वारिंशत्संख्याकान्यकारादिसकारान्तान्यक्षराणि भवन्तीति संकेतपद्धत्यामुक्तम् , व्याख्यातं च तथैव विद्यानन्दामृतानन्दाभ्याम् । अत्र क्षकारः ककारषकारसंयोगजत्वान्न पृथग् गण्यते । ळकारस्यापि लकारान्तःपातित्वान्न पृथग् गणनम् । एवं च सप्तचत्वारिंशद्वर्णात्मिका वैखरी, नवनादात्मिका मध्यमा, एकादशधा पश्यन्ती चेत्याहत्य सप्तषष्टिवर्णात्मकं मा[2]तृकापीठं संपद्यते । "दश पञ्च च बिन्द्वन्ताः स्वरा मताः" (१।१६)

घोषो रावः स्वनः शब्दः स्फोटाख्यो ध्वनिरेव च ।
झाङ्कारो ध्वङ्कृतश्चैव ह्यष्टौ शब्दाः प्रकीर्तिताः ॥

इति स्वच्छन्दतन्त्र(११।६–७)प्रामाण्येन निगदिताः, स्वच्छन्दोद्योते च धर्मशिवाचार्यपद्धतिप्रामाण्येन विवृता अष्टौ शब्दा अत्रैव ६३ तमपृष्ठस्थायां टिप्पण्यां दशधा प्रतिपादिते रावध्वनिपदैस्तुलनीयाः । भास्कररायेण वरिवस्यारहस्ये (२।११२–१३) बिन्द्वर्धचन्द्रप्रभृतीनां नवानां समष्टिर्नाद उच्यते, "यद्यपि बिन्दुविनिर्मुक्तानामष्टानामेव नादसंज्ञा मन्त्रशास्त्रे, तथापि व्यवहारसौकर्याय तत्सहितानामेव साऽत्र कृतेति" (पृ० ११–१२) इति च तत्प्रकाशे व्याख्यायते । विस्तरेणैतदन्यत्र प्रतिपिपादयिषितं न इत्युक्तमेव ।

१. सर्वोऽयं विषयो भास्कररायेणापि वरिवस्यारहस्यप्रकाशे (पृ० १७) शब्दसृष्टिप्रक्रियानिरूपणे प्रतिपादितः ।

२. एतत्प्रघट्टकार्थो योगिनीहृदयदीपिकोद्धृत(पृ० १७०–१७१)संकेतपद्धत्यामेवं व्याख्यातः—

अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः ।
हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः ॥
अनयोः सामरस्यं यत्परस्मिन्नहमि स्फुटम् ।
वामाद्यैः पञ्चभिर्योऽसावीश्वरः परिकीर्तितः ॥
आदावस्य शिरो रौद्री वक्त्रं वामा प्रकीर्तिता ।
अम्बिका बाहुरित्युक्ता ज्येष्ठा चैव नखाग्रजा ॥
एता हार्धकलारूपा रूपपञ्चतया स्थिताः ।
अवर्णः सर्ववर्णानां न पृथग् भासते बहिः ॥
इच्छा शिरःप्रदेशस्था ज्ञाना च तदधोगता ।
क्रिया पादगता ह्यस्य शान्ता हृन्मध्यगा भवेत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

इति सौभाग्यसुधोदये । एवं च पञ्चदश स्वराः, पञ्चविंशतिः स्पर्शाख्याः, यरलवशषसाश्चेति सप्त । आहत्य वैखरीवर्णानां संख्या सप्तचत्वारिंशद्भवति । किन्त्वत्राकारस्य परिगणनं भवति, हकारस्य नेत्यत्र किं विनिगमकम् ? एकादशधा भिन्नायां पश्यन्त्यां वाचि हकारस्येवाकारस्यापि समावेशो भवतीत्यत्राकारस्यापि परिगणनं मास्तु ? क्षकारस्य ळकारस्य चासमावेशे कथं नाम नववर्गात्मिका वैखरी वाक् संपद्येत ? स्वरेषु विसर्गस्यापरिग्रहणे किं विनियोजकम् ? प्रश्नानाममीषां समाधानं साम्प्रतं संकेतपद्धत्युपलम्भसापेक्षम् । अर्थरत्नावल्या मद्रासमातृकासु—"स्वरा द्वाविंशतिः, पञ्चविंशतिः स्पर्शाख्याः, दशधा व्यापकाः, यमाश्चत्वारः, जिह्वामूलीयोपध्मानीयौ द्वौ, अनुस्वारविसर्गौ च । इत्थमेभिः कलानादाभ्यां च सप्तषष्टिवर्णाः प्रोक्ताः । अनेनापि नयेन सप्तषष्टिवर्णरूपा मातृका" (पृ० ३९) इति पाठो दृश्यते । एतदुपोद्बलकानि प्रमाणवचनानि तु तत्र न सन्ति ।

अत्र संकेतपद्धत्यनुसारिणि व्याख्याने वैखरी वाग् हतनामधेया, मध्यमाऽनाहतनामा, पश्यन्ती चोत्तीर्णोच्यते । एवं च तत्र पश्यन्तीमध्यमावैखरीस्वरूपनिरूपणमक्रियत—

> शिखण्डयण्डरसन्यायः शिविकाख्यो द्वितीयकः ।
> अयःशलाकासंज्ञोऽन्यस्त्रिविधो न्यायवैभवः ॥
> त्रिविधं न्यायमुत्सृज्य वर्णानामुदयक्रमम् ।
> ये वदन्ति न ते योग्या वामकेश्वरदर्शने ॥ इति ।

वातूलनाथसूत्रवृत्तौ (पृ० १६) तु पश्यन्ती अनाहतहता, परा चानाहतहतोत्तीर्णोच्यत इति पूर्वमेवोक्तम् । तत्रैव (पृ० ९) परायां वाचि मयूराण्डरसन्यायः, पश्यन्त्यां वटधानिकान्यायः, मध्यमायां च शिम्बिकाफलन्यायो न्ययोजि । एवं च न केवलं वैखरी, चतुर्विधापि वाग् मातृकापदाभिधेया भवति । किं बहुना, संविदेव भगवती परावागात्मानाहतभट्टारकपरमशिवस्वरूपा षट्त्रिंशत्तत्त्वप्रसरणहेतुभूता मातृकापदेनोच्यते ।

वर्णाभिव्यक्तिप्रकारः

शिवसूत्रविमर्शिनी-ऋजुविमर्शिनी-तन्त्रालोकविवेकधृतेषु तन्त्रसद्भाववचनेषु वर्णविकासक्रम उपदिष्टः । तत्प्रघट्टकार्थश्च तन्त्रालोकविवेके संक्षेपेणैवमुपस्थाप्यते—"परैव सूक्ष्मा कुण्डलिनी

> अष्टधाऽनाहतः प्रोक्तः शून्यादिप्रविभागतः ।
> शून्यः स्पर्शस्तथा नादो ध्वनिर्बिन्दुस्तथैव च ॥
> शक्तिबीजाक्षरं चेति ह्यष्टधाऽनाहतः स्मृतः ।
> चत्वारिंशत्सप्तसंख्यो हतः स परिकीर्तितः ॥
> क्षकारः कथितो योऽसौ संयोगाद् द्विविधः स्मृतः ।
> सप्तषष्ट्याख्यमेवं हि मातृकापीठमुत्तमम् ॥
> अनाहतहतोत्तीर्णैस्त्रिभिर्भेदैः समन्ततः ।
> स्थितो योऽसौ महापीठो मातृकाख्यो जयत्यसौ ॥

शक्तिः शिवेन सह परस्परसामरस्यरूपमथ्यमन्थकभावात्मकं संघट्टमासाद्योत्थिता सतीच्छाज्ञानक्रियारूपतामाश्रित्य रौद्रीत्वमुन्मुद्रयन्ती, शृङ्गाटकाकारतामम्बिकात्वमवलम्बमाना, उकारात्मकशशाङ्कशकलाकारतां ज्येष्ठात्वमधितिष्ठन्ती च शशिबिन्दूदितकालाग्निरुद्ररेफात्मकबिन्दुविश्रान्तस्पष्टरेखाकारतामाभासयतीत्याद्यवर्णशरीरमुल्लासयतीति" (३।६७; पृ० ७७) ।
अस्मिन्नर्थे—

> अकारस्य[1] शिरो रौद्री वक्त्रं वामा प्रकीर्तिता ।
> अम्बिका बाहुरित्युक्ता ज्येष्ठा चैवायुधं स्मृता ॥

इति च प्रमाणवचनं तत्र (पृ० ८०) समुपस्थापितम् । एवं शक्तेरुदरगतेन चतुष्कलात्मना बिन्दुनाऽनुत्तरादिमुखेन नववर्गकः सन्तानः प्रजायते ।

योगिनीहृदये (१।३६-४०) परा वागम्बिकारूपा, पश्यन्ती वामारूपेच्छाशक्तिः, मध्यमा ज्येष्ठारूपा ज्ञानशक्तिः, वैखरी रौद्रीरूपा क्रियाशक्तिर्वर्णिता । अत्र तन्त्रसद्भावयोगिनीहृदयवर्णने नाम्नि वैषम्यमिवावलोक्यते, तथापि तन्त्रसद्भावेऽपि वाक्चतुष्टयविकासपद्धत्यैव वर्णनिष्पत्तिप्रक्रिया प्रतिपादितेति योगिनीहृदयवर्णनेनैतत् स्पष्टीभवति । सेयं वर्णोत्पत्तिप्रक्रिया परापञ्चाशिकासौभाग्यसुधोदययोः संक्षेपेण, तन्त्रालोके तृतीयाह्निके च विस्तरेणोपपादिता, नात्र प्रपञ्च्यते विस्तरभयात् ।

मातृकावर्गाः

वर्णसंघट्टशरीरेयं मातृका बीजयोन्यात्मना[2] विभक्ता, सप्तवर्गात्मिका, अष्टवर्गात्मिका, नववर्गात्मिका च तेषु तेषु शास्त्रेषु भण्यते । तत्र प्रपञ्चसारे—"अकचटतपयाद्यैः सप्तभिर्वर्णवर्गैः" इति प्रथमे मङ्गलाचरणश्लोके सप्तवर्गात्मिका मातृका पठ्यते । शैवेषु सिद्धान्तागमेषु नित्याषोडशिकार्णवे चाष्टवर्गात्मिका सा प्रतिपाद्यते, मालिनीविजये[3] च नववर्गात्मिका । संकेतपद्धतिमनुसरद्भिः शिवानन्दविद्यानन्दामृतानन्दादिभिरपि स्वस्वग्रन्थेषु यथायथमष्टवर्गात्मिका नववर्गात्मिकापि च मातृका व्याख्यायते । अत्रायमस्माकमभिप्रायः—नित्याषोडशिकार्णवप्रभृतिषु तन्त्रग्रन्थेषु वर्णितं वर्णानां स्वरूपं ब्राह्मीं लिपिमनुसरति प्राधान्येन । अतो वर्णमातृकादीनां स्वरूपविचारस्तावत् प्राचीनोऽभिमन्तव्यः । अमरकोशरचनाकाले ब्राह्म्याद्याः सप्त मातरः प्रसिद्धा आसन् । एता देव्यो द्वादशज्योतिर्लिङ्गेष्वन्यतमस्य एलापुरपीठवसतेर्भगवतो घुष्णेश्वरस्य सविधे स्थितेषु 'एलोरा' गुहामन्दिरेषूत्कीर्णा उपलभ्यन्ते । सिद्धान्तशिखामणौ मातृतन्त्राणि स्मृतानि । एवं चैतासां प्रसिद्धानां सप्तमातृकाणामाश्रयेण सप्तवर्गात्मिका वर्णमातृका

---

१. एतच्च वचनं संकेतपद्धतिस्थं पूर्वमत्रोद्धृतम् । तत्र 'अकारस्य' इत्यस्य स्थाने 'आदावस्य' इति पाठः । 'अकारस्य' इत्येव पाठः शोभनः प्रतिभाति ।

२. "बीजयोन्यात्मकाद्भेदाद् द्विधा बीजं स्वरा मताः ॥ कादिभिश्च स्मृता योनिः" (मा० वि० ३।१०-११) ।

३. मालिनीविजयोत्तरे, ३।११

In Public domain. Digitization Muthulakshmi Research Academy

तान्त्रिकैरङ्गीकृता । तासु मातृकासु महालक्ष्मीं परिगण्य नित्याषोडशिकार्णवेऽष्टवर्गात्मिका मातृका परिगीयते ।

मातृकावर्णाः

मातृकाणां वर्गसंख्याविषये यथा मतभेदो दृश्यते तन्त्राणाम्, तथैव वर्णसंख्याविषयेऽपि सैव स्थितिः । सप्तचत्वारिंशद्वर्णरूपा वैखरी वाक् प्रत्यपाद्यत संकेतपद्धत्याम् । शैवेषु तन्त्रेषु पञ्चाशदक्षरा सा प्रोच्यते । शाक्तेषु तु तन्त्रेषु प्राधान्येनैकपञ्चाशदक्षरा । संकेतपद्धत्यां सप्तषष्टिवर्णरूपिणी सोक्ता, व्याख्यातं च तथैवार्थरत्नावल्यामिति प्रागेवोक्तम् । चतुर्थे पटले षडध्वप्रविलापनविधौ (पृ० २०९) त्वर्थरत्नावल्यां शैवागमवत् पञ्चाशदक्षरैव मातृका व्याख्याता । लक्ष्मीधरोऽपि तथैवाह । तथाहि—"भगवत्याः स्वरूपं तु पञ्चाशद्वर्णात्मिका मातृकैव ।...सेयं पञ्चाशद्वर्णात्मिका मातृकाऽष्टवर्गात्मिका भवति । ते चाष्टवर्गा अकचटतपयशादयः । अकारादयः षोडश स्वराः प्रथमवर्गः । कादयः पञ्च द्वितीयः । चादयः पञ्च तृतीयः । टादयः पञ्च चतुर्थः । तादयः पञ्च पञ्चमः । पादयः पञ्च षष्ठः । यादयश्चत्वारः सप्तमः । शादयः पञ्च अष्टमः । एवमष्टवर्गात्मिका भगवती मातृका त्रिपुरसुन्दरी" (पृ. १०८) इत्यादि । एकपञ्चाशदक्षरा मातृकेतिवादिनां मते शवर्गः षडक्षरः । यवर्गषवर्गयोरपि पञ्चपञ्चवर्णात्मकतैवेति मतविशेषः सूचितः सेतुबन्धकारेण (पृ० ५१) । शिवानन्दरचितसुभगोदयकमातृकायां (पृ० २८७) तदेतद् दृश्यते । अस्मिन् मते "शवर्गे कौलिनी तथा" (१।७९) इत्यत्र 'षवर्गे' इति पाठः कल्पनीयः स्यात् । शवर्गः षडक्षर इतिवादिनां मते "कौलिनीपञ्चमं देवि" (१।९४) इत्यत्र ळकारस्यैव पञ्चमत्वेऽपि यथा क्षकारस्य ग्रहणं पञ्चमत्वेन भवति, तथा सेतुबन्धे उपपादितं (पृ० ५६) तत एवावलोकनीयम् ।

मालिनी

मातृका मालिनीति चानर्थान्तरमिति पूर्वमुक्तम् । तत्र नादिफान्ता वर्णमाला मालिनीति विशेषः । तत्रायं क्रमः—न ऋ ॠ ऌ ॡ थ च ध ई ण उ ऊ ब क ख ग घ ङ इ अ व भ म ड ढ ठ झ ञ ज र ट प छ ल आ स अः ह ष क्ष म श अं त ए ऐ ओ औ द फ इति । क्रम एष मालिनीविजये (३।३७-४१) प्रदर्शितः ।

भूतलिपिः

शारदातिलके (७।१-४) द्वाचत्वारिंशदक्षरा नववर्गमयी भूतलिपिरुपदिष्टा । तत्रायं वर्णविन्यासक्रमः—

अ	इ	उ	ऋ	ऌ	इति प्रथमो वर्गः ।
ए	ऐ	ओ	औ		इति द्वितीयो वर्गः ।
ह	य	र	व	ल	इति तृतीयो वर्गः ।
ङ	क	ख	घ	ग	इति चतुर्थो वर्गः ।
ञ	च	छ	झ	ज	इति पञ्चमो वर्गः ।

ण	ट	ठ	ढ	ड	इति षष्ठो वर्गः ।
न	त	थ	ध	द	इति सप्तमो वर्गः ।
म	प	फ	भ	ब	इत्यष्टमो वर्गः ।
श	ष	स			इति नवमो वर्गः ।

कामकलाविलासे (२७ श्लो०) सूक्ष्मा स्थूला चेति द्विविधा मध्यमा प्रत्यपाद्यत । तत्र सूक्ष्मा नवनादमयी, स्थूला च भूतलिप्याख्या । अस्या भूतलिपेः[1] श्रीचक्रे विनियोगप्रकारो यथाऽवसरं प्रतिपादयिष्यते ।

वर्णसंघट्टशरीराणां सप्तकोटिमहामन्त्राणां जननी मातृकेति प्रतिपादितम् । अथ मन्त्रविचारः प्रस्तूयते ।

मन्त्रस्वरूपविमर्शः

तन्त्रशास्त्रेषु मनुशब्दो मन्त्रपर्यायत्वेन प्रयुज्यते, स्त्रीदेवत्याश्च मनवो विद्यापदेनाभिधीयन्ते । नित्याषोडशिकार्णवे मूलविद्यापदेनाभिधीयमाना त्रिपुराविद्या प्राधान्येन समुद्धृता । तदङ्गतया करशुद्धिप्रभृतयो विद्याः, वशिन्यादीनां बीजानि[2], कामकलाक्षरं चात्र प्रदर्शितानि प्रथमे पटले । चतुर्थे पटले मूलविद्याया बीजानां व्यस्तसमस्तोपासनविधिः फलं चोपदर्शितम् । अत्रैव करशुद्ध्यादिविद्यानां कर्म रुद्रयामले प्रोक्तमित्युक्त्वा देव्या आयुधबीजानि तत्रैव सूचितान्यत्रापि समुद्धृतानि । मुद्राबीजान्यत्रार्थरत्नावल्यां तृतीयपटलान्ते दृश्यन्ते नित्याषोडशिकार्णवप्रामाण्येनोद्धृतानि । मूलग्रन्थे तु तानि क्वापि नोपलभ्यन्ते ।

---

१. लिपीनां भूतत्वं नाम चेष्टाविशेषाक्षरविन्यासाभिव्यङ्ग्यत्वम् । तच्च कल्पनामात्रमेव (चिद्वल्ली, पृ० ५०) ।

२. मन्त्रा एकाक्षराः पिण्डाः कर्तर्यो द्व्यक्षराः स्मृताः ।
वर्णत्रयं समारभ्य नवार्णावधि बीजकाः ॥
ततो दशार्णमारभ्य यावद्विंशानि मन्त्रकाः ।
तत ऊर्ध्वं गता मालास्तासु भेदो न विद्यते ॥ (३५ । २८-२९)
इति तन्त्रराजे पिण्ड-कर्तरी-बीज-मन्त्र-मालानां लक्षणानि । अर्थरत्नावल्यां (पृ० ९३–९५) चतुष्पिण्डात्मक-षट्पिण्डात्मक-पञ्चपिण्डात्मकेत्यादिषु पिण्डपदप्रयोग एकाक्षरवाचित्वेन कृतः । क्षेमराजेन तु—

बीजैः कूटैस्तथा पिण्डैर्मालामन्त्रैरशेषतः ।
वाच्यवाचकभेदेन सर्वसिद्धिफलप्रदाः ॥ (ने० त० १६ । ७)

इत्यत्रान्यविध एवार्थः प्रतिपादितः । तथाहि—"बीजैः स्वरैः । कूटैः पिण्डपदात्मभिः । पिण्डैर्नवात्मादिभिः । मालामन्त्रैः पदसमुदायरूपैः ।...परावाक्प्राधान्येन बीजानाम्, पश्यन्तीदृशा पिण्डानाम्, मध्यमायुक्त्या मालामन्त्राणाम्, पश्यन्तीमध्यमाभ्यां कूटानाम्" इति ।

In Public domain. Digitization Muthulakshmi Research Academy

मन्त्रा मननत्राणधर्माणश्चिन्माहात्म्यावमर्शकाः। गुप्तार्थभाजः पिण्डबीजात्मानः ुरुषवाच्याध्यासिताश्च मन्त्राः। त एव संवेद्यमानस्फुटार्थरूपा मालामन्त्राः स्त्रीरूपवाच्याध्या-सिताश्च सन्तो विद्यापदेन परिचीयन्ते-(पृ० ४२–४३) इति शिवानन्दः। मन्त्रा आणवशाक्त-ाम्भवोपायसंबन्धिनः (पृ० ४२, ७०) इति विद्यानन्दः। ''मोचयन्ति च संसाराद्योज-यन्ति परे शिवे। मननत्राणधर्मित्वात्तेन मन्त्रा इति स्मृताः॥" (२१ । ७५-७६) इति मृत्युञ्जयभट्टारकः। तदयं विषयो नेत्रतन्त्रे (मृत्युञ्जयभट्टारके) एकविंशाधिकारे—"मन्त्राः किमात्मका देव किंस्वरूपाश्च कीदृशाः। किंप्रभावाः कथं शक्ताः केन वा संप्रचोदिताः॥" (२१ । १) इत्यादिप्रश्नमुखेन विस्तरेण प्रपञ्चितः। मन्त्रस्वरूप-मन्त्रवीर्य-मन्त्रावस्था-मन्त्रसामर्थ्यप्रभृतीन् मन्त्र-मन्त्रेश्वर-मन्त्रमहेश्वरप्रभृतीन्, पिण्ड-कर्तरी-बीज-मालाप्रभृतींश्च भेदोपभेदान् मन्त्रदोषसंस्कारादिकांश्च विषयानाश्रित्य सुहृद्वरेण डा० शिवशङ्कर-अवस्थी-महोदयेन 'मन्त्र और मातृकाओं का रहस्य' इत्याख्ये ग्रन्थे नेत्रतन्त्र-शिवसूत्र-परा-त्रिंशिका-विज्ञानभैरव-स्पन्दकारिका-शिवसूत्रविमर्शिनी-प्रत्यभिज्ञाहृदय-शारदातिलक-सौभाग्य-भास्करप्रभृतिग्रन्थानां साहाय्येन विशदतया न्यरूपि, तत्तत एवावलोकनीयम्। नेत्रतन्त्रे द्वित्रेषु स्थलेषु मन्त्रविषयको विचारो वरीवर्ति। उपर्युक्ते ग्रन्थेऽस्पृष्टानि स्थलान्यत्र विचार्यन्ते।

अभिनवगुप्तप्रभृतिभिराचार्यैरुद्धृतत्वान्नेत्रतन्त्रस्य प्राचीनत्वं तावन्निर्विवादम्। नेत्र-तन्त्रोद्योते क्षेमराजेन नेत्रतन्त्रीयमन्त्रविषयकस्थलव्याख्यानप्रसङ्गेनोच्छुष्मतन्त्रं प्रमाणीकृतम्। एतच्च तन्त्रं बौद्धतन्त्रेष्वपि दृष्टप्रामाण्यम्। एवं च तदाधारेणात्रोपस्थापयिष्यमाणस्य विषय-जातस्य प्रामाण्ये गरिमा कोऽप्यभिमन्तव्य एव शारदातिलकादिपरवर्तिग्रन्थप्रतिपाद-नापेक्षया।

भावादिहीना मन्त्रा न सिद्धिदाः

कीदृशा मन्त्रा न सिद्धिं प्रयच्छन्तीति प्रथममाह मृत्युञ्जयभट्टारकः—

भावहीनास्तु ये मन्त्राः शक्तिहीनास्तु कीलिताः।
वर्णमात्राविहीनास्तु गुर्वागमविवर्जिताः॥
भ्रष्टाम्नायविहीना ये आगमोज्झितविघ्निताः।
न सिद्ध्यन्ति यदा देवि जप्ता इष्टाः सहस्रशः॥
असिद्धा रिपवो ये च सर्वांशकविवर्जिताः।
आद्यन्तसंपुटेनैव साद्यर्णेन तु रोधिताः॥

(ने० त० ८ । ५९-६२)

न्त्रेषु दशधा दोषोत्पादनम्

विद्वेषिभिर्हि मन्त्राणामुच्चार्यमाणानां कीलनादिकं क्रियते। अतो सुगुप्ते स्थाने जप-ोमादिकं विधेयम्—

कीलनं चैव मन्त्राणां भेदनं मोहनं तथा।
संत्रासं ताडनं चैव जम्भनं स्तम्भनं तथा॥
रिपुत्वकरणं चान्यत् प्रत्यङ्गिरत्वमेव हि।
सर्वहानिविधायित्वं क्रियते दुष्टमन्त्रिभिः॥
एवं दशप्रकारेण प्रयतन्ते हि हिंसकाः।
तस्मात् सर्वप्रयत्नेन सुगुप्ते शरणोपरि॥
स्वगृहे कारयेद्यत्नाद् यागं होमं जपं तथा।

(ने० त० १६।३३-३६)

कीलनं[1] मन्त्रस्याद्दशत्वापादनम्। भेदनं साध्यसांमुख्यत्यागम्। मोहनं निर्वीर्यीकरणम्। जम्भनं कार्यकरणासाध्यसामर्थ्याधानम्। स्तम्भनं निश्चेष्टत्वापादनम्। प्रत्यङ्गिरत्वं भूतादि-दमनप्रयुक्तस्य मन्त्रस्य प्रयोक्तारं प्रति विरुद्धकारित्वम्।

नवविधो मन्त्रवादः

एतद्दोषपरिहाराय[2] मन्त्रिणा मन्त्राणां दीपनादिविधिरवश्यं परिज्ञातव्यः—

दीपनं बोधनं चैव ताडनं चाभिषेचनम्॥
विमलीकरणं चैव तथेन्धननिवेशनम्।
संतर्पणं गुप्तिभाव आप्यायो नवमस्तथा॥
एवं नवप्रकारेण मन्त्रवादमशेषतः।
यो जानाति स जानाति मन्त्रसाधनमुत्तमम्॥

(ने० त० १८।६-८)

दीपनं[3] मन्त्रस्य प्रणवेन। बोधनं नमःशब्देन। ताडनं फट्कारेण। अभिषेचनं वौषट्कारेण। विमलीकरणं स्वाहाशब्देन। इन्धननिवेशनं दाह्यपाशविषादिदहने विनि-

---

१. एतत्प्रकरणद्वयप्रतिपादितोऽर्थः शारदातिलके "छिन्नो रुद्धः" (२।६४) इत्यादिना विस्तृत्योक्तः।

२. "इत्यादिदोषदुष्टांस्तान् मन्त्रानात्मनि योजयेत्। शोधयेदूर्ध्वपवनो बद्ध्या योनिमुद्रया॥" (२।१११) इति शारदातिलके। ये न योगिनो योनिमुद्रानभिज्ञाः पवनधारणाशक्ताश्च तान् प्रति मन्त्राणां दशसंस्कारोपदेशः। मन्त्रदोषपरिहाराय योनिमुद्राबन्धविधिर्नानातन्त्रेषू-पदिश्यते। अर्थरत्नावल्युद्धृते उत्तरषट्केऽप्युक्तम्—"यद्यदुच्चरते मन्त्री मन्त्रवर्णं शुभा-शुभम्। तत्तत्सिद्ध्यति देवेशि योनिमुद्रानिबन्धनात्॥" (पृ० ७०) इति। उत्तरषट्क-मातृकायामितः पूर्वं छिन्नादयो मन्त्रदोषाः प्रदर्शिताः। योनिमुद्रास्वरूपविचारश्चाग्रे मुद्राप्रकरणे द्रष्टव्यः।

३. अत्र टीकायामुच्छुष्मतन्त्रं प्रमाणरूपेणोद्धृतम्। अत्रत्यानि सर्वाण्येव प्रमाणवचनानि तस्यैव स्युरिति वयं संभावयामः। वचनानीमानि तत्रैवावश्यं दर्शनार्हाणि।

In Public domain. Digitization Muthulakshmi Research Academy

योजनं हुंकारेण संपुटीकरणम् । तर्पणं बलवत्ताधानम्, तच्च प्रतिवर्णं लांकारेण संपुटीकरणम् । गुप्तिभावो रक्षणम्, तच्च नेत्रनाथसंपुटीकृतस्य अयुतजपाद्भवति । आप्यायनं पुनर्जातवलस्य पुष्ट्याधानम्, तच्च वांकारेण प्रतिवर्णं संपुटीकारात् । एष एवार्थः शारदातिलके (२ । ११२) मन्त्राणां दशविधसंस्कारमुखेनोक्तः ।

मन्त्राणामेकादशधा विनियोगः

एवं सुगुप्ते स्थले दोषपरिहारगुणाधानमुखेन मन्त्रान् जपसंपादनार्हान् विदधीत । मन्त्राश्चेमे यथाप्रयोजनमेकादशधा विनियुक्ता भवन्ति—

संपुटं ग्रथितं ग्रस्तं समस्तं च विदर्भितम् ॥
आक्रान्तं च तथाद्यन्तं गर्भस्थं सर्वतोवृतम् ।
तथा युक्तिविदर्भं च विदर्भग्रथितं तथा ॥
इत्येकादशधा मन्त्रा नियुक्ताः सिद्धिदाः स्मृताः ।
(ने० त० १८।१०-१२)

आद्यन्तयोर्मन्त्रन्यासः संपुटवत् । प्रत्यर्णं मन्त्रसंपुटीकारो ग्रथनम् । मध्यस्थस्य नाम्नो दिक्चतुष्टये मन्त्रनिवेशो ग्रस्तम् । मन्त्रादनन्तरं नाम, पुनरप्येवमिति समस्तलक्षणम् । नामान्तरं सकृन्मन्त्र इति विदर्भणम् । मध्यस्थस्य नाम्नो मन्त्रो यदि वेष्टनया न्यस्त आक्रान्तम् । मन्त्रादनन्तरं नाम, ततस्त्रिर्मन्त्र इत्याद्यन्तम् । मध्यस्थस्य मन्त्रस्य चतुर्दिक्कं साध्यनामन्यासो गर्भस्थत्वम् । मन्त्रस्य आद्यन्तयोः साध्यनामनिवेशः सर्वतोवृतत्वम् । पश्चान्न्यस्तमन्त्रस्य नाम्नश्चतुर्निवेशो युक्तिविदर्भणम् । नाम्नः पश्चात् त्रिर्मन्त्रन्यासो विदर्भग्रथनम् ।

शारदातिलके (२३।१३६) तु शान्तिवश्यस्तम्भनविद्वेषोच्चाटनमारणाख्येषु षट्कर्मसु[२] ग्रथन-विदर्भ-संपुट-रोधन-योग-पल्लवाख्या विन्यासा उक्ताः । लक्षणान्येतेषां तत्रैवावलोकनीयानि ।

---

१. अत्रापि टीकायामुद्धृतानि प्रमाणवचनान्युच्छुष्मतन्त्रस्यैव स्युः ।

२. "कर्माण्यपि षड् भवन्ति, शान्तिवश्यस्तम्भनविद्वेषणोच्चाटनमारणभेदात् । तत्र शान्तिरुपद्रवनिवृत्तिः । वश्यं राजादीनां स्वायत्तीकरणम् । स्तम्भनं प्रकृतिनिरोधः । विद्वेषणं स्नेहभङ्गः । उच्चाटनं स्थानान्तरप्रापणम् । प्रसिद्धमन्यत् । परे तु रक्षाशान्तिजयलाभनिग्रहनिधनभेदात् षाड्विध्यमाहुः । प्रसज्यमानोपद्रवप्रागभावपरिपालनं रक्षा । प्रसक्तोपद्रवध्वंसः शान्तिः । रणद्यूतादिविजयो जयः । वाणिज्यादिभिरिष्टप्राप्तिर्लाभः । व्याध्युत्पादनं निग्रहः । शेषं प्रसिद्धम् । अत्र स्तम्भनस्य रक्षायां वश्याकर्षणयोर्जये विद्वेषोच्चाटनयोर्निग्रहेऽन्तर्भावमिच्छन्ति ।" (पृ० १०८) इति सेतुबन्धे । अत्रत्यो द्वितीयः पक्षः—"रक्षा शान्तिर्जयो लाभो निग्रहो निधनं तथा । षट् कर्माणि" (६।३५) इत्येवं कादिमतेऽप्यवलोक्यते । एतानि तान्त्रिकाणि षट्कर्माणि । मनुस्मृत्यादिषु तु—अध्या-

मन्त्राणां सिद्धत्वादिभेदास्तज्ज्ञानोपायश्च

साधकेन सिद्धः सुसिद्धश्चैव मन्त्र आराधनीयः—

सिद्धं साध्यं सुसिद्धं च तथैवारित्वमेव च ॥
ज्ञात्वा सर्वमशेषेण मन्त्रन्यासं समाचरेत् ।
(ने० त० १८।१२-१३)

सिद्धादिमन्त्रपरिज्ञानोपायः स्वच्छन्दतन्त्रे प्रतिपादितः—

मन्त्राक्षरं तु विश्लेष्य मात्राबिन्दुसमन्वितम् ।
आत्मनामाक्षरं तद्वदधोभागेऽस्य योजयेत् ॥
आत्मवर्णात् समारभ्य यावन्मन्त्रार्णमागतम् ।
यस्मिन् समापयेद् देवि तमायं परिकल्पयेत् ॥
रेखाङ्गुलिगतं तं तु कथयामि समासतः ।
पर्वणि प्रथमे सिद्धः साध्यश्चैव द्वितीयके ॥
तृतीयेऽपि सुसिद्धः स्यादरिर्ज्ञेयश्चतुर्थके ।
अरिसाध्यौ परित्यज्य दातव्यश्चुम्बकेन तु ॥
सिद्धश्चैव सुसिद्धश्च भुक्तिमुक्तिफलप्रदः ।
... ...
(स्व० त० ८।२४)

मन्त्राणामुदयादिकम्

एवं मन्त्रानाराधयतः साधकस्य मन्त्राणामुदयास्तमयव्याप्त्यादिकं परिजानतः सर्वज्ञत्वमाविर्भवति । तदुक्तम्—

उदयास्तमयौ व्याप्ति ध्यानं मुद्रां स्वरूपतः ॥
यो वेत्त्येवं स सर्वज्ञः सर्वकृत् साधकोत्तमः ।
(ने० त० १८।१३-१४)

उदयास्तमयाविति उन्मिषत्ताविश्रान्ती हृद्द्वादशान्तपदयोः । व्याप्ति वीर्यम् । मन्त्राणां ध्यानं मन्त्रविषयम् । तदुचितामेव च मुद्राम् । स्वरूपत इति वीर्यात्मना स्वरूपेण ।

पनमध्ययनं यजनं याजनं दानं प्रतिग्रहश्चेति षट्कर्माण्युपदिष्टानि (१०।७५) । संन्ध्या स्नानं जपो देवतार्चनं वैश्वदेवमातिथ्यं चेति षट्कर्माणि बृहत्पराशरादिषु (२।७) स्मृतिषु प्रतिपाद्यते । पराशरस्मृतौ (१।३९), मार्कण्डेयस्मृतौ (पृ० २५) च होमः स्वाध्यायश्चान्तर्भाव्यतेऽत्र । षट्कर्मपदस्यास्मिन् स्मार्तेऽर्थे एव साम्प्रतं 'खट्कर्म' इति भाषायां शब्दः प्रयुज्यते । हठयोगग्रन्थेषु तु—धौतिर्बस्तिर्नेतिस्त्राटकं नौलिकं कपालभातिश्चेति षट् कर्माण्युपदिश्यन्ते । एतेषां लक्षणानि हठयोगप्रदीपिकादिषु (२।२१–३५) द्रष्टव्यानि ।

In Public domain. Digitization Muthulakshmi Research Academy

तन्त्रालोके—"उदये सङ्गमे शान्तौ त्रिलक्षो जप उच्यते" (२९।८३) इत्यत्र जपप्रसङ्गेन मन्त्रस्यैतास्तिस्रोऽवस्थाः प्रदर्शिताः। "उदये इति प्राणशक्त्युदयस्थाने जन्माधारे। सङ्गमे इति नानानाडिसंभेदभाजि हृदये। शान्ताविति प्राणनिरोधाय युगपद्गाढावधानात्मक इत्यर्थः" इति तत्रत्ये विवेके। उत्तरषट्के तु—"आधारे उदयो देवि लयो हृदय उच्यते। विश्रामं ब्रह्मरन्ध्रे तु त्रिलक्षं परिकीर्तितम् ॥" इत्येवमेषोऽर्थः प्रतिपादितः। अर्थरत्नावल्यां श्रीमूलविद्याया वाग्भवबीजस्योदयो मूलाधारे, मूलादिब्रह्मरन्ध्रान्तं व्याप्तिः, विश्रान्तिस्तु जिह्वाग्रे (पृ० २३१), तथैव कामराजबीजस्योदयो मूलाधारे, भ्रूमध्यान्ते व्याप्तिः, विश्रान्तिर्ब्रह्मरन्ध्रे (पृ० २४७) प्रदर्शिता।

मन्त्राणां शिवशक्त्यात्मरूपत्वम्

विद्यानन्देन मन्त्रा आणवशाक्तशाम्भवोपायसंबन्धिन उक्ताः (पृ० ४२, ७०), नेत्रतन्त्रे तु तेषां शिवशक्त्यात्मरूपत्वमेव प्रतिपादितम्। तद्यथा—

यत्तेषां सर्ववेदित्वं सर्वशक्तित्वमेव च ॥
तच्छिवत्वं समाख्यातं शक्तित्वं सर्वकर्तृता।
सर्वानुग्रहकर्तृत्वं सर्वत्र फलदायकम् ॥
आत्मत्वं तत्स्वरूपं तु त्रिविधं साधनं स्मृतम्।
मन्त्रो ध्यानं तथा मुद्रा·················॥ (२१।७८-८०)

प्राणवुद्धिदेहाश्रयमन्त्रोच्चारध्यानमुद्रोपायत्वात् त्रिविधं मन्त्राणामात्मत्वमणुत्वम्। दीक्षा मण्डलमधिवासाद्यात्मा संस्कारो यजनं जपनं होमक्रिया यन्त्रलेखनं चैतदन्तो मन्त्रस्य प्रपञ्चः। एवं च दीक्षामण्डलाधिवासादिमन्त्रलेखनान्तविधिमुखेनाणवशाक्तशाम्भवोपायसंबन्धिनां मन्त्राणामुन्मिषत्वाविश्रान्तिव्याप्तिपरिज्ञानद्वारा धारणायोगाभ्यासबलेन तेष्वात्मशक्तिशिवाभिव्यक्तिमापादयतो योगिनः सर्वज्ञत्वे को नाम विवादस्यावसरः? साधकस्य हि पुरतो मन्त्राः पञ्चधाऽवतिष्ठन्ते। तदुक्तमुत्तरषट्के—

स्पर्शनं चावलोकश्च संभाषा बिन्दुदर्शनम्।
स्वयमावेशनं चैव मन्त्राणां पञ्चलक्षणम् ॥

अस्यार्थोऽत्रैव २५१ पृष्ठस्थटिप्पण्यामवलोकनीयः। एवं चाणवशाक्तशाम्भवोपायसंबन्धिनो मन्त्राः स्वयमेवान्ततः शिवशक्त्यात्मरूपेण साधकमाविशन्ति। एवं सति विंशाधिकारे मृत्युञ्जयभट्टारके यदुक्तम्—

यदीच्छेदुत्तमां सिद्धिं मोक्षं वा शाश्वतं ध्रुवम् ॥
मन्त्रवादो न कर्तव्य इत्याह परमेश्वरः।

इति, तत्काम्यप्रयोगेषु मन्त्रवादाश्रयनिषेधपरत्वेन योजनीयम्।

---

१. मन्त्राणामाणवशाक्तशाम्भवात्मकत्वमृजुविमर्शिन्यामपि (पृ० ५) दृश्यते।

मन्त्रार्थो मन्त्रचैतन्यं च

मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः।
न सिद्ध्यति वरारोहे कल्पकोटिशतैरपि ॥

इति प्राणतोषिणी (पृ० ४१८-४१९)। अत्र योनिमुद्रा व्याख्यातपूर्वा, मुद्राप्रकरणे च व्याख्यास्यते। मन्त्राधिष्ठातृदेवतैव मन्त्रचैतन्यम्। अत्र शिवानन्देन—"ननु देवताः कुत्र निवसन्ति? मन्त्रेष्विति ब्रूमः। यच्छ्रुतिः—क्व स्थः क्व वः सद्यो हव्यं वक्ष्याम इति छन्दस्स्वत्यब्रुवन् ····(पृ० १७१) इत्याद्युक्त्वा "मन्त्रं मणिवदालम्ब्य प्रभावन्मन्त्रदेवताम्। जपध्यानादिकं कुर्यान्न ताटस्थ्येन कुत्रचित् ॥" इति स्वच्छन्दोद्योतोद्धृत (भा० १, प० २, पृ० ७८) वचनस्य पूर्वार्धं उद्धृतः। एवमत्र मन्त्रदेवतैव मन्त्रचैतन्यत्वेन व्याख्याता। मन्त्रचैतन्यस्य वैशद्येन तान्त्रिकं व्याख्यानं प्राणतोषिण्यां (पृ० ४१८) द्रष्टव्यम्। "स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्" (नि० १।५।२) इत्येवं निरुक्तेऽप्यर्थमहिमा वर्णित इति मन्त्रार्थस्त्ववश्यं परिज्ञातव्य एव। अत एव योगिनीहृदये मन्त्रसंकेतपटले षड्विधो मन्त्रार्थः श्रीविद्यायाः प्रदर्शितः, भास्कररायेण च वरिवस्यारहस्ये पञ्चदशविधोऽर्थः। श्रीविद्याया अक्षरार्थस्तु सौभाग्यसुधोदये द्वितीये प्रपञ्चे द्रष्टव्यः।

मुद्रास्वरूपविमर्शः

"मन्त्रमुद्राशब्देन ज्ञानक्रिये लिलक्षयिषिते" (ऋजु० पृ० ४६) इति "ज्ञानक्रियासतत्त्वेन मन्त्रमुद्राक्रमेण तु" (सु० वा० ३५) इति चाह शिवानन्दः। एतेन मन्त्रमुद्रयोर्ज्ञानक्रियाशक्तिरूपत्वमायाति। स्वच्छन्दतन्त्रे चोच्यते—"मन्त्रो वै ज्ञानशक्तिश्च मुद्रा चैव क्रियात्मिका" (४।३७५) इति। नेत्रतन्त्रेऽप्यात्मस्वरूपाभिव्यक्तेः साधनत्रयं मन्त्रध्यानमुद्रात्मकमुपदिश्यते। तदत्र प्रसङ्गागतं मुद्रास्वरूपं विविच्यते।

प्रस्तुते ग्रन्थे तृतीये पटले दश मुद्राः प्रतिपादिताः। अत्र शिवानन्दः—"मुद्रानाम काश्चन शक्तयः। उक्तं च—मोचयन्ति ग्रहादिभ्यः पाशौघं द्रावयन्ति च। मोचनं द्रावणं यस्मान्मुद्रास्ताः शक्तयो मताः ॥" (पृ० १७४) इत्येवं मुद्रापदनिरुक्तिमाह। अत्र मुद्रापदेनाङ्गुलिसन्निवेशविशेषमात्रं नाभिप्रेतं शिवानन्दस्य, यद्यपि प्राधान्येन भवत्यस्मिन्नेवार्थे प्रयोगो मुद्रापदस्य। मुद्राणां प्रदर्शनेन तास्ताः शक्तय आविर्भवन्तीति तस्याभिप्रायः। तन्त्रालोके (३२।१-२) मुद्राणां परस्वरूपप्रतिबिम्बता श्रीदेवीयामलप्रामाण्येन प्रतिपादिता, "मुदं स्वरूपलाभाख्यं देहद्वारेण चात्मनाम्। रात्यर्पयति यत्तेन मुद्रा शास्त्रेषु वर्णिता ॥" (३२।३) इति च तस्या निरुक्तिरुक्ता। संविदेव क्रियाशक्तिरूपेण विश्वस्य मोदनं द्रावणं च कुर्वन्ती मुद्राख्यां लभत इति योगिनीहृदये (१।५७)। तत्र हि (१।५८-७१) सशक्तिकानामेतासां मुद्राणामान्तरं स्वरूपं प्रतिपादितम्।

विद्यानन्देन वाह्याभ्यन्तरभेदेन द्विविधा मुद्रा भवतीत्युक्तम् (पृ० १८८)। वाह्या कररचनारूपा, वन्धस्त्वान्तरः (१८२, १९०)। खेचरीप्रकरणे शिवानन्देन

In Public domain. Digitization Muthulakshmi Research Academy

त्रिविधा खेचरी प्रदर्शिता—अङ्गुलिविरचनात्मा, वोधगगनचारिता, संस्थानविशेषानुसरणरूपा च (पृ० १८४-८५)। सर्वासामेव मुद्राणां त्रैविध्यं स्वच्छन्दतन्त्रे (२।१०२) प्रतिपाद्यते। तच्च क्षेमराजेन तत्रैव—"मनोजा गुरुवक्त्रस्था वाग्भवा मन्त्रसंभवा। देहोद्भवाङ्गविक्षेपैर्मुद्रेयं त्रिविधा स्मृता॥" इत्याम्नायप्रामाण्येन स्पष्टीकृतम्। तन्त्रालोके (३२।९) तु चतुर्विधा मुद्रा प्रतिपादिता। व्याख्यातं च तत्रैव जयरथेन—"अङ्गुलिन्यासभेदेन करजा वहुमार्गगा। सर्वावस्थास्वेकरूपा वृत्तिर्मुद्रा च कायिकी॥ ··· मन्त्रतन्मयता मुद्रा विलापाख्या प्रकीर्तिता। ध्येयतन्मयता मुद्रा मानसी परिकीर्तिता॥" इति।

अत्राङ्गुलिसन्निवेशविशेषरूपा मुद्राः प्रायः सर्वेष्वेव तन्त्रग्रन्थेषु प्रतिपाद्यन्ते परश्शतैर्नामभिर्भेदैश्च। वन्धरूपाः संस्थानविशेषानुसरणरूपा वा मुद्रा वन्धपदेन मुद्रापदेनापि वा हठयोगग्रन्थेषु प्रतिपाद्यन्ते[1]। खेचर्यादीनामेतादृशीनां मुद्राणां प्रारम्भिकः प्रपञ्चो मालिनीविजयोत्तरतन्त्रालोकादिषु त्रिकशास्त्रेष्वपि दृश्यते। तन्त्रालोके मुद्राह्निके (३२।५-६) करङ्किणी-क्रोधना-भैरवी-लेलिहानिकानाम्न्यो मुद्राः खेचर्या एव प्रपञ्च इत्युक्तम्। एताः पञ्च मुद्रा विज्ञानभैरवे क्रमदर्शनग्रन्थेषु च चिद्गगनचन्द्रिकामहार्थमञ्जर्यादिषु करङ्किणी ज्ञानसिद्धानां मुद्रा, क्रोधिनी मन्त्रसिद्धानाम्, भैरवी मेलापसिद्धानाम्, लेलिहाना शाक्तसिद्धानाम्, खेचरी शाम्भवसिद्धानामित्यादिना प्रकारेण विस्तृत्य प्रकाशितास्तत एवावलोकनीयाः सलक्षणाः। एतासां क्षेमराजेन निर्दिष्टे देहोद्भवविभागे समावेशः कर्तुं शक्यते। जयरथेन निर्दिष्टम्—सर्वावस्थास्वेकरूपा वृत्तिः कायिकी मुद्रेतिलक्षणं तु नात्र संगच्छेत। गीतानिर्दिष्टं स्थितप्रज्ञलक्षणमेनदनुकरोति। "पञ्चमुद्राधरं चैतद्व्रतं सिद्धनिषेवितम्" (आ० ३३, पृ० ३०८) इति जयरथोद्धृतवचनेनैवं प्रतीयते यदेषा कायिकी मुद्रा पाशुपतशास्त्रे प्रतिपादिता भवेत्। ग्रन्थानामलाभे न किमपि याथातथ्येन वक्तुं शक्यते। "मुद्रा स्वात्मनः परमेश्वरत्वोपपादनाय स्वशरीरं प्रति कल्प्यमानः करचरणादिसन्निवेशविशेषो वेषधारणविशेषश्च" (पृ० ११०) इति महार्थमञ्जरीपरिमलधृतमुद्रालक्षणं क्षेमराजकृते देहोद्भवविभागे संगच्छते। तेन यामुनाचार्येणागमप्रामाण्ये (पृ० ४७) कर्णिका-रुचक-कुण्डल-शिखामणि-भस्म-यज्ञोपवीताख्यं मुद्राषट्कम्, कपालखट्वाङ्गाख्यमुपमुद्राद्वयं च पाशुपतमतीयं यदुपदर्शितम्, तदपि देहोद्भवविभागेऽन्तर्भविष्यति। पाञ्चरात्रप्रभृतिषु वैष्णवागमेषु शङ्खचक्रादिभिः शरीरतापनं मुद्रापदेनोच्यते। ता यथा शरीरे आरोप्यन्ते, तथैव पाशुपतागमे मुद्रापदेनोच्यमानानि द्रव्याणि शरीरे धार्यन्ते। एताभिरङ्गुलिसन्निवेशविशेषाणां संस्थानविशेषानुसरणरूपाणां वा मुद्राणां भेदो यद्यपि स्पष्ट एव, तथापि सर्वा एता देहोद्भवविभागेऽन्तर्भावयितुं शक्यन्ते। तन्त्रालोके रहस्याह्निके (आ० २९, [पृ]० २९-३०) कुलसन्ततिपरिचयाय मुद्रादीनामुपयोगः प्रतिपादितः। तत्र पाञ्चरात्रपाशुपतादिष्वागमेष्वेतदर्थं वाह्यमुद्राणामुपदेशः, रहस्यप्रधानेषु च तन्त्रेषु मुद्रास्वपि रहस्यमाहितम्। न केवलं

---

[1] "महामुद्रा महावन्धो" इत्यादिना प्रतिपादितं मुद्रादशकं हठयोगप्रदीपिकायां तृतीयोपदेशे द्रष्टव्यम्।

स्वसन्ततिपरिचयायैवापि तु स्वाभिन्नसंविदभिव्यक्तये चापि वाह्याभ्यन्तरपूजासु तासामुपयोग उपवर्ण्यते। नेत्रतन्त्रे (२१।८०) स्वात्मस्वरूपाभिव्यक्तेस्त्रिविधं साधनं मन्त्र-ध्यान-मुद्रारूपमुपपादितम्। अद्वयप्रधानेषु तन्त्रेषु सर्वं स्वात्मरूपमेव। अतोऽत्र मुद्रापि परसंवित्तिरूपैव। सा च व्याख्यानानर्हेति शिवानन्द (पृ० १८४) आह। क्षेमराजेन तु शिवसूत्रविमर्शिन्यां (पृ० ५७-५८) तन्त्रसद्भावप्रदर्शितदिशा सा मनाङ् निर्दिष्टा। बोधगगनचारितारूपमेतन्मुद्रास्वरूपं क्षेमराजजयरथोद्धृते मानसे विभागेऽन्तर्भावयितुं शक्यते। अत्र गुरुवक्त्रस्यैव वोधगगनरूपत्वमवसेयम्। मन्त्रसंभवा मन्त्रतन्मयतारूपा वा वाचिकी विलापाख्या वा मुद्राऽत्र प्रकरणे चतुर्थी विधा, या व्याख्याद्वयोपेते नित्याषोडशिकार्णवे न निर्दिष्टा।

नित्याषोडशिकार्णवे लक्षितासु प्रथमा त्रिखण्डामुद्राऽऽवाहनार्थं विनियुक्ता। शिष्टा नव मुद्राः सन्ति। तास्त्रैलोक्यमोहनादिसर्वानन्दमयान्तेषु नवचक्रेष्वेकैकमेकैकं चक्रस्य वीजोच्चारणपूर्वकं प्रदर्शनीयाः। नवमुद्राणां बीजान्यर्थरत्नावल्यां (पृ० १८८-१८९) द्रष्टव्यानि। दर्शनीयासु मुद्रासु भवति प्रथमा सर्वसंक्षोभिणी मुद्रा। अत्र (३।२७) चान्तिमा योनिमुद्रापि प्रथमा मुद्रा प्रतिपादिता। अत्र शिवानन्दः—"नवम्यपीयं मुद्रा प्रथमा उत्कृष्टा, योन्युद्भूतत्वात् सर्वासां मुद्राणाम्। अत्राभियुक्तवचनम्—एका चैव महामुद्रा योनिमुद्रात्वमागता। तया विभक्तः स्वात्मा तु संक्षोभादिप्रभेदतः॥ इति" (पृ० १८८), "वाह्यपूजायां सर्वसंक्षोभिणीमुद्रायाः प्राथम्यमभिमतं परमेश्वरेण। अन्तर्यजनवेलायां श्रीमहायोनिमुद्रायाः प्राथम्यमिति" (पृ० १८८) इति तु विद्यानन्दः। "गुदमेढ्रान्तरे योनिस्तामाकुञ्च्य प्रवन्धयेत्" (ऋजु० पृ० १४३) इत्युत्तरषट्कवचने योनिमुद्रावन्धो निर्दिष्टः। योनिमुद्रावन्धस्य मन्त्रगतसकलदोषनिराससामर्थ्यं तन्त्रेषूपवर्ण्यते। उत्तरषट्केऽप्युक्तम्—

> यद्यदुच्चरते मन्त्री मन्त्रवर्णं शुभाशुभम्।
> तत्तत्सिद्ध्यति देवेशि योनिमुद्रानिवन्धनात्॥ इति।

योनिमुद्रावत् खेचरीमुद्राया अपि किमपि वैशिष्ट्यं विराजते। खेचरीमुद्रारूपायाः कुण्डलिन्याश्चन्द्रसूर्यात्मिके द्वे अङ्गुली, ते मध्यमे मध्यमनाड्यां परिवर्त्य प्रविलाप्य पार्थिवस्थानरूपके शिरसि युक्त्वा योगी खेचरतां प्रपद्यते। खेचरीभेदलक्षणादिविचारोऽत्र ग्रन्थे १८०-१८६ पृष्ठेषु द्रष्टव्यः।

शैवेषु शाक्तेषु बौद्धेषु च कौलिकतन्त्रग्रन्थेषु मद्य-मांस-मत्स्य-मुद्रा-मैथुनात्मकं पदार्थपञ्चकं विभिन्नाभिः परिभाषाभिरान्तरायां वाह्यायां चोपासायां समुपवर्ण्यते। तत्र मुद्रापदेन शक्तेर्ग्रहणं भवति वाह्येऽर्चने। आन्तरी च मुद्रा—

> कुलयोगिन उद्रिक्तभैरवीयरसासवात्।
> घूर्णमानस्य यः कश्चित् कोऽप्युदेति यथा तथा॥
> शरीरगः समावेशो मोदनद्रावणात्मकः।
> सा स्वीकृतजगन्मुद्रा मुद्रा नैरुत्तरे मते॥ (पृ० ११७)

In Public domain. Digitization Muthulakshmi Research Academy

इत्येवं मालिनीविजयवार्त्तिके प्रदर्शिता। तन्त्रशास्त्रेष्वेवं सत्स्वपि नानाविधेष्वर्थेषु मुद्राशब्दस्य प्रयोगः साम्प्रतं प्राधान्येनाङ्गुलिविरचनात्मनि विधौ रूढ इव दृश्यते। एष एव प्रकारोऽत्र नित्याषोडशिकार्णवे प्रतिपादितः। साम्प्रतं सन्ध्योपासादिषु चतुर्विंशतिभेदेन तत्प्रकारः प्रदर्श्यंते। तान्त्रिकसंस्कृतेरेष प्रभावस्तत्रावगन्तव्यः।

एवमत्र ज्ञानशक्तिविजृम्भितानां मन्त्राणां सहकारितया क्रियाशक्तिस्फूर्जिता मुद्रा निरूपिताः। अथ पीठविचारः प्रस्तूयते।

पीठस्वरूपविमर्शः

नित्याषोडशिकार्णवे द्वादशश्लोक्या द्वादशे पद्ये चत्वारः पीठा उपवर्णिताः। पीठानि महासंविदुपलब्धिस्थानानि। पीठसंबन्धिविचारो डा० दिनेशचन्द्रसरकारनिबद्धे "दी शाक्त पीठाज्" इत्याख्ये निबन्धग्रन्थे विस्तरेणोपलभ्यते। अत्र विदुपा लेखकेन महापीठनिरूपणापराभिधस्य पीठनिर्णयनाम्नो लघुकायस्य ग्रन्थस्य सम्पादनप्रसङ्गे नानाग्रन्थसाहाय्येन पीठसंख्यास्थानादीनां सविशदो विवेकः समुपस्थापित इति तत्तत एवावलोकनीयं मनीषिभिः। ततो यद्विशेषस्तदत्रोच्यते।

तन्त्रालोके (१५। ८२-९६) तद्विवेके च नैशसञ्चारशास्त्रप्रामाण्येन पीठोपपीठसन्दोहोपसन्दोहक्षेत्रोपक्षेत्राणि वर्णितानि। शास्त्रेषु सदा यागयोग्यं स्थानं पीठनाम्नाऽभिधीयते। तच्च बाह्याभ्यन्तरभेदेन बहिर्देहे च विराजते। तद्यथा—भगवतः शिवस्येच्छाशक्तिरेव पीठभावमयते। सचराचरस्य जगत आधारभूतं तत्, अत एव तस्याः शक्तेर्नैर्मित्तिकमिदमभिधानं पीठमिति। शक्तिपीठाद्बिन्दुनादमयं पीठद्वयं जायते। बिन्दुपीठो वामभागे, दक्षिणे च नादपीठः। एवं पीठत्रयं निष्पद्यते। शक्तिपीठं कामरूपं प्रथमम्, दक्षिणे नादपीठं पूर्णगिरिः, उत्तरे च बिन्दुपीठमुड्डियानाख्यम्। एवमेतत्पीठत्रयं मुख्यम्। शक्तिपीठात् कौण्डलीपदमध्यगं शाक्तम्, बिन्दुपीठाच्चतुष्कलमगोलकं बैन्दवम्, नादजं च व्याप्त्यधोद्विरन्ध्रस्योर्ध्वंगमित्युपपीठानां त्रयी निष्पद्यते। देवीकोट्टं शाक्तम्, उज्जयिनी बैन्दवम्, कुलगिरिश्च नादजमुपपीठम्। ललनागर्तवर्ती शाक्तः सन्दोहः, पुटमध्ये बैन्दवः, व्याप्तिमध्ये च नादजः। ललनायां पुण्ड्रवर्धनसंज्ञः, पुटमध्ये वारेन्द्राख्यः, व्याप्तिमध्ये चैकाम्राख्यः सन्दोहो भवति। हृदम्भोजदलाष्टकं क्षेत्राष्टकमभिधीयते। प्रयागः, वरणा, अट्टहासः, जयन्तिका, वाराणसी, कालिङ्गम्, कुलूता, लाहुला इति तेषां नामानि। हृदम्भोजदलाग्राष्टकमुपक्षेत्राष्टकम्। विरजा, ऐरुडिका, हाला, एलापूः, क्षीरिका, राजपुरी, मायापुरी, मरुदेश इति तेषामाख्याः। हृत्पद्मदलसन्ध्यष्टकमुपसन्दोहाष्टकं जालन्धर-नैपाल-कश्मीर-गर्गिका-हर-म्लेच्छद्वारवृत्ति-कुरुक्षेत्र-खेटकाख्यम्।

देहे द्विपथ-त्रिपथ-चतुष्पथा अपि भवन्ति। वामदक्षाभ्यां नाड्योर्वाहः प्रथमः, परया मेलनाद् द्वितीयः, तृतीयश्च शक्तिमतो लयाद्भवति। चतुष्पथश्चायं स्थानचतुष्टयेऽवतिष्ठते। अधः पिण्डस्थाने प्रथमः, तालुमध्ये द्वितीयः, चूलिकाग्रे तृतीयः, चतुर्थश्च भ्रूमध्ये

विराजते। नासान्त-तालु-चूलिकाग्राख्यं स्थानत्रयं शाम्भवं धाम, नाभि-कन्द-महानन्दाख्यं शाक्तं धाम, भ्रूमध्य-कण्ठ-हृत्संज्ञमाणवं धाम। एतदेव पवर्ताग्रं नदीतीरम् एकलिङ्गं चोच्यते। किं बहुना, संवित्तौ सर्वमवतिष्ठते। संविदेव प्राणात्मना परिणमते, स च देहेऽवतिष्ठत इति सर्वमपि देह एव भावनीयम्। योगमार्गविशारदाः संविद्देव्यो बहिरनुग्रहनिमित्तं तत्तत्स्थानेष्वभिव्यक्तिमासादयन्तीति तद्बाह्यं पीठमुच्यते।

एवमत्र पीठोपपीठसन्दोहानां त्रिकत्रयम्, क्षेत्रोपक्षेत्रोपसन्दोहानामष्टकत्रयं च निरूपितम्। आहत्य त्रयस्त्रिंशत्स्थाननामान्यत्र दृश्यन्ते। ज्ञेयसंकल्पनारूपमर्घपीठं तन्त्रालोके दृश्यते। विवेककारेण तु तन्नाङ्गीकृतम्। तदावश्यकमिति[1] वयं भणामः। नाम तु तस्यात्र नोपलभ्यते। तच्च अर्बुदमिति[2] कौलज्ञाननिर्णयतो ज्ञायते। पीठोपपीठसन्दोहक्षेत्रोपक्षेत्रपदान्यपि तत्रोपलभ्यन्ते (पृ० २४)। नामानि तु केवलं कामाख्या-पूर्णगिरि-ओडियानपीठानाम्, (पृ० २४), अर्घपीठस्यार्बुदस्य (पृ० २४), करवीर-महाकाल-देवीकोट्ट-वाराणसी-प्रयाग-चरित्र-एकाम्रक-अट्टहास-जयन्तीक्षेत्राणां (पृ० २३) दृश्यन्ते। अत्र क्षेत्रपदस्य स्थाने क्षेत्रपदपाठो[3] लिपिभ्रंशादित्यवगन्तव्यम्।

तन्त्रालोके एकोनत्रिंशाह्निके पीठन्यासादिप्रसङ्गेऽपि पीठनामानि दृश्यन्ते। तद्यथा—

अट्टहासं शिखास्थाने चरित्रं च करन्ध्रके[4]।
श्रुत्योः कौलगिरिं नासारन्ध्रयोश्च जयन्तिकाम् ॥ ५९ ॥
भ्रुवोरुज्जयिनीं वक्त्रे प्रयागं हृदये पुनः।
वाराणसीं स्कन्धयुगे श्रीपीठं विरजं गले ॥ ६० ॥
एडाभीमुदरे हालां नाभौ कन्दे तु गोश्रुतिम्।
उपस्थे मरुकोशं च नगरं पौण्ड्रवर्धनम् ॥ ६१ ॥
एलापुरं पुरस्तीरं सक्थ्यूर्वोर्दक्षिणादितः।
कुडयाकेशीं च सोपानं मायापूःक्षीरके तथा ॥ ६२ ॥
जानुजङ्घे गुल्फयुग्मे त्वाम्रातनृपसद्मनी।
पादाधारे तु वैरिञ्चीं कालाग्न्यवधिधारिकाम् ॥ ६३ ॥

---

१. जयरथोपपादिता उपसंहारविरुद्धत्व-अनागमित्व-अनार्षत्वदोषा नात्र प्रवर्तन्ते। उपसंहारे नवधेति पदेन पीठानामेव परामर्शः, न त्वर्घपीठस्यार्बुदस्यापि। अर्बुदस्यार्घपीठत्वे आगमस्तु कौलज्ञाननिर्णयाख्योऽनुपदं संवाद्यत एव। अत एवानार्षत्वमपि दूरापास्तम्।

२. "अर्बुदमर्घपीठं तु" (८। २२) इति।

३. नानास्थलेष्वेवमेव लिपिदोषादिभिर्भ्रष्टोऽप्ययं ग्रन्थो निर्विचिकित्सं प्राचीनत्वात्तदानीन्तनानां कौलिकसिद्धान्तानां परिज्ञानाय नितान्तमुपादेय इति साम्प्रदायिकैस्तन्त्रालोकादिसाहाय्येन संशोध्य पठनीयः।

४. "करन्ध्रं ब्रह्मबिलमिति यावत्" (त० वि० आ० २९, पृ० ५९)।

In Public domain. Digitization Muthulakshmi Research Academy

शिखास्थाने द्वादशान्ते, हालामिति अलिपुरम्, गोश्रुतिमिति गोकर्णम्, नृपसद्म राजगृहम्, वैरिञ्चीमिति ब्रह्माणीं श्रीशैलाख्यं तु तत्पीठमित्यर्थ इति जयरथः।

एवमेव तत्रैव नवयागप्रसङ्गे विवेकोद्धृतमाधवकुलग्रन्थे—

मातङ्गीवेश्म सुभगे प्रयागं परिकीर्तितम् ।
कज्जली वरुणाख्यं तु सौनी कुलगिरिः प्रिये ॥
कार्मुकी चाट्टहासं च जयन्ती चर्मकारिणी ।
चरित्रं ध्वजिनी प्रोक्तमेकाम्रास्थिविदारणी ॥
देवीकोट्टं धीवरी तु हिरण्यपुरमेव च ।
नवमं चक्रिणीपीठं यत्सुरैरपि दुर्लभम् ॥ (पृ० ४६-४७)

इति नवस्थानानि दृश्यन्ते । इमानि च कौलज्ञान[1]निर्णयधृतनवक्षेत्रनामतः प्रायोऽभिन्नानि । करवीरोऽत्र कुलगिरिपदेन, वाराणसी च वरुणापदेनोक्त इति प्रतीयते । महाकालो हिरण्यपुरमिति भिन्ने नामनी । अन्यानि नामान्युभयत्र समानानि ।

तन्त्रालोकस्यास्मिन्नेवाह्निके षण्णां राजपुत्राणां मुद्राछुम्मादिप्रतिपादके प्रकरणे जयरथेन कुलक्रीडावतारग्रन्थ उद्धृतः । तत्र तेषां निकेतनान्येवं दृश्यन्ते–

त्रिपुरोत्तरे निकेतं सिद्धिस्थानं च तद्विदुः ।
अमरस्य वरारोहे वरदेवस्य कामरुः ॥
चित्रस्य अट्टहासं वै देवीकोट्टमलेस्तथा ।
दक्षिणं चैव विन्ध्यस्य गुडिका कौलगिर्यंता ॥ (पृ० २९) ।

एवं चात्र पीठषट्कं राजपुत्रषट्कस्य निकेतनस्थानीयमुपदिश्यते ।

वौद्धमतीये हेवज्रतन्त्रे प्रथमकल्पस्य सप्तमे पटले पीठोपपीठक्षेत्रोपक्षेत्रसन्दोहो[2]पसन्दोहमेलापकोपमेलापकपीलवोपपीलवश्मशानोपश्मशानभेदेन द्वाद्रशंभूमयो निरूपिताः। तद्यथा—

पीठं जालन्धरं ख्यातमोड्डियानं तथैव च ।
पीठं पौर्णगिरिश्चैव कामरूपं तथैव च ॥
उपपीठं मालवं प्रोक्तं सिन्धुर्नगरमेव च ।
क्षेत्रं मुन्मुनि प्रख्यातं क्षेत्रं कारुण्यपाटकम् ॥
देविकोटं तथा क्षेत्रं क्षेत्रं कर्मारपाटकम् ।
उपक्षेत्रं कुलटा प्रोक्तमर्बुदश्च तथैव च ॥
गोदावरी हि[3]माद्रिश्च उपक्षेत्रं हि संक्षिपेत् ।
सन्दोहं हरिकेलं च लवणसागरमध्यजम् ॥

द्रष्टव्यम्—८ । १६-१७; पृ० २३

यत्र मुद्रितपुस्तके छन्दोहोपछन्दोहेति लिपिदुष्टः सम्प्रदायदुष्टो वा पाठः ।

'हि माद्रिश्च' इति मुद्रितः पाठो मुद्रणाशद्धिजः ।

लम्पाकं काञ्चिकं चैव सौराष्ट्रं च तथैव च ।
कलिङ्गमुपसन्दोहं द्वीपं चामीकरान्वितम् ॥
को(ङ्)कणं चोपसन्दोहं समासेनाभिधीयते ।
पीलवं च ग्रामान्तस्थं पीलवं नगरस्य च ॥
चरित्रं कोशलं चैव विन्ध्या कौमारपौरिका ।
उपपीलवं तत्सन्निवेशो वज्रगर्भ महाकृप ॥
श्मशानं प्रेतसं(हा? घा)तं श्मशानं चोदधेस्तटम् ।
उद्यानं वापिकातीरमुपश्मशानमुच्यते ॥ (१२-१८)

अत्रेत्यः पीठोपपीठक्षेत्रोपक्षेत्रसन्दोहोपसन्दोहविभागस्तन्त्रालोकेऽपि वर्णितः । "क्षेत्रं मेलापस्थानम्"(तन्त्रा० आ० ४,पृ० २९०) इति जयरथः। अत्र तु मेलापकोपमेलापकौ पृथक् परिगण्येते । तयोर्भेदास्तु न प्रदर्शिताः । पीलवशब्दः परिज्ञातेषु संस्कृतकोशग्रन्थेषु क्वापि नोपलभ्यते। स्वच्छन्दतन्त्रे तदुद्योते च (प० २, पृ० ९७-९८) कामरूपोज्जयिनीकाश्मीरकाञ्चीकरवीरदेवीकोट्टोड्डियानहिरण्यपुरवासिन आमर्दक-अग्निक-कालाख्य-एकपाद-त्रिपुरान्तक-अग्निजिह्व-करालिभीमवक्त्राख्या अष्टौ श्मशानेशाः प्रकीर्तिताः ।

तन्त्रालोके कौलज्ञाननिर्णये च पीठत्रयमेव दृश्यते । तत्र जालन्धरं न परिगणितम् । तन्त्रालोके उपसन्दोहाष्टके जालन्धरं परिगण्यते । हेवज्रतन्त्रे तु पीठचतुष्टयेषु तस्य प्राथम्यम् । अनेनैतदुन्नेतुं शक्येत यज्जालन्धरस्य पीठेषु समावेशः पश्चात्कालिक इति । साधनमालाख्ये बौद्धतन्त्रसंग्रहग्रन्थे उड्डियान-जालन्धर-कामरूप-श्रीहट्टाख्याश्चत्वारः पीठाः प्रदर्शिताः। अत्र पूर्णगिरिपीठस्य स्थाने श्रीहट्टस्य समावेशः । एष विभागो नैव प्रचारमलभत । कामरूप-पूर्णगिरि-जालन्धर-उड्डियानाख्यचतुष्पीठविभाग एव सार्वत्रिकः समुपलभ्यते साम्प्रतम् । नित्याषोडशि-

---

१. हेवज्रतन्त्रसंपादकेन ग्रन्थस्यानुवादखण्डटिप्पणीषु प्रदर्शितं यत्पीठसंबन्धी विचारो डा० बागचीमहोदयेन दोहाकोशे (पृ० ११३), प्रो० टुच्चीमहोदयेन च 'इण्डो-तिबैटिका' (III २, पृ० ३८-४५) इत्यत्र कृत इति । पुस्तकद्वयमेतद् दृष्टमस्माभिः कलिकातास्थ-राष्ट्रीयपुस्तकालये एशियाटिकसोसाइटीपुस्तकालये च । तत्र "क्षेत्रोपक्षेत्रादि सर्वं हि चतुर्विंशतिस्थानानि" (पृ० ११३) इति प्रथमे पुस्तके दृश्यते । "चतुर्विंशतिभेदेन पीठाद्यत्रैव संस्थितम् । अतस्तद्ग्रहणार्थेन खेदः कार्यो न तात्त्विकैः ।।" (पृ०११४) इति च तत्रैव टीकायाम् । द्वितीये च पुस्तके चित्तमण्डल-वाङ्मण्डल-कायमण्डलवर्तीनि क्रमेण मलय-जालन्धर-उड्डियान-अर्वुद-गोदावरी-रामेश्वर-देवीकोट्ट-मालवाख्यानि कामरूप-चम्पा-(उट्र)-तिस्कुन-कोशल-कलिङ्ग-लम्पाक-काञ्ची-हिमालयाख्यानि, प्रेतपुरी-गृहदेवता-सौराष्ट्र-सुवर्णद्वीप-नागर-सिन्धु-मेरु-कुलूताख्यानि चाष्टकत्रयात्मकान्याहृत्य चतुर्विंशतिस्थानानि प्रदर्शितानि?।

कार्णवे योगिनीहृदये चायमङ्गीकृतः । व्याख्यातं च तथैव व्याख्याकारैः सर्वैः । अर्थरत्नावल्यां ओजापूकास्पर्शाख्यं पीठपञ्चकमुदटङ्कि (पृ० ११) । अर्थरत्नावल्युद्धृते उत्तरषट्कशास्त्रे तु कामरूप-कोल्लगिरि-सोपार-उड्डियान-मलयगिरि-कुलान्तक-जालन्धर-देवीकोट्टाख्यान्यष्टौ पीठानि दृश्यन्ते । ईशानशिवगुरुदेवपद्धत्यां मन्त्रपादे (१५।४१; १७।६), ज्ञानार्णवतन्त्रे (४।६६-६७) च पठितान्येतानि ।

योगिनीहृदये (३।३७-४३) पीठन्यासप्रसङ्गे, प्रपञ्चसारप्रयोगक्रमदीपिकायां (पृ०५७९) च योगिनीन्यासविधौ एकपञ्चाशत्पीठनामानि परिगणितानि । तान्येतानि ज्ञानार्णवेऽपि (१४।११४-२३) सन्ति । तत्र तेषां संख्या पञ्चाशदेव। "ज्ञानार्णवे···पञ्चाशच्छब्दोऽप्येकपञ्चाशत्परः" (पृ० २१३) इति योगिनीहृदयसेतुबन्धे वदन् भास्कररायस्तथैव ज्ञानार्णवग्रन्थं संवादयति। तदुचितमेव । ज्ञानार्णवापेक्षया योगिनीहृदयं प्राचीनमित्यन्यत्र प्रतिपादितमस्माभिः । स्वल्पेन नामभेदेन सह योगिनीहृदयस्यैव नामावली दृश्यतेऽत्र । पूर्वं तन्त्रालोकादिषूद्धृतानां प्रायः सर्वेषामेव पीठोपपीठादीनां समाहारोऽत्र संपद्यते ।

शारदातिलकटीकायां राघवभट्टेन "अष्टपीठं महादेव्या अष्टाष्टकसमन्वितम्" (१।८५), इत्यस्य व्याख्यानप्रसङ्गे चतुष्षष्टिपीठप्रतिपादकं श्लोकत्रयमुद्धृतम् । तद्यथा —

मायामङ्गलनागवामनमहालक्ष्मीचरित्रा भृगु-
च्छायाछत्रहिरण्यहस्तिनमहेन्द्रोड्डीशचम्पापुरम् ।
षष्ठक्षीरकमञ्जनेश्वरपुरैलाश्चन्द्रपूः श्रीगिरिः
कोलाकुल्लकपूर्णपर्वतकुरुक्षेत्रैकलिङ्गार्बुदाः ॥
काश्मीरैकाम्रकाञ्चीमलयगिरिवरैकारकन्धूतदेवी-
कोट्टाम्रातेशजालन्धरसुरभिमनीषाद्रिकाशीप्रयागाः ।
त्रिस्रोतः कामकोट्टोज्जयिनीसमथुरं कोशला कान्यकुब्जो-
ड्यानोङ्कारादृहासा विरज इह ततः कुण्डिनं राजगेहम् ॥
नेपालपुण्ड्रवर्धनसालवपरसीरकामरूपकेदाराः ।
विन्ध्यमहापथगोश्रुतिकाम्पिल्यश्रीपीठमरुदीशाः ॥ (पृ० ५२-५३)

अर्थरत्नावल्यां (पृ० ७४) पीठोपपीठक्षेत्रोपक्षेत्रसन्दोहोपसन्दोहशब्दा दृश्यन्ते । परवर्तिनि ...ले विभाग एव नाङ्गीकृतः, सर्वाणि च तानि स्थानानि पीठशब्दकुक्षिनिक्षिप्तान्यभूवन् ।

सिद्धान्तागमेषु २२४ संख्याकानि भुवनानि भवन्ति । अत्रत्येषु पीठनामसु कानिचनां- ...स-गोकर्ण-कुरुक्षेत्र-आम्रातकेश्वर-श्रीशैलप्रभृतीनि नामानि तत्राप्यवलोक्यन्ते । एवमत्र ...यने यत्सूत्रं तेषु तेषु शाक्तेषु सम्प्रदायेषु तानि तानि तन्त्रप्रधानानि पूजास्थानानि तत्तदा- ...विर्भावस्थलानि वा तरतमभावेन पीठोपपीठादिनाम्ना प्रथितान्यभूवन् । कालक्रमेण तेषां

अत्रत्य आन्तरपीठक्रमो दर्शनप्रकरणे प्रतिपादयिष्यते ।

वैशिष्ट्यं विस्मृतिं जगाम, शैवानि वैष्णवानि च तीर्थानि तत्र समावेशितानि । साम्प्रतं विभिन्नेषु ग्रन्थेषु पठितानि पीठनामानि पञ्चशताधिकानि भवन्ति। तान्यक्षरक्रमेण यथासंभवं परिचयादिपुरःसरं स्थापितानि "दी शाक्त पीठाज्" इत्याख्ये ग्रन्थ इति तत एवावलोकनीयानि। विस्तृतायामस्यां सूच्यां तन्त्रालोकादिषूपरिपठितेषु ग्रन्थेषूद्धृतानि कुलूता-लाहुला-एडाभी-ऐरुडिका-कुडयाकेशी-खेटक-गर्गिकाप्रभृतीनि नामानि नोपलभ्यन्ते । लिपिदोषपाठभेदादिना वृद्धिमापिता पीठनामावली तेषां तेषां स्थानानां प्राचीनानामाधुनिकानां च नाम्नां सामञ्जस्येनैव लघ्वीक्रियेत। हन्त ! प्राचीनान्यनेकानि स्थानानि साम्प्रतं विस्मृतिगर्ते पतितानि। बहिस्थं सर्वमपि देह एव भावनीयमिति भावनाप्रवणैः प्रधानतमेषु पीठचतुष्टयेषु जालन्धरपूर्णगिरिपीठयोः, द्वादशज्योतिर्लिङ्गेषु च द्वित्राणां ज्योतिर्लिङ्गानां यदा निश्चिता स्थितिर्नावबुद्ध्यते, तदा का कथा एकपञ्चाशतां चतुष्षष्टीनामष्टोत्तरशतपीठानां वा निश्चितस्य स्वरूपपरिचयस्य ? अत्र धर्मभीरुभिः साम्प्रदायिकैरवश्यं य[1]तनीयमित्येवाधुना वक्तुं शक्यते ।

एवमत्र नित्याषोडशिकार्णवप्रथमसूत्रोपात्तानि गणेशग्रहनक्षत्रयोगिनीराशिदेवीमन्त्रमातृकापीठपदानि प्रसङ्गोपात्तमुद्रापदेन सह व्याख्यातानि । तेन च प्रसङ्गेनात्रत्यः प्रथमतृतीयचतुर्थपटलप्रतिपादितो विषयः समालोचितः । अथ चतुर्थपटलस्याद्येषु विंशतिप्रायेषु श्लोकेषु निरूपितं त्रैपुरं दर्शनं विव्रियते ।

त्रैपुरं दर्शनम्

शैवेषु शाक्तेषु चाद्वैतागमदर्शनेषु प्रका[2]शशब्दः शिवतत्त्ववाचकत्वेन, विमर्शशब्दश्च शक्तितत्त्ववाचकत्वेन प्रसिद्धः । शिवपारम्यवादिनः शैवाः, शक्तिपारम्यवादिनः शाक्ता इत्येव

---

१. बौद्धानां 'महामायूरी' इत्याख्ये ग्रन्थे यक्षाणां तद्वसतीनां च विस्तृता नामावली वर्तते । ग्रन्थ एष "सिनो-इण्डियन स्टडीज" (भा० ३, सं०१-२, पृ०१३-८७; अप्रैल-जुलाई १९४७) इत्यत्र मुद्रितः । ग्रन्थस्यास्य संपादकेन डा० प्रबोधचन्द्रबागचीमहोदयेन स्थानपरिचयादिषु महदायस्तम् । पीठनाम्नां स्थानानां च निर्णयायैतत्साहायकमाचरेत् ।

२. "विश्वस्य शिवादेर्भूम्यन्तस्य ··· अस्फुटस्य स्फुटीकारः प्रकाशः, इदन्तया हृदयङ्गमीभावो विमर्शः" (पृ० ७०) इति योगिनीहृदयदीपिका। "अत्र प्रकाशत्वं नाम 'इच्छामि', 'जानामि', 'करोमि' इत्युत्तमपुरुषान्तर्गतस्फुरणरूपाहंपरामर्श एव" (पृ० ५) इति, "विमृश्यते परामृश्यत इदमिति विमर्शः प्रपञ्चः। इदमित्येव हि परमात्मना सृष्टस्य जगतः प्रसिद्धः परामर्शः" (पृ० ३) इति, विमर्शो नाम अनवधिकाकारविस्फुरणशक्तिः" (पृ० १५) इति च चिद्वल्ली कामकलाविलासटीका। अथवा जगदुत्पत्तिस्थितिलयहेतुभूताकृत्रिमाहंभावपरामर्शो विमर्शः। तथा नागानन्दाः—विमर्शो नाम विश्वाकारेण वा, विश्वप्रकाशेन वा, विश्वोपसंहारेण वाऽकृत्रिमोऽहमिति स्फुरणम्" (पृ० ४) इति तत्रैव प्रदर्शितं विमर्शपदव्याख्यानान्तरं तु शक्तिपारम्यवादिनां पक्षमुपस्थापयति ।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ानो भेद एतेषु दर्शनेषु । प्रक्रियान्तरं प्रायः समानमेव । शिवदृष्टौ तद्वृत्तौ च तृतीयाह्नि-
रम्भे चतुःखण्डात्मकशिवसूत्रव्याख्यातृभट्टकल्लटशिष्यस्य भट्टप्रद्युम्नस्य तत्त्वगर्भस्तोत्रीयं

यस्या निरुपधिज्योतीरूपायाः शिवसंज्ञया ।
व्यपदेशः परां तां त्वामम्बां नित्यमुपास्महे ॥

मेतदुद्धृत्य शक्तिपारम्यपक्षः प्रतिक्षिप्तः । अत्रेदं बोध्यम्—षडध्वान्तःपाति षट्त्रिंश-
त्त्वातीतं परं ब्रह्म । तच्च संविद्रूपम् । "श्रीभट्टप्रद्युम्नपादैः संविच्छक्तिप्रसरमात्रतां
षट्त्रिंशत्तत्त्व[1]यामुपपाद्य" (भा० २, पृ० ३३७) इतीश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यामभि-
नवगुप्तपादोक्त्या भट्टप्रद्युम्नमते षट्त्रिंशत्तत्त्वानां संविच्छक्तिप्रसरमात्रत्वमङ्गीक्रियते । एवं च
शाक्तेषु दर्शनेषु संविदभिधानं परं ब्रह्म । तत एव सर्वं प्रवर्तते । संविदियं शैवैरपि नापलपितुं
शक्यया । अत एवोक्तमभिनवगुप्तेन प्रत्यभिज्ञाविवृतिविमर्शिन्याम्—"इह भावानां सत्त्वमसत्त्वं
वा व्यवतिष्ठमानं संविद्विश्रान्तिमन्तरेण नोपपद्यते । संविद्विश्रान्ता हि भावाः प्रकाशमाना
भवन्ति । प्रकाशमानता चैषां संविदभेद एव । प्रकाश एव संविद्यतः । • • • तदमी प्रकाश एव
तावद्विश्रान्ता भावाः । प्रकाशश्च विमर्शशून्यो न भवति । • • • संविदो विमर्शपर्यन्तत्वात्"
(भा० १, पृ० ४-६) । अत्र स्वदर्शनानुसारं संविदः प्रकाशविमर्शात्मकत्वं साध्यते । शाक्ते तु
दर्शने संविदः षट्त्रिंशत्तत्त्वातीतत्वात् प्रकाशविमर्शात्मकस्य शिवशक्तिरूपस्याद्यस्य तत्त्वद्वय-
स्यापि तत्प्रसरमात्रत्वमेव सिद्ध्यति । अत एव योगिनीहृदय-ऋजुविमर्शिन्यादिषु तत्र तत्र
मन्त्र-मातृका-मुद्रा-चक्रप्रभृतीनां संविदात्मकत्वमेव प्रदर्श्यते । देशकालाकारैरनियन्त्रित-
स्वभावत्वान्महत्त्वोपेता त्रित्वावस्थितसमस्तधर्मपूरणी चिदानन्दघनस्वात्मपरमार्था स्पृहणीयतया

"इच्छामि, 'जानामि' इत्यादावुत्तमपुरुषान्तर्भासमानं स्फुरणान्वयि ज्ञानमेव
प्रकाशाभिधानं ब्रह्म । तच्च सर्वज्ञत्वसर्वेश्वरत्वसर्वकर्तृत्वपूर्णत्वव्यापकत्वादिशक्ति-
संवलितम् । तस्य चानन्दरूपांश एव स्फुरणम्, पराहन्ता, विमर्शः, परालालिता-
भट्टारिका, त्रिपुरसुन्दरीत्यादिपदैर्व्यवह्रियते । उक्तं च विरूपाक्षपञ्चाशिकायां
विश्वशरीरस्कन्धे—"ईश्वरता कर्तृत्वं स्वतन्त्रता चित्स्वरूपता चेति । एतेऽहन्तायाः
किल पर्यायाः सद्भिरुच्यन्ते ॥" (श्लो० ८) इति । पराहन्तामन्तरेणेदन्ताया
अस्फुरणादहमिदमोः ससंबन्धित्वादिदंपदगम्यस्य दृश्यस्याहन्तारूपशक्त्या तद्विशिष्टब्रह्मणा
वा जन्यत्वम् । तच्च दृश्यं तत्परिणाम एव, 'तस्यां परिणतायां तु न कश्चित् पर
उच्यते" (४।५) इति वामकेश्वरतन्त्रात्" (पृ० ४-५) इति वरिवस्यारहस्यप्रकाशे ।
शक्तिपारम्यपक्षो यथा नाभिमतो भास्कररायस्य तथाऽनुपदमेव प्रतिपादयिष्यते ।

उपपादनं तेन तत्त्वगर्भस्तोत्रे कृतं भवेत् ।

हृदयहारिणी संविदेव महात्रिपुरसुन्दरीपदाभिलप्या । संविदेव[1] भगवती स्वान्तःस्थितं जगद्
बहिः प्रकाशयतीति हि शाक्तदर्शनरहस्यम् । अतस्तत्त्वविकासक्रमान्तर्निविष्टं शिवशक्तिक्रम-
माधृत्य शक्तिपारम्यखण्डनं नैव युक्तिसहम् । सोऽयं शक्तिपारम्यपक्षो नित्याषोडशिकार्णवे
चतुर्थे पटले "त्रिपुरा परमा शक्तिराद्या जातादितः प्रिये" (४।४) इत्यादि "एवं देवी त्र्यक्षरा
तु महात्रिपुरसुन्दरी" (४।१८) इत्यन्तं सम्यग् व्याख्यातः । यदाधृत्य—"शिवः शक्त्या युक्तो
यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि" (सौ० ल० १)
इत्यादीनि वचांसि लब्धप्रसराणि ।

इह वामकेश्वरदर्शने त्रिपुराभिधाना परा संविदेव परं ब्रह्मेत्युक्तम् ।

त्रिमूर्तिसर्गाच्च पुराभवत्वात् त्रयीमयत्वाच्च पुरैव देव्याः ।
लये त्रिलोक्या अपि पूरकत्वात् प्रायोऽम्बिकायास्त्रिपुरेति नाम ॥
शिवशक्त्यात्मसंज्ञेयं तत्त्वत्रितयपूरणात् ।
त्रिलोकजननी चाथ तेन सा त्रिपुरा स्मृता ॥

इतीमौ त्रिपुरा[2]निर्वचनप्रतिपादकौ श्लोकौ प्रसिद्धौ । तच्च त्रिपुराभिधानं परं ब्रह्म

---

१. "संविदेव भगवती वस्तूपगमे नः शरणम्" इत्युक्तवद्भिः प्राभाकरैः, भासर्वज्ञप्रभृतिभि-
र्नैयायिकैः, वाचस्पतिमिश्रप्रभृतिभिश्च यद्यपि ज्ञानपर्यायत्वेन संविच्छब्दः प्रयुज्यते,
तथापि "नोदेति नास्तमेत्येका संविदेषा स्वयंप्रभा" (१।७) इति पञ्चदश्युक्तदिशा तस्याः
सच्चिदानन्दात्मकपरब्रह्माभिन्नज्ञानार्थकत्वमङ्गीकर्तव्यम् । लौकिके ज्ञाने संविच्छब्दप्रयोग-
स्तन्मूलक एव । "प्राक्तनकुशलविपाकप्रवर्तितसंवित्सारपरामर्शाभ्यासतपःप्रभावप्रति-
लब्धोन्मेषेण भट्टशङ्करनन्दनेन" (भा० २, पृ० १९९) इति, "संवित्सारमीमांसकेन
भट्टश्रीनारायणेन" (भा० २, पृ० १९७) इतीश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यामभिनवगुप्तो-
क्तिदिशा प्रज्ञालङ्काराख्यभाट्टदर्शनग्रन्थकर्तुर्भट्टशङ्करनन्दनस्य, स्तवचिन्तामणिकर्तुर्भट्ट-
नारायणस्य च मीमांसकत्वं संवित्सारमात्राङ्गीकर्तृत्वं च ज्ञायते । तदेवं मीमांसकानां
प्राभाकराणां कौमारिलानां वेदान्तिनां नैयायिकानां च संविदभ्युपगमवादः शाक्तदर्शनमूलकः
स्वतन्त्रो वेत्ययं स्वतन्त्रस्य निबन्धान्तरस्य विषयः ।

२. त्रिपुरापदस्य नानाविधा निरुक्तयस्तत्र तत्र दृश्यन्ते । तद्यथा—"त्रिभ्यः पुरा त्रिपुरा ।
त्रिबिन्दुत्रितत्त्वेभ्यः पुरा पूर्वं स्थितेति भावः" (पृ० १९३), "त्रिपुरा वर्णानामादिभूता
कारणरूपा सेयमकारहकारकामकलापर्यायप्रकाशविमर्शरूपाऽपीति यावत्" (पृ० १९३),
"परमा शक्तिरेकविधैव सती बीजोच्छूनदशायां ज्ञानक्रियेच्छारूपत्रयबिन्दुरूपे वाह्यमाना
त्रैविध्यं गता त्रिपुरा" (पृ० २०६), "एवं त्रिशक्तित्रिचक्रत्रिधामत्रिबीजत्रितत्त्वत्रिगुण-
त्रिकोणादिभेदत्रयाविर्भाविण त्रिवृत्करणरचनावैचित्रीचतुरा त्रैविध्येन समस्ताध्वव्यापिनी
त्रिपुरा" (पृ० २०७) इत्यर्थरत्नावल्याम् । "धामतत्त्वपीठलिङ्गमातृकादिभ्यस्त्रिभ्योऽपि पुरा

In Public domain. Digitization Muthulakshmi Research Academy

विमर्शसामरस्यात्मकं[1] वीजावस्थारूपम् । ततो वीजादुच्छूनादिव कलातत्त्वभुवनाभिधेय-त्रिकस्य स्थूलस्य. वर्णपदमन्त्राभिधानरूपशब्दत्रिकस्य सूक्ष्मस्य कर्तृकरणकर्मव्युत्पत्त्या लोकनलोक्यात्मनः षट्त्रिंशत्तत्त्वसमुदायरूपस्य त्रैलोक्यस्योत्पत्तौ कारणभूता स्पन्दशक्ति-[2]

ा विद्यते सा त्रिपुरा देवी प्रकाशविमर्शसामरस्यरूपिणी" (पृ० १२), "मातृमानमेयरूपाणां त्रिपुराणाम्" (पृ० ३०३), "वामादीनां पुराणां तु जननी त्रिपुराम्बिका" (पृ० ३०५), वामाज्येष्ठारौद्रयाख्यानां···त्रिपुराणां जननी" (पृ० ३०७) इति योगिनीहृदये तद्दीपिकायां । "त्रिभ्यस्तेजोऽबन्नादिभ्यः पुरा भूता त्रिपुरेति" (पृ० ९), "त्रिवृत्कृतप्रपञ्चपूरणात् पुरैव परं ब्रह्मेत्यभिधीयते" (पृ० १०), सच्चिदानन्दस्वरूपिणी त्रिपुरेति निश्चीयते" पृ० ११), "त्रिधाऽवस्थितसमस्तवस्तुपूरणात् सर्वयोगिभिरुपास्यत्वेन स्पृहणीयत्वाच्च पुरा" (पृ० ३७) इति चिद्वल्ल्यां कामकलाविलासटीकायाम् । "पुरशब्दः शरीरार्थः । णि पुराणि यस्याः सा" (पृ० १४०) इति नि० सेतुबन्धे । "तिसृभ्यो मूर्तिभ्यः पुरातनत्वात् पुरा । तदुक्तम्—"मूर्तित्रयस्यापि पुरातनत्वात्तदम्बिकायास्त्रिपुरेति नाम" इति । उपादीयसूत्रमपि—"तत्त्वत्रयेण भिदा" इति । एकमेव ब्रह्म तत्त्वत्रयेण भिद्यत इत्यर्थः । भाष्ये तु तत्त्वपदं गुणमूर्तिबीजजगत्पीठखण्डादिपरत्वेन बहुधा व्याख्यातमिति गुणादिभ्यः इत्यर्थः । त्रिपुरार्णवे तु—"नाडीत्रयं तु त्रिपुरा सुषुम्णा पिङ्गला इडा । मनो बुद्धिस्तथा तं पुरत्रयमुदाहृतम् ॥ तत्र तत्र वसत्येषा तस्मात्तु त्रिपुरा मता" इत्युक्तम् । कालिका-पुराणेऽपि—"त्रिकोणं मण्डलं चास्याः" इत्यादि प्रस्तुत्य "सर्वं त्रयं त्रयं यस्मात्तस्मात्तु त्रिपुरा मता" इति । "देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वरास्त्रैलोक्यं त्रिपुरी त्रिपुष्कर-त्रिब्रह्म वर्णास्त्रयः । यत्किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं तत्सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः ॥" (श्लो० १६) इति लघुस्तवे । "पूर्वचतुःशत्यां तुर्यपटले "त्रिपुरा परमा शक्तिः" (४।४) इत्यारभ्य "त्रिपुरा ख्यातिमागता" (४।१६) इत्यन्तेन ग्रन्थेनान्यान्यप्येतन्नामनिर्वचनान्युक्तानि, तानि तु तट्टीकायामेवास्माभिर्व्याख्या-तानीति तत्रैव द्रष्टव्यानि" (पृ० १३२) इति च ललितासहस्रनामभाष्ये सौभाग्य-भास्करे ।

त्र सामरस्यं समरसता परमं साम्यमत्यन्ताभेदः" (पृ० १९५) इति सौभाग्यभास्करे भास्करराय: ।

स्पन्दशब्दश्चायं स्वस्वभावपरामर्शमात्रस्य नित्यस्य शून्यताव्यतिरेचनकारणभूतस्य ताव-न्मात्रसंरम्भात्मनः शक्त्यपराभिधानस्य पारमेश्वरस्य धर्मस्य किञ्चिच्चलनात् स्पन्द धात्वर्थानुगमाद् वाचकत्वेन व्यपदिष्टः" (पृ० १३-१४) इति स्पन्दकारिकाविवृतौ भट्ट-रामकण्ठः । "हृदये स्वविमर्शोऽसौ द्रावितशेषविश्वकः ॥ भावग्रहादिपर्यन्तभावी सामान्य-त्मकः । स्पन्दः स कथ्यते शास्त्रे स्वात्मन्युच्छलनात्मकः ॥" (४।१८२-१८३) इति तन्त्रालोके । "वस्तुतस्तु न कश्चिदुदेति व्ययते वा, केवलं स्पन्दशक्तिरेव भगवत्यक्रमापि

रुज्जृम्भते । बीजावस्थायामङ्कुरकाण्डपत्रपुष्पफलादिवदस्यां स्पन्दावस्थायामन्तः सदात्मना वर्तते षट्त्रिंशत्तत्त्वग्रामभूतः कार्यरूपः प्रपञ्चः । अस्यां षडध्वस्फारमयषट्त्रिंशत्तत्त्वगर्भमहा-हन्तापरामर्शमहाविभूतिरूपप्रपञ्चात्मना महाविकासभावमापन्नायामेतत्स्थितिव्यतिरिक्तो नापरः कश्चनावतिष्ठते । प्रकाशरूपस्य शिवस्य हि विमर्श एव स्वभावः । तदुक्तं प्रत्यभिज्ञायाम्—

स्वभावमवभासस्य विमर्शं विदुरन्यथा ।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः ॥ (१।५।११)

अतः शक्त्या युक्त एव शिवो जगत्सृष्टौ प्रभवति, अन्यथा स स्पन्दितुमपि नालम् ।

शिवोऽपि शवतां याति कुण्डलिन्या विवर्जितः ।
शक्तिहीनो हि यः कश्चिदसमर्थः स्मृतो बुधैः ॥

इति हि देवीभागवतम् । किञ्च, शक्तिरहिते शिवे नाम शिवमहेश्वरशङ्करपरमेश्वर-महादेवमृडमहेशानेशाद्यभिधानव्यवहारः, धाम स्थानप्रकाशानुभवोन्मेषोद्यन्तृतादिसिद्धिश्च नैव भवतः । तदभावे च कथं हि नाम परिज्ञायेत शिवः । अथ यथाकथञ्चित् शिवे परिज्ञातेऽपि तत्र शिवशक्तिसामरस्यात्म परिपूर्णाहंपरामर्शस्थितिलक्षणं मोक्षाख्यमकृत्रिमं शर्म, सृष्टिस्थितिसंहार-तिरोधानानुग्रहात्मकं प्रत्यभिज्ञाहृदयैकादशसूत्रोक्तमाभासनरक्तिविमर्शनबीजावस्थापनतद्विलाप-नात्मकं वा कर्म न प्रभवेताम् । अपि च, अशक्तः शिव इत्यङ्गीकृतौ ध्यानसमाधानवेलायां महानन्दोदधिनिमग्नानां महायोगिनां विश्वैकात्म्यात्मशिवशक्तिसामरस्यमहाह्रदरमणं तत्र

तथा तथाऽऽभासरूपतया स्फुरन्त्युदेतीव व्ययत इव च" (पृ० ५) इति स्पन्दनिर्णये क्षेमराजः । "स्पन्दो नाम परायास्तत्त्वरूपेण प्रसारः" (पृ० २८२) इति योगिनीहृदय-दीपिकायाम् । "स्पन्दः षट्त्रिंशत्तत्त्वात्मना परिणामः । तेनाव्याकृतनामरूपजगत एव स्पन्द इति प्रायेण तन्त्रेषु व्यवहारः" (पृ० ४४) इति वरिवस्यारहस्यप्रकाशे । एतेन परायाः संविदः षट्त्रिंशत्तत्त्वातीतः किञ्चिच्चलत्तारूपः षट्त्रिंशत्तत्त्वात्मना परिणममानो धर्मः स्पन्द इत्यभिधीयते ।

१. क्रमदर्शने तु सृष्टिस्थितिसंहारानाख्याभासात्मकं कृत्यपञ्चकमभिमतम् । एतच्च महार्थ-मञ्जर्यां ३९-४० कारिकयोस्तत्परिमले च विस्तरेणोपपादितम् । तत्रानाख्यमित्याख्या-शून्यत्वमुच्यते । आख्या च पश्यन्त्यादिस्थूलवाक्त्रितयस्वभावा । भासा च सृष्ट्यादिकृत्या-क्रान्तविश्ववैचित्र्यव्यवहारगर्भिणी सर्वोत्तीर्णा सर्वानुग्राहिणी च पारमेश्वरी चिच्छक्तिः । तत्रानाख्यातत्त्वं वामकेश्वरदर्शनेऽप्यङ्गीक्रियते । "अनाख्या तिरोधानानुग्रहयोः समष्टिः, कृत्यपञ्चकेष्वप्यौदासीन्यावलम्बनरूपावस्थानविशेषो वा" (पृ० २३) इति वरिवस्या-रहस्यप्रकाशे भास्करराय: । एवं चास्मिन्मते भासातत्त्वमनाख्यायामेवान्तर्भूतम् . सृष्टि-स्थितिसंहारानाख्याचक्रप्रपञ्चश्चक्रसृष्टिप्रकरणे व्याख्यातव्यः ।

In Public domain. Digitization Muthulakshmi Research Academy

थिरीकरणं च न भवति। शक्तेस्तु धर्मधर्म्युभयात्मकत्वान्नाम धाम शर्म कर्म रतिः वेति सर्वमप्युपपद्यत इति भावः।

तदेवं परिस्फुरत्तात्म शक्तिभावापन्नं तेजः सूक्ष्माकारस्वरूपमादधत् कवलीकृतनिश्शेष-स्य जगतो बीजाङ्कुरभावेनावतिष्ठते। जगदुद्वमनग्रसनरूपिणी महाशक्तिर्विश्ववैचित्र्य-सयिपूर्वामाज्येष्ठारौद्र्यात्मना सृष्टिस्थितिसंहृतिकरी शृङ्गाटाकारतां धत्ते। एवमेषा ति परमा शक्तिरेकैव ब्रह्मविष्ण्वीशरूपिणी ज्ञानक्रियेच्छाशक्त्यात्मिका त्रैलोक्यं त्रिपुरा परिकीर्त्यते। इदन्ताप्रसरोन्मुखीयं सृष्टिमार्गं स्वाभाविकं विहाय गुरूक्त्युक्त्या नं प्रति मध्यचारमार्गेण मूलाधारगतचतुर्दलपद्ममध्यत्रिकोणकुलस्थानाद् यदोल्लसति, धारादितत्तदाधारगतकमलोदरनिर्भेदनक्रमेण ब्रह्मस्थानगतहंसात्मशिवाधिष्ठानार्कोप-शभुवं प्राप्य महाप्रकाशशिवसंमेलनसमुज्जृम्भितं महानन्दलक्षणं चन्द्रमण्डलं द्रावयन्ती स्यमहानन्दानुभवरूपामृतस्यन्दात्मपरमानन्देन नन्दिता कुलेश्वरी देहाभिमानिनी संवित् त्वसमुदायरूपकुलशरीराभिमानं विसृज्यार्थदेहप्रमातृतां त्यक्त्वाऽकुलस्थानवर्तिनं लक्षणं कुलरूपविवर्जितं च परं पुरुषमुपैति। एवं संहारक्रमेणोपभोगसन्तुष्टा ततः ात् सृष्टिमार्गं प्रविश्य कुलपुरुषं प्रलोभयन्तीवावतिष्ठते। पुनरेकाकिनी महास्फुरत्ता-ानन्दमयी महाहन्तात्मिकां स्वसंविदमनुभवति। तदेवं गमागमेन स्वेच्छया जगच्चित्र-लापनकारिणी स्वस्वातन्त्र्यव्यतिरेकेण नान्यदुपादानसहकारिकारणादिकमपेक्षते। त्यभिज्ञाहृदये—"चितिः स्वतन्त्रा विश्वसिद्धिहेतुः", "स्वेच्छया स्वभित्तौ विश्वमुन्मी- (सू० १-२) इति।

विश्वोत्तीर्णा भानैकशरीरिणीयं त्रिपुरा विश्वात्मना प्रकाशमानाऽऽत्मविद्याशिवाख्येन न व्यक्तिभावमयते, वर्णत्रयात्मकं शक्तित्रयात्मकं च रूपमाधत्ते। वाग्भवाधिष्ठात्री वाग्भवे बीजे विद्यारूपतयाऽमृतत्वप्रकाशिका, कामकलात्मिका क्रियाशक्तिः कामराज-चमत्कारसम्पादयित्री, शिवरूपिणी चेच्छाशक्तिः शक्तिबीजे परमशिवसामरस्यापादि-क्षरेयं देवी महात्रिपुरसुन्दरी श्रीविद्यारूपेण प्रथते। नित्याषोडशिकार्णवव्याख्यातृभिः ादिभिः स्थलद्वये (१।१८७; ५।१) पाठभेदमुखेन कामतत्त्वं विषतत्त्वं मोक्षतत्त्वं च ते। तत्र शिवानन्देन कामराज-शक्ति-वाग्भवबीजार्थकत्वेनेमानि पदानि व्याख्यातानि। बीजस्य कामकलारूपत्वम्, शक्तिबीजस्य विषनिर्हरणार्थत्वम्, वाग्भवस्य च मोक्षप्रदत्वं तेऽत्रैव। अतः शिवानन्दव्याख्यानं न कमप्यसामञ्जस्यं धत्ते। तन्त्रालोके तु कुलगुह्वर-नैषामर्थान्तरं प्रतिपाद्यते। तद्यथा—

अत एव विसर्गोऽयमव्यक्तहहकलात्मकः।
कामतत्त्वमिति श्रीमत्कुलगुह्वर उच्यते ॥ (३।१४६)

ना कामतत्त्वम्,

काकचञ्चुपुटाकारं ध्यानधारणवर्जितम्।
विषतत्त्वमनच्काख्यं तत्र स्नेहात् प्रकाशितम् ॥ (३।१६९)

ना विषतत्त्वम्,

निरञ्जनं परं धाम तत्त्वं तस्य तु साञ्जनम् ॥
क्रियाशक्त्यात्मकं विश्वमयं तस्मात् स्फुरेद्यतः।
इच्छा कामो विषं ज्ञानं क्रिया देवी निरञ्जनम् ॥
एतत्त्रयसमावेशः शिवो भैरव उच्यते। (३।१७१-१७३)

इत्यादिना च निरञ्जनं तत्त्वं प्रतिपाद्य तत्त्वत्रयस्य इच्छा-ज्ञान-क्रियारूपत्वमाख्यायते। नित्याषोडशिकार्णवे तु वाग्भवं ज्ञानशक्तिमयम्, कामराजबीजं क्रियाशक्तिमयम्, शक्तिबीजं चेच्छाशक्तिमयमिति विशेषः। मन्त्रप्रकरणे नेत्रतन्त्रप्रामाण्येन मन्त्राणां शिवशक्त्यात्मस्वरूपत्वं प्रत्यपादि। तद्वदेवात्रापि त्रिपुराऽऽत्मविद्याशिवाख्येन तत्त्वत्रयेण व्यक्तिमागता त्रिबीजरूपतां धत्ते। श्रीविद्यार्थमनुचिन्तयत आराधकस्य च "स्पर्शनं चावलोकश्च" इत्युत्तरषट्कदिशा मन्त्रचैतन्याभिव्यक्त्या स्वयमाविष्टा भवति, समाराधको महात्रिपुरसुन्दरीसतत्त्वो भवतीति यावत्।

अत्र "तस्यां परिणतायां तु न कश्चित्पर इष्यते" (४।५) इति, "रमते स्वयमव्यक्ता त्रिपुरा व्यक्तिमागता" (४।१६) इति च शक्तिपरिणामवादः प्रतिपादितो भवति। "बीजावस्थायामङ्कुरकाण्डपत्रपुष्पफलादिवच्छक्त्यवस्थायामन्तः सदात्मना वर्तते कार्यरूपः प्रपञ्चः" (ऋजु० पृ० १९५-१९६) इति च व्याख्यायते सत्कार्यवादः शिवानन्देन। प्रतिपाद्यते चौपनिषदानां तान्त्रिकाणां चात्र विशेषो भास्कररायेणैवम्—'औपनिषदानां पक्षस्तु परस्य चिद्रूपस्य ब्रह्मणः शक्तिर्मायाख्या। सा च जडैव। सैव च जगतः परिणाम्युपादानम्। परं ब्रह्म तु विवर्तोपादानम्। अत एव जगतोऽपि मायिकत्वाज्जडत्वं मिथ्यात्वं च। ••• तान्त्रिकाणां पक्षस्तु परचिन्निष्ठा या चिच्छक्तिरौपनिषदानामपि संमता सैवानन्तरूपत्वान्मायेत्युच्यते। ••• तत्परिणाम एव प्रपञ्चः। अत एव च चिद्रूपः, "चिद्विलासः प्रपञ्चोऽयम्" इति ज्ञानवासिष्ठात्। अत एव च सत्योऽपि" (पृ०१३५) इति। एतेन परिणामवाद एव नित्याषोडशिकार्णवप्रतिपाद्य इत्यायाति; तथापि—"विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतम्" इत्यादिदक्षिणामूर्तिश्लोकप्रदर्शितदिशा स्वातन्त्र्यशक्त्युज्जृम्भित आभासवाद एव काश्मीराद्वयवादजीवातुभूत इति तत्र तत्र शैवेषु शाक्तेषु चागमेषु प्रतिपाद्यते। अत एव तद्वासनावासितचेतोवृत्तिभ्यां शिवानन्दविद्यानन्दाभ्यामाभासवादमुखेनैव व्याख्यायते ग्रन्थः।

आभासो हि नाम नान्यथाभावः, प्रत्युतान्तःस्थितस्यैव बहिः प्रकाशनमुन्मेषपदाभिधेयम्। उन्मेषश्चायं सांख्यानां विकृतिलक्षणात् परिणामात्, वेदान्तिनामन्यथाप्रथनरूपाद्विवर्ताच्च सर्वथा भिद्यते। प्रकाशो ह्यत्र स्वतन्त्रायाः संविदः स्वीकृतो न पुनरचेतनायाः प्रकृतेः। अपि च.

---

१. भास्करप्रभृतिभिराचार्यैरविकृतपरिणामवाद एवाङ्गीकृतः। स एवात्र प्रतिपादितो न त्वाभासवादः काश्मीरागमसंमतः। किमेतेनैतत्कल्पयितुं शक्यते नित्याषोडशिकार्णवाविर्भावकाले नासीदाभासवाद इति।

In Public domain. Digitization Muthulakshmi Research Academy

तिपरिणामवादे गुणानां साम्यं वैषम्यमुपैति, अत्र तु स्वतन्त्रा चितिः स्वस्वातन्त्र्येणाविकृता तत्तद्रूपेण स्वात्मानं प्रकाशयतीति न वैषम्यावकाशः । अन्तःस्थितस्यैव बाह्यत्वापादनं प्रकाशः । वेदान्तिनां ब्रह्म चेतनं सदपि न स्वेच्छया स्वात्मानं जगदात्मना प्रकाशयेत्, तन् स्वातन्त्र्याभावात्कर्तृत्वानुपलब्धेः । चितिस्तु स्वतन्त्रा विश्वसिद्धिहेतुः । सा हि—

जगच्चित्रं समालिख्य स्वात्मतूलिकयात्मनि ।
स्वयमेव तदालोक्य प्रीणाति परमेश्वरी ॥

प्रकाशश्च न खल्वन्यथाभावो भ्रमो वा, अपि तु चेतनस्य चेतनत्वेनैव स्वस्वातन्त्र्येण सर्वात्मना भानम् । एवं चास्मिन् मते प्रपञ्चस्य संविदेकात्मत्वं सिद्ध्यतीत्याभास-यं निर्दुष्टत्वाद् वरीयान् परिणामवादविवर्तवादाभ्याम् । आभासवादोऽयं प्रतिबिम्बवाद-ाऽभिनवगुप्तेन तन्त्रालोके तृतीयाह्निकारम्भे (पृ० १-७३) महता संरम्भेण प्रतिपादितस्तत लोकनीयो विशेषजिज्ञासुभिः ।

भास्कररायेण यद्यपि शक्तिपरिणामवाद एवाङ्गीक्रियते । उच्यते च—"एवं च ऽपि प्रपञ्चकारणतया शक्तेरावश्यकत्वे परशिव एवान्तर्गडुत्वान्नोपनिषदैः कल्प्यः" १३५) इति, तथापि नैतेन स शक्तिपारम्यवादीति भ्रमितव्यम्, योगिनीहृदयव्याख्याना- तेनैव—"पूर्वं कृतः परशिवनिरासस्तु शक्तिनिरासवादिनो जल्पकथया मुखमुद्रण-र्थो न तु वादकथया" (पृ० २३) इत्युक्तत्वात् । प्रत्युत "तेन जननमरणादिक्लेशमयसंसार-लाद् विषं शक्तिः । तद्विनिर्मोकादमृतं शिवः" (पृ०४६) इति वरिवस्यारहस्यप्रकाशे स शिवपारम्यपक्षपातित्वमात्मनो व्यनक्ति । शिवानन्दविद्यानन्दाभ्यामपि शक्तिशब्दः विमर्शवाचित्वेन प्रयुज्यते । परवर्तिनि काले शैवशाक्तदर्शनयोः संमेलनेन शाम्भवदर्शनं , यत्र हि शिवशक्त्योः समसत्ताकत्वमङ्गीक्रियते । अत एव भास्कररायेण तत्रैवोक्तम्— शिवस्येव केवलशक्तेरपि सृष्ट्यादिजनकत्वायोगात्" (पृ० २२-२३) इति । प्रकाश-र्योर्मिलितयोरेव सृष्टिजनकत्वमिति तदनुवर्तिनीं व्याख्यां विदधन्तौ शिवानन्दविद्यानन्दौ दर्शनप्रतिपादकावेव ।

यद्यपि प्रकाशविमर्शयोर्मिलितयोरेव शब्दार्थसृष्टिजनकत्वमविशिष्टम्, तथापि प्रकाशांश-सृष्टौ विमर्शांशस्यैव शब्दसृष्टौ जनकत्वमङ्गीक्रियते । त्रैपुरे दर्शने तु प्रकाशविमर्शांश- पञ्चशक्तिचतुर्वह्निसंयोगरूपात् श्रीचक्रादेव सर्वं प्रवर्तते । एवं चार्थशब्दसृष्ट्योरपि ावेवान्तर्भावः प्रसिद्ध्यति । अतश्चक्रसृष्टिरेवात्र विस्तरेण प्रपञ्च्यते ।

ष्टव्यम्—गारलैण्ड आफ लेटर्स, पृ० २५०

ास्कररायेण तु वरिवस्यारहस्यप्रकाशे (पृ० ४७) अर्थमयी शब्दमयी चेति सृष्टिद्वय-ुद्दिश्य तदनन्तरम्—"चक्रमयी देहमयी चेति सृष्टिद्वयं तु बालक्रीडनकार्थे स्थूलगृहसमाना-ारत्वेन सूक्ष्मगृहनिर्माणतुल्यमर्थसृष्टावेवान्तर्गतम्" इत्युक्तम् । तत्तु दर्शनान्तरसंस्कार-ूलकम् ।

चक्रमयी सृष्टिः

श्रीचक्रस्य संभवः

अथ प्राधान्येन योगिनीहृदयमाधृत्य चक्रमयी सृष्टिः प्रतिपाद्यते । "देशकालानवच्छिन्नं तदूर्ध्वे परमं महत् । निसर्गसुन्दरं तत्तु परानन्दविघूर्णितम् ॥" (१ । ३५) इत्यत्र योगिनीहृदये हकारादिमहाबिन्द्वन्तानां सकल-सकलनिष्कल-निष्कलानां त्रयाणामप्यूर्ध्वे स्थिता त्रित्रिरूपसमस्तवस्तुभ्यः पुरातनी देशकालानवच्छिन्ना परममहद्रूपा स्वभावसुन्दरी परप्रकाशात्मकपरशिवसामरस्यपरिपूर्णपरानन्दशालिनी विमर्शशक्तिः श्रीमहात्रिपुरसुन्दरी वर्णिता । वामकेश्वरदर्शने त्रिपुराभिधानं परं ब्रह्मेति प्रागेव प्रतिपादितम् । सा परा शक्तिः स्वेच्छया यदा विश्वसर्जनरूपां स्वात्मनः स्फुरत्तामाविर्भावयति, तदा षट्त्रिंशत्तत्त्वात्मकविश्वसृष्टिकाले सर्वप्रथमं विश्वमयस्य श्रीचक्रस्य संभवः । तद्यथा योगिनीहृदये—

यदा सा परमा शक्तिः स्वेच्छया विश्वरूपिणी ॥
स्फुरत्तामात्मनः पश्येत्तदा चक्रस्य सम्भवः । (१ । ९-१०)
आत्मनः स्फुरणं पश्येद्यदा सा परमा कला ।
अम्बिकारूपमापन्ना परा वाक् समुदीरिता ॥
बीजभावस्थितं विश्वं स्फुटीकर्तुं यदोन्मुखी ।
वामा विश्वस्य वमनादङ्कुशाकारतां गता ॥
इच्छाशक्तिस्तदा सेयं पश्यन्तीवपुषा स्थिता ।
ज्ञानशक्तिस्तथा ज्येष्ठा मध्यमा वागुदीरिता ॥
ऋजुरेखामयी विश्वस्थितौ प्रथितविग्रहा ।
तत्संहृतिदशायां तु बैन्दवं रूपमाश्रिता ॥
प्रत्यावृत्तिक्रमेणैवं शृङ्गाटवपुरुज्ज्वला ।

---

१. "वामा ज्येष्ठा रौद्री" (श्लो० २३) इति कामकलाविलासश्लोकव्याख्यानप्रसङ्गे चिद्वल्लीकारेण नटनानन्देन प्रकरणमेतदन्यथा व्याख्यातम्—"श्रीपराभट्टारिकामयमिदमेव बिन्दुतत्त्वमूर्ध्वाधोमुखनवयोन्यात्मकश्रीचक्रमभवदित्याह—वामेति । वामा ज्येष्ठा रौद्री अम्बिका; चकारात् परा शक्तिश्च । इमाः पञ्च शक्तयोऽनुत्तरांशभूताः । अनुत्तरांशाः श्रीचक्रान्तर्गताधोमुखानि पञ्च त्रिकोणानि ।······इच्छाज्ञानक्रियाशान्ता इमाश्चतस्रः शक्तय उत्तरावयवा ऊर्ध्वमुखत्रिकोणचतुष्टयरूपाः । अयं भावः—पराविलसनरूपा एता वामा-ज्येष्ठा-रौद्री-अम्बिका-पराः, तथा इच्छाज्ञानक्रियाशान्ताश्च; ······एतच्छक्तिनवकमयं नवत्रिकोणचक्रमिति । एतच्चतुःशत्याम्—'आत्मनः स्फुरणं पश्येद्यदा सा परमा कला" इत्यारभ्य "वैखरी विश्वविग्रहा" इत्यन्तेन सम्यङ् निरूपितम्" (पृ० ४५) इति । एतेन पञ्चशक्तिचतुर्वह्न्यात्मकं श्रीचक्रं पश्यन्तीमयमित्युपपाद्यते । एतच्च व्याख्यानं प्रकरणविरुद्धं व्याख्यानान्तरविरुद्धं च प्रतीयते । एकादशधा पश्यन्ती वाग् मातृकाप्रकरणे प्रदर्शिता । तदेवात्र प्रकृतम् ।

In Public domain. Digitization Muthulakshmi Research Academy

क्रियाशक्तिस्तु रौद्रीयं वैखरी विश्वविग्रहा ॥ (१ । ३६-४०)

ापोडशिकार्णवेऽपि—

वामा शिखा ततो ज्येष्ठा शृङ्गाटाकारतां गता ॥
रौद्री तु परमेशानि जगद्ग्रसनरूपिणी । (४ । ९-१०)
ज्ञानशक्तिः क्रियाशक्तिरिच्छाशक्त्यात्मिका प्रिये ॥ (४ । ११)

स एवार्थ उक्तः, स्फुटीकृतश्च श्रीमता दीपकाचार्येण त्रिपुरसुन्दरीदण्डके—"झटिति सर्वशून्यतान्तर्भूमौ निजेच्छासमुन्मेषसमयं समासाद्य वालाग्रकोटयंशरूपा विगर्भी-संसारवीजाऽनुवघ्नासि कन्दं तदा त्वमम्बिका गीयसे । तदनु परिजनितकुटिलाग्रतेजो-जननि वामेति संस्तूयसे । ततो बद्धसुस्पष्टरेखा शिखा ज्येष्ठेति संभाव्यसे । सैव काकारतामागता तदा रौद्रीति विख्याप्यसे ॥" (२४) इति । अस्यार्थोऽर्थरत्नावल्यां २०४-२०५) द्रष्टव्यः । सौभाग्यसुधोदयेऽपि—

अस्याम्बिकांशभूता शक्तिः स्वांशेन शान्तया साकम् ।
समरसभावं याता जाता ज्योतिर्मयी महाबिन्दुः ॥
सैव स्वेच्छोद्रेकाद् वामा वमनादमुष्य विश्वस्य ।
वक्रीकृतनिजरूपा सृष्टिः शृङ्गाटवामरेखा स्यात् ॥
ज्येष्ठा ज्ञानावेशादृज्वी स्थितिरेतदग्ररेखा स्यात् ।
रौद्री क्रियोपरागात् संहृतिरेतस्य दक्षिणा रेखा ॥
इत्थमियं पश्यन्ती जाता माता त्रिकोणरूपेण । (३ । १-३) इति ।

ाथपादैः कुलरत्नशास्त्रे कुलशास्त्रदृष्टया सोऽयमर्थ एवं विवृतः—

अनच्कं यत्परं ज्योतिः सर्वप्राणिहृदि स्थितम् ।
इच्छा कुण्डलिनी तस्य तेजो नादसमुद्भवः ॥
इच्छानादसमायोगाद् रौद्री शक्तिरजायत ।
आसामाधाररूपेण चन्द्रबिम्बार्धमम्बिका ॥
क्रमात् कुलोदयो व्याप्तिः कुलौघश्चायमुच्यते । इति ।

इयता प्रवन्धेन चक्रनवकसमष्टिरूपे श्रीचक्रे नवमस्य बैन्दवचक्रस्याष्टमस्य मध्यत्र्यश्रस्य च प्रतिपादिता । अत्र परावाग्रूपं बैन्दवं चक्रम्, पश्यन्तीमध्यमावैखरीरूपं च मध्यत्र्यश्रम् । योगिनीहृदयेऽन्यत्राप्युक्तः—

...शून्याकाराद्विसर्गान्ताद् बिन्दोः प्रस्पन्दसंविदः ॥
प्रकाशपरमार्थत्वात् स्फुरत्तालहरीयुतात् ।
प्रसृतं विश्वलहरीस्थानं मातृत्रयात्मकम् ॥ (१।१०-११)

त्र्यश्रयोः समष्टिः कामकला

बैन्दवमध्यत्र्यश्रयोः समष्टिभूतं रूपमेव वामकेश्वरदर्शने कामकलेति नाम्नाऽभिधीयते । र्थः कामकलाविलासे संक्षेपेणैवमुक्तः —

स्फुटशिवशक्तिसमागमबीजाङ्कुररूपिणी परा शक्तिः ।
अणुतररूपानुत्तरविमर्शलिपिलक्ष्यविग्रहा भाति ॥
परशिवरविकरनिकरे प्रतिफलति विमर्शदर्पणे विशदे ।
प्रतिरुचिरुचिरे कुड्ये चित्तमये निविशते महाबिन्दुः ॥
चित्तमयोऽहङ्कारः सुव्यक्ताहार्णसमरसाकारः ।
शिवशक्तिमिथुनपिण्डः कवलीकृतभुवनमण्डलो जयति ॥
सितशोणबिन्दुयुगलं विविक्तशिवशक्तिसंकुचत्प्रसरम् ।
वागर्थसृष्टिहेतुः परस्परानुप्रविष्टविस्पष्टम् ॥
बिन्दुरहङ्कारात्मा रविरेतन्मिथुनसमरसाकारः ।
कामः कमनीयतया कला च दहनेन्दुविग्रहौ बिन्दू ॥
इति कामकला विद्या देवी चक्रक्रमात्मिका सेयम् ।
विदिता येन स मुक्तो भवति महात्रिपुरसुन्दरीरूपः ॥

कामकला नाम त्रिपुरोपासकानां परमं रहस्यम् । मण्डनमिश्रपत्न्या भारत्या कामकला-रहस्यं पृष्टेन भगवता शङ्कराचार्येण परकायं प्रविश्य तद्रहस्यं परिज्ञातमिति श्रूयते । पामरजन-

---

१. वाङ्मयी सृष्टिर्मातृकाप्रकरणे व्याख्याता विशेषेण, अत्रापि सामान्येन प्रतिपाद्यते । भास्कररायेण वरिवस्यारहस्यप्रकाशे विवृतेऽर्थसृष्टिक्रमे कामकलाविलासस्था इमे श्लोका अपि व्याख्याता भवन्तीति तदत्रोद्ध्रियते—

"यथा सूर्याभिमुखदर्पणे तदन्तःप्रविष्टकिरणादुभयकिरणसंकलनरूपस्तेजोबिन्दुविशेषः कुड्यादौ प्रादुर्भवति, तथा प्राण्यदृष्टवशात् स्वान्तःसंहृतविश्वसिसृक्षया प्रकाशरूपं ब्रह्म स्वीयां शक्तिमवलोकयितुं तदभिमुखीभूय तदन्तस्तेजोरूपेण प्रविश्य शुक्लबिन्दुभावमयते । ततस्तं बिन्दुं रक्तरूपा शक्तिः प्रविशति । तेन संमिश्रबिन्दुरुच्छूनो भवति । तत्र च हार्दकलारूपोऽप्येकः पदार्थविशेषो भवति । स च बिन्दुः समष्टिरूपेणैकः स्फुटशिवशक्ति-सामरस्यनामा कामो रविरग्नीषोमात्मक इत्यादिशब्दैर्व्यवह्रियते, व्यष्टिरूपेण द्वयम् । तत्र शुक्ल इन्दू रक्तोऽग्निरिति बिन्दुद्वयात्मकत्वाद्विसर्ग इति च व्यवह्रियते । अत एव च रवे रात्रावग्नावमावास्यायां चन्द्रे च प्रवेशस्य श्रुत्यादिसिद्धत्वात् समष्टिबिन्दो रवित्वम् । एवं च कामाख्यो बिन्दुर्विसर्गो हार्दकला चेति त्र्यवयवक एकः पदार्थोऽणादिप्रत्याहारवत् काम-कलेत्युच्यते । इदमेव च समस्तसृष्टिबीजम् । अत एवाकारहकारयोर्मध्ये सर्ववर्णपाठः । ळकारस्य लकारादभिन्नत्वात् क्षकारस्य कषयोगरूपत्वान्न तद्बहिर्भावः शङ्क्यः । एतन्मूल-भूतं ब्रह्म तु तुरीयबिन्दुरित्युच्यते । तद्रूपाभ्यां शून्यस्वरूपाभ्यामकारहकाराभ्यामुत्पन्ना कामकला व्यक्ताव्यक्तविलक्षणाऽहंपदवाच्या । अकारहकारोभयात्मकत्वं शिवशक्तिद्वय-रूपत्वं चाहंपदस्य निष्कृष्टोऽर्थः । अत एव तज्जन्यानां सूक्ष्मादिस्थूलान्तानामखिलसृष्टीना-महंपदवाच्यत्वम्" (पृ० ५०-५१) इति । सौभाग्यसुधोदयेऽपि प्रथमे प्रपञ्चे वाङ्मयी (१।४-२७), अर्थमयी च (१।२८-४९) सृष्टिः प्रतिपादिता ।

In Public domain. Digitization Muthulakshmi Research Academy

हीता कामकला नात्र प्रश्नस्य समाधानस्य वा विषयः, किन्तु "विन्दुं संकल्प्य वक्त्रं तु"
८५) इत्यादिना नित्याषोडशिकार्णवादौ निगूढं प्रतिपादिता कामकलैवेति तु गुरवः। सेयं
कला नित्याषोडशिकार्णवादौ द्वादशश्लोक्यां "तामीकाराक्षरोद्धारं···" (१।८) इत्यादिना
। अस्याः कामकलायाः "त्रिकोणमेकादशमं वह्निगेहं च योनिकम्। शृङ्गाटं चैव
नामभिः परिकीर्तितम् ॥" (त० वि० ३।९४; पृ० १०३) इत्यादिनामभिः परिचीय-
काराक्षरमाधारभूतम्। तदेतदुक्तम्—"यदेकादशमाधारं···" (१।६) इति। बौद्धैरपि—
राकृति यद्दिव्यं मध्ये षट्कारभूषितम्। आलयं सर्वसौख्यानां वोधरत्नकरण्डकम् ॥"
वि० ३।९४; पृ० १०४) इत्यत्रैष विषयः स्मृत इव प्रतीयते। तदेवं परापश्यन्तीमध्यमा-
रूपस्य वैन्दवस्य मध्यत्र्यश्रस्य च समष्टिभूतं रूपं कामकला, सैव च वागर्थसृष्टिहेतुरिति
भवति।

तिचक्रम्

ततो नवयोनिचक्रं प्रवर्तते। अत्र च धर्माधर्मौ, आत्मा, अन्तरात्मा, परमात्मा,
ा चेति चत्वार आत्मानः; मातृमेयौ, प्रमा चेति पदार्थनवकमाविर्भवति। तदुक्तं
हृदये—

धर्माधर्मौ तथात्मानो मातृमेयौ तथा प्रमा ॥
नवयोन्यात्मकं चक्रं चिदानन्दघनं महत्।
चक्रं नवात्मकमिदं नवधा भिन्नमन्त्रकम् ॥
वैन्दवासनसंरूढं संवर्तानलचित्कलम्।
अम्बिकारूपमेवेदमष्टारस्थं स्वरावृतम् ॥ (१।१२-१४)

अनेन तृतीयं चक्रमिदमम्बिकामयम्, अष्टारचक्रमित्यस्यैवापरमभिधानम्, अत्र षोडश-
मवस्थितिर्भवतीति च स्पष्टीभवति। अग्रिमग्रन्थानुगुण्यायात्र विन्दुत्रिकोणवसुकोणात्मकं
म्बिकामयमिति व्याख्येयम्। सौभाग्यसुधोदये तु—"वामादीच्छाद्यष्टप्रतिबिम्बैरष्ट-
त्मम्" (३।५) इत्यत्र वामाज्येष्ठारौद्र्यम्बिकेच्छाज्ञानाक्रियाशान्ताशक्तिप्रतिबिम्बभूतमष्ट-
युक्तम्। सुभगोदयवासनायां चैतद्देव्याः सूक्ष्मं पुर्यष्टकमभ्यधायि (१७ श्लो०)। काम-
ासे (२९ श्लो०) शषसपवर्गमयमेतच्चक्रम्।

रम्

नवत्रिकोणानां वैन्दवस्य च परितः प्रतीयमानाः प्रभा दश, तद्रूपमेव प्रथमदशारम्।
दशारमपि तद्रूपमेवेति पुण्यानन्दामृतानन्दौ। प्रथमदशारे बुद्धीन्द्रियाणां कर्मेन्द्रियाणां
व इति शिवानन्दः (पृ०२९८), भूतानां तन्मात्राणां चेत्यमृतानन्दः। चतुर्दशारप्रस्तारेऽग्रेऽ-
चतुष्टयेन सह बुद्धिकर्मेन्द्रियाणामाविर्भावदर्शनादत्रामृतानन्दव्याख्यानमेवोचितम्।
परं सेतुबन्धव्याख्यानं नात्र समञ्जसम्, प्रथमदशारेण तत्र कस्यापि पदार्थस्य स्फुरणाऽ-
। द्वितीयदशारे बुद्धिकर्माक्षगोचराणां शब्दादीनां वचनादीनां च स्फुरणम्। योगिनी-

हृदयदीपिकानुसारमत्र प्रथमदशारे यरलवशषसहळक्षवर्णानामवस्थितिः। अस्मिन् व्याख्यानेऽष्टा-
रादिचतुर्दशकोणान्तेषु चक्रेषु स्थापितेषु वर्णेषु मकारस्यावस्थितिः क्वापि न दृश्यते। अतोऽत्र
सेतुबन्धव्याख्यानमेव युक्तिमत्। कामकलाविलासे त्वत्र तवर्गटवर्गयोरवस्थितिः प्रदर्शिता।
द्वितीयदशारे च ककारादयो दश वर्णा अवतिष्ठन्ते।

चतुर्दशारनिष्पत्तिप्रकारः

विन्दुत्रिकोणाष्टकोणप्रथमदशारात्मकस्य चक्रचतुष्टयस्य प्रभया समेतं द्वितीयदशारमेव
चतुर्दशाररूपेण परिणमते। इतो बुद्धीन्द्रियाणि कर्मेन्द्रियाणि मनोबुद्ध्यहङ्कारचित्तात्मकं
चान्तःकरणचतुष्टयं प्रवर्तते। अत्र टकारादिभकारान्ताश्चतुर्दशवर्णा अवतिष्ठन्ते। काम-
कलाविलासे तु (श्लो० ३१) अकारादिचतुर्दशवर्णात्मकमेतत्। दशारद्वयचतुर्दशारात्मक-
मेतच्चक्रत्रयं रौद्रीप्रभामयम्। दीपिकायां तु विन्दुत्रिकोणात्मकं चक्रद्वयमम्बिकामयम्, अष्ट-
कोणादिचतुर्दशकोणान्तं चक्रचतुष्टयं च रौद्रीरूपमिति व्याख्यातम्।

श्रीचक्रे भूतलिपिविन्यासः

अत्राष्टकोणादिचतुर्दशकोणान्तेषु चक्रेषु वर्णविन्यासे योगिनीहृदये कामकलाविलासे च
प्रकारद्वयमवलोक्यते। योगिनीहृदयेऽष्टकोणे षोडश स्वराः, प्रथमदशारे मकारादिक्षकारान्ता
दश वर्णाः, द्वितीयदशारे ककारादयो दश, चतुर्दशारे च टादिभान्ताश्चतुर्दश वर्णाः सन्नि-
वेशिताः। एवं चात्र पञ्चाशदेव वर्णा योगिनीहृदयसंमताः। कामकलाविलासकारेण त्वष्ट-
कोणं शषसपवर्गमयम्, प्रथमदशारं तवर्गटवर्गमयम्, द्वितीयदशारं चवर्गकवर्गमयम्, चतुर्दशारं
च चतुर्दशवर्णमयमुपवर्णितम्। आहत्यात्र द्वाचत्वारिंशद्वर्णानि भवन्ति। एष च क्रमः शारदा-
तिलकप्रतिपादितं (७।१-५) द्वाचत्वारिंशदक्षरमयं नववर्गात्मकं च भूतलिपिक्रममनुसरति।
सोऽयं क्रमः सौभाग्यसुधोदये—

द्व्युत्तरचत्वारिंशद्योनिगणो मध्ययोनिपर्यन्तः।
नादमयैर्नववर्गैर्मध्यमया तावदक्षरैर्व्याप्तः ॥ (३।७)

इत्यत्र मध्यमावाग्रूपोऽभिमतः, वैखरीप्रपञ्चस्याग्रे वक्ष्यमाणत्वात्। स्थूला मध्यमा भूतलिप्याख्येति
कामकलाविलासोक्तो विषयो मातृकाप्रकरणे पूर्वमेवोक्तः।

पञ्चशक्तिचतुर्वह्न्यात्मकं श्रीचक्रम्

पञ्चशक्तिचतुर्वह्निसंयोगाच्चक्रसम्भवः प्रतिपाद्यते। स्वाभिमुखाग्रत्रिकोणपरम्परायाः
शक्तिसंज्ञात्वम्, विपरीताया वह्निसंज्ञात्वमिति समयः। एवं च नवत्रिकोणात्मकं त्रैपुरं चक्रं
चतुर्दशकोणान्तं प्रसरति। एतद्बाह्यगतमष्टपत्रम्, षोडशारम्, चतुर्द्वारोपशोभितं वृत्तत्रयात्मकं
भूपुरं च श्रीचक्रस्य वहिरङ्गत्वेनाभिमन्यते नित्याषोडशिकार्णवयोगिनीहृदयादिषु। अत एव
नित्याषोडशिकार्णवस्य मातृकासु, वामकेश्वरीमतविवरणे, अर्थरत्नावल्यां च "एतद्बाह्यगतम्"
इत्यादिकोऽध्यर्धः श्लोकः श्रीचक्रस्य वहिरङ्गप्रतिपादनपर इति कृत्वा पञ्चशक्तिचतुर्वह्न्यात्मक-
नवत्रिकोणरूपान्तरङ्गस्वरूपविवेचकतन्महिमप्रतिपादकश्लोकानामन्ते स्थापितः। एतमेव

In Public domain. Digitization Muthulakshmi Research Academy

नीहृदयेऽपि चक्रप्रसरोऽत्रैव परिसमाप्यते । शिष्टस्य बहिरङ्गभूतस्य श्रीचक्रावयवस्य तत्र रान्तरेणैव व्याख्यानं दृश्यते । तच्चाग्रे वक्ष्यते ।

क्रस्य वाक्चतुष्टयात्मकत्वम्

योगिनीहृदये बैन्दवं चक्रं परावाग्रूपम्, मध्यत्र्यश्रं च पश्यन्तीमध्यमावैखरीरूपमुक्तम् । ादिचतुर्दशारान्तं च वैखरीवर्णानामवस्थितिर्दर्शिता । कामकलाविलासे तु—

परया पश्यन्त्यापि च मध्यमया स्थूलवर्णरूपिण्या ।
एताभिरेकपञ्चाशदक्षरा वैखरी जाता ॥ (श्लो० ३२)

 स्पष्टीभवति, यदत्र बैन्दवं चक्रं परावाग्रूपम्, मध्यत्र्यश्रं पश्यन्तीरूपम्; दिचतुर्दशारान्तं चक्रचतुष्टयं च मध्यमावाग्रूपमभिमतमिति । एताभिरेकपञ्चाशदक्षरा जायते ।

तत्राष्टदलाब्जं कादिभिरष्टभिर्वैखरीवर्गैरुपचितम्, षोडशदलाब्जं च स्वरगणसमुदितम् । लमिश्रात्मकं विन्दुत्रयं सोमसूर्याग्निरूपम् । बिन्दुत्रयमयतेजस्त्रितयमेव भूपुरात्मकान्तिम-ग परिणमते । एवं पश्यन्तीमध्यमावैखरीशक्तय एतावत्पर्यन्तं विजृम्भमाणा त्रिकोणादि-र्यन्तं श्रीचक्रात्मना विराजन्ते । सौभाग्यसुधोदयेऽपि श्लोकद्वयेनैष एवार्थं उक्तः ३) । सुभगोदयवासनायां चतुर्षु श्लोकेषु (१०-१३) स्थूलं शरीरमेव श्रीचक्रात्मना ला वृत्तत्रितयं सोमसूर्यकृशान्वात्मकं नेत्रत्रयम्, षोडशदलं भूताक्षमानसात्मकम्, चाव्यक्ताद्यष्टप्रकृतिरूपमुपवर्णितम् । "ज्येष्ठारूपचतुष्कोणं वामारूपभ्रमित्रयम्" (१।१९) योगिनीहृदये भ्रमित्रयशब्देन तदन्तरालस्थितमष्टदलषोडशदलपद्मद्वयमप्यभिमतं राणाम् । एवं च चक्रत्रयमेतद्वामारूपम्, चतुरस्रं च ज्येष्ठारूपमित्यम्बिकारौद्रीवामा-रूपत्वं श्रीचक्रस्य सिद्ध्यति ।

स्य वासनान्तरम्

योगिनीहृदयेऽत्रैव (१।१९-२१) श्रीचक्रस्य संक्षिप्तं वासनान्तरमुपदिष्टम् । तदनुसारं चक्रं त्रिकोणं च चिद्रूपम्, अष्टकोणं शान्त्यतीतारूपम्, दशारद्वयं चतुर्दशारं च रूपम्, अष्टदलं विद्यारूपम्, षोडशदलं प्रतिष्ठामयम्, चतुष्कोणं च निवृत्त्याकारम् । ान्त्यतीताशान्तिविद्याप्रतिष्ठानिवृत्तयो गगनादिभूतपञ्चकस्थाः कला अभिमताष्टीका-म् । सिद्धान्तागमेषु तु षडध्वप्रकरणे षट्त्रिंशत्तत्त्वेषु पञ्चकलानां व्याप्तिः प्रदर्श्यते । रि व्याख्यानमेवात्र प्रकरणानुगतं प्रतिभाति नः ।

स्य संहारक्रमः

इयता प्रघट्टकेन सृष्टिक्रमेण नवचक्रात्मकश्रीचक्रनिष्पत्तिरुक्ता । पूजनं चास्य चक्रस्य मेणैव क्रियते । अतोऽधुना संहारक्रमः प्रपञ्च्यते । यतो हि—नवयोन्यादिपृथिव्यन्तं ः, पृथिव्यादिनवयोन्यन्तं संहृतिक्रमः, एतत्समष्टिरूपमेव त्रिपुराचक्रमुच्यते । अस्य च

त्रिधा नवधा च भावनं क्रियते । तत्र त्रिधा भावनं सृष्टिक्रमेण, नवधा भावनं च संहारक्रमेण । एकस्य वह्नेर्द्वयोः शक्त्योश्च संयोगे सति बैन्दवत्रिकोणाष्टकोणैर्नवयोनिचक्रं भवतीत्येकः प्रकारः, वह्नित्रये शक्तित्रये च कृते सति दशारचक्रद्वयं चतुर्दशारचक्रं च निष्पद्यत इति द्वितीयः प्रकारः, अष्टदलकमलेन षोडशदलकमलेन चोपेतं चतुरस्रत्रयात्मकं तृतीयं चक्रमिति तृतीयः प्रकारः । एवं सृष्टिक्रमेण चक्रस्य त्रिप्रकारत्वमुक्तं भवति । अथ संहारक्रमेण तस्य नवधा भावनम् । तत्र भूत्रयेण प्रथमम्, षोडशारकं द्वितीयम्, अष्टदलं तृतीयम्, मनुकोणं चतुर्थम्, दशकोणं पञ्चमम्, दशारकं षष्ठम्, वसुकोणं सप्तमम्, मध्यत्र्यश्रमष्टमम्, त्र्यश्रमध्यं नवममिति । त्रैलोक्यमोहनं सर्वाशापरिपूरकं सर्वसंक्षोभणं सर्वसौभाग्यदायकं सर्वार्थसाधकं सर्वरक्षाकरं सर्वरोगहरं सर्वसिद्धिकरं सर्वानन्दमयं चेति क्रमेण तेषां नामानि ज्ञेयानि । परिपूर्णेऽस्मिन् महाचक्रे महादेवी महात्रिपुरसुन्दरी परिपूज्यते ।

श्रीचक्रनिवासिन्यः शक्तयः

त्रैलोक्यमोहनाद्येषु नवचक्रेषु क्रमेण नादो बिन्दुः कला ज्येष्ठा रौद्री वामा विषघ्नी दूतरी सर्वानन्दा चेति नवशक्तयोऽवतिष्ठन्ते । सृष्टिक्रमे त्रिकोणादिचतुरस्रान्तानां चक्राणां प्रकाशांशाम्बिकारौद्रीज्येष्ठावामारूपत्वमुक्तम् । अत्र संहारक्रमे चतुरस्रादिबैन्दवान्तानां तेषां विमर्शांशशान्ता-इच्छा-ज्ञाना-क्रियारूपत्वं प्रतिपाद्यते । तत्र नादबिन्दुरूपचतुरस्रषोडशदलात्मकं चक्रद्वयं शान्ताशक्तिमयम्, कलारूपमष्टदलपद्ममिच्छाशक्तिमयम्, ज्येष्ठारूपं चतुर्दशारं ज्ञानाशक्तिमयम्, रौद्रीवामाविषघ्नीदूतरीसर्वानन्दाख्यशक्तिपञ्चकमयं च द्विदशाराष्टकोण-त्रिकोणबैन्दवाख्यचक्रपञ्चकं क्रियाशक्तिमयम् । एवं सृष्टिक्रमे संहारक्रमे च चतुष्कलामयस्य श्रीचक्रस्य कामकलारूपत्वमायाति । पूर्वं बिन्दुगर्भितस्य मध्यत्र्यश्रस्य कामकलारूपत्वमुप-पादितम् । तेन प्रसृतस्य सृष्ट्यात्मकस्य संहारात्मकस्य च परिपूर्णस्य चक्रस्यापि चतुष्कल-मयत्वात् कामकलारूपत्वमेवेति भावः ।

द्विविधः क्रमोदयः

"स्फुरत्तामात्मनः पश्येत्तदा चक्रस्य संभवः" (यो० १।१०) इति प्रतिपादितम् । नैतावदेव । आवरणचक्रान्तर्गतशक्तिनिकरस्तन्निकटस्थितश्रीगुरुमण्डलमपि च श्रीदेव्यवयव-स्फूर्जितमेवेत्याह कामकलाविलासकारः—

क्रमणं पदविक्षेपः क्रमोदयस्तेन कथ्यते द्वेधा ।
आवरणं गुरुपङ्क्तिर्द्वयमिदमम्बापदाम्बुजप्रसरः ॥ (श्लो० ३५) इति ।

अत्र क्रमणं पदक्रमः । स च द्विविधः—पदविक्षेपरूपः, क्रमोदयरूपश्च । तत्र पदविक्षेपो नाम सुन्दर्या अनन्तकोटिकिरणात्मकानन्तशक्तिजननसामर्थ्यम् । क्रमोदयो नाम दिव्यसिद्धमान-वौघरूपानन्तप्रकाशात्मकश्रीगुरुमण्डलात्मकतया प्रसरणम् । अत्र पदविक्षेपः पूर्वं प्रतिपाद्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

१. श्रीचक्रस्था आवरणदेवताः

कामकलाविलासे—

सेयं परा महेशी चक्राकारेण परिणमेत यथा ।
तद्देहावयवानां परिणतिरावरणदेवताः सर्वाः ॥ (श्लो० ३६)

इत्यादिना सन्दर्भेण सृष्टिक्रमेणावरणदेवताः प्रदर्शिताः, नित्याषोडशिकार्णवसुभगोदयवासनादिषु तु संहारक्रमेण । पूजोपयोगितया संहारक्रमेणैव ता अत्र प्रदर्श्यन्ते । तत्र त्रैलोक्यमोहनाभिधेये चतुरस्रेऽणिमादयो दश ब्रह्माण्याद्यष्टौ च प्रकटाह्वा योगिन्यः पूज्यन्ते। सर्वाशापरिपूरकाभिधेये षोडशारे गुप्ताह्वाः कामाकर्षिण्याद्याः षोडशदेव्यो भूतेन्द्रियमनोमयविकारषोडशकरूपा योगिन्यः पूज्यन्ते । सर्वसंक्षोभणाभिधमष्टारं गुप्ततरयोगिनीसंज्ञा अनङ्गकुसुमाद्या अव्यक्तमहदहङ्कृतितन्मात्राकारा अष्टौ देव्योऽध्यासते । सर्वसौभाग्याभिधेये चतुर्दशारे सम्प्रदाययोगिन्यः सर्वसंक्षोभिणीप्रभृतयश्चतुर्दशकरणरूपाश्चिन्तनीयाः । सर्वार्थसाधकाभिधेये द्वितीयदशारे कुलोत्तीर्णाह्वा देवीधीकर्मेन्द्रियविषयमयाः सर्वसिद्धिप्रदाद्या दश योगिन्यः पूज्याः । सर्वरक्षाकराभिधेयं प्रथमदशारं निगर्भाख्या भूततन्मात्रात्मकाः सर्वज्ञाद्या दश देव्योऽधितिष्ठन्ति। सर्वरोगहराभिधेयेऽष्टारे रहस्याख्याः पुर्यष्टकरूपा वशिन्याद्या अष्टौ योगिन्योऽवतिष्ठन्ते । सर्वसिद्धिप्रदाभिधेये त्रिकोणे परापररहस्यकाः कामेश्वरीवज्रेशीभगमालिन्यः पूज्याः । सर्वानन्दाभिधेये बैन्दवे चक्रेऽतिरहस्याख्या महात्रिपुरसुन्दरी पूज्यते । अत्र महायोनिसर्वानन्दमयस्थानगतमहादेवतायाः षडङ्गावरणाद्बाह्यदेशे पश्चिमोत्तरपौरस्त्यदक्षिणाशाचतुष्टये जम्भमोहवशस्तम्भपदचतुष्टयोपेतं बाणधनुःपाशाङ्कुशाख्यमायुधचतुष्टयं पूजनीयम् । एतदपि परापररहस्याख्ययोगिनीमयमिति सुभगोदयवासना (श्लो० ५४)। अणिमाद्यावरणदेवतानामप्रपञ्चो नित्याषोडशिकार्णवसुभगोदयादिषु द्रष्टव्यः । प्रकटाह्वाप्रभृतय एता देव्यश्चक्रेश्वरीपदेनोक्ताः सुभगोदयवासनायाम् (श्लो० ४७) । सोऽयं विषयो योगिनीहृदयेऽपि पूजापटले (श्लो० ९३, ११६-१६८) विस्तरेण प्रदर्शितः । एतावान् विशेषः—श्रीचक्रद्वारशाखयोर्गणेशदूतरीक्षेत्रेशवटुकपूजनमादिष्टमत्रेति (३।११२) । एता देवताः संकेतपद्धत्यामेवं स्तुताः—

द्वैताद्वैतमहामोहशर्वरीक्षपणक्षमः ।
भास्वानिव जयत्येको गणेशो दूतरीयुतः ॥
प्रतिभायाः परोल्लासो निशाकर इवापरः ।
दूतीयुक्तः स जयति वटुकस्ताण्डवान्वितः ॥ (पृ० २६८) ।

नित्याषोडशिकार्णवे षोडशनित्यानामोपदेशो विद्यते । तासु कामेश्वरीभगमालिन्योरेवावरणान्तःपातित्वम् । शिष्टानां पूजनादिकं तत्र नोपदिष्टम् । योगिनीहृदये तु (३।१६९) शिष्टा नित्यास्त्रिकोणे चतुरस्रान्तराले वा पूज्या इत्युक्तम् । नवचक्रेश्वर्यो योगिनीहृदये (२।९-१२) त्रिपुरा - त्रिपुरेश्वरी-त्रिपुरसुन्दरी - त्रिपुरवासिनी - त्रिपुराश्री - त्रिपुरमालिनी-त्रिपुरासिद्धा-त्रिपुराम्बिका-महात्रिपुरसुन्दरीनामभिरुपदिष्टाः । नित्याषोडशिकार्णवे करशुद्धिकरीप्रभृतयोऽष्टौ विद्या उद्धृताः । तासां नामानि चार्थरत्नावल्यां संकेतपद्धतिप्रमाणेनैवं प्रदर्शितानि—

त्रिपुरा त्रिपुरेशी च सुन्दरी पुरवासिनी ।
श्रीर्मालिनी च सिद्धाम्बा त्वष्टमी त्रिपुराम्बिका ॥ (पृ० १०७)

सुभगोदये तु 'महात्रिपुरसुन्दरी' इति चतुर्थचरणपाठः (पृ० २९०) । तथा चात्र योगिनीहृदयाभिहिता (२।९-१२) नव चक्रेश्वर्यः स्वीक्रियन्ते । नित्याषोडशिकार्णवे योगिनीहृदयोद्धृता (२।४) सप्तमी मूर्तिविद्या न दृश्यते, अतोऽर्थरत्नावल्यामष्टौ देव्यो व्याख्याताः । अत्रैवं प्रतीमः—नवचक्रेश्वरीणां त्रिपुराप्रभृतीनां करशुद्ध्यादिविद्याभिः साकं संबन्धः पराक्कालिक इति । करशुद्ध्यादिविद्या आवाहनादिषु कर्मसु विनियुक्ता इति न तेषां कश्चन चक्रेश्वरीभिः संबन्धः प्रतीयते ।

२. गुरुपङ्क्तिस्तत्समाराधनस्थानं च

अथ क्रमोदयो वर्ण्यते । दिव्यसिद्धमानवौघत्रयवती गुरुमण्डलाभिधा गुरुपङ्क्तिरावरणपूजायामन्तस्त्रिकोणे पूज्येति योगिनीहृदये (३।११३) दृश्यते । ऋजुविमर्शिन्यामपि (पृ० २२५)—"प्राङ्मध्ययोन्योः पुनरन्तराले संपूजयेत् प्राग् गुरुपादपङ्क्तिम्" (९।१४) इति प्रपञ्चसारप्रामाण्येन तदेव गुरुपङ्क्तिसमाराधनस्थानं निर्णीतम् । चिदानन्दघनपरमार्थः प्रकाशविमर्शात्मा परमकारुणिकः परमेश्वरः स्वयमेव स्वात्मानं कामकलाबिन्दुरूपकामेश्वरकामेश्वरीरूपदिव्यमिथुनप्रमुखदिव्यसिद्धमानवौघादिक्रमावतीर्णो गुरुमण्डलात्मा सन् कतिचन भक्तिभाजः संरक्षति । गुरुमण्डलमेतन्नित्याषोडशिकार्णवे (४।१९) पारम्पर्यपदेन सूचितम् । व्याख्यातं च तद्विस्तरेण तत्रैव शिवानन्दविद्यानन्दाभ्याम् । पारम्पर्यं हि दिव्यसिद्धमानवभेदेन त्रिप्रकारम् । "इह विद्यायां सन्तानद्वयमस्ति—कामराजसन्तानो[1] लोपामुद्रासन्तान इति । विद्यायाः सकीलनिष्कीलभेदेन सन्तानद्वयायतिः । तयोः कामराजसन्तानः सकीलविद्यानुबन्धी विच्छिन्नश्च । विच्छेदो नाम पारम्पर्यवियोगः । इतरो निष्कीलविद्यानुबन्धी[2] लोपामुद्राऽगस्त्यादिपरिगृहीतत्वादविच्छिन्नश्च" (पृ० २१८) इति शिवानन्दः । "इह श्रीविद्यारत्नावगमे साधनद्वयमस्ति—कामराजसन्तानं लोपामुद्रासन्तानं चेति । कामराजसन्तानक्रमस्तु सकलविद्यानुसन्ध्यविच्छिन्न इति प्राचीनगुरवोऽप्याचक्षते । लोपामुद्रासन्तानक्रमस्तु विच्छिन्नतया प्रवर्तत इति वर्णयन्ति" (पृ० ७१) इति चिद्वल्लीकारो नटनानन्दः । "इह पुण्यानन्दा हादिविद्यायामत्यन्ताभिमानिनः" (पृ० ३६) इति चिद्वल्लीवचनेनैव ज्ञायते कामकलाविलासो

---

१. कामराजसन्तानः कादिः, लोपामुद्रासन्तानो हादिः । तत्र—"हादेः कामेश्वरप्रधानत्वात् कादेश्च कामेश्वरीप्रधानत्वात्" इत्यरुणामोदिनीकारः सौन्दर्यलहरीव्याख्याता (पृ० १६५) ।

२. "निष्कीलीकरणमन्त्रस्य हादिविद्याधिकारे पाठेऽपि गुणोपसंहरन्यायेन सर्वाङ्गतानपायात" (पृ० ६३-६४) इति सेतुबन्धोक्तिरत्रैव स्वरसतः प्रवर्तते ।

In Public domain. Digitization Muthulakshmi Research Academy

हादिविद्याग्रन्थ इति । चिद्वल्लीकारस्तु कादिविद्याभिमानी प्रतीयते, तेन हादिविद्याक्रमस्य विच्छिन्नत्वोपपादनात् ! शिवानन्दादिभिस्तु कादिविद्याक्रम एव विच्छिन्नतयोपपाद्यते । प्रपञ्चसारे शारदातिलके च हादिविद्यैवोद्धृता । सौन्दर्यलहर्यामपि कादिविद्यातः पूर्वं हादिविद्योद्धारः । अतो हादिविद्यैव प्राचीनेति वयमवोचाम । अथापि नित्याषोडशिकार्णवे[1] कादिविद्योद्धृता । दृश्यते च शाङ्करमठपरम्परासु प्राधान्येन कादिविद्योपासना । अतो हादिकादिविद्ययोः प्राचीनार्वाचीनत्वविशयः साम्प्रतं निर्णेतुमशक्यः । दिव्यौघसिद्धौघमानवौघक्रमो हादिविद्यानुसारी प्रतिपादित ऋजुविमर्शिन्यामर्थरत्नावल्यां ज्ञानदीपविमर्शिन्यां सौभाग्यसुधोदये । स च प्रदर्शितोऽस्माभिरन्यत्र[2] । कादिविद्यायां त्वेष क्रमोऽन्वेषणीयः । "यथा दीपकसन्ताने श्रीमती लोपामुद्राऽगस्त्यपत्नी प्रधानभूता, विनष्टसन्तानं पुनरुत्थाप्य प्रवर्तयतीति कृत्वा प्रधानभूता तत्र; तथात्रापि क्लीमानन्दसंज्ञः कामदेवो रतिभर्ता विनष्टसन्तानं पुनः पुनः प्रवर्तयतीति तन्नामाङ्कितमिदं सन्तानम्" (पृ०२२४-२२५) इत्यर्थरत्नावलीकारः[3] । इतः प्राग्भवा व्यवस्थिता सिद्धौघमानवौघपरम्पराऽन्वेषणीया कादिविद्यायाः ।

---

१. नित्याषोडशिकार्णवे कादिविद्या योगिनीहृदये च हादिविद्योद्धृतेति मूलग्रन्थस्वारस्यात् प्रतीयते । टीकाकाराणामत्र वर्तते मतवैभिन्न्यम् । शिवानन्देन नित्याषोडशिकार्णवो हादिविद्यापरत्वेन व्याख्यायते, विद्यानन्देन पूर्वं कादिविद्यापरत्वेन व्याख्याय ग्रन्थं तदनु हादिविद्योद्धृता । भास्कररायेण कादिविद्यैव व्याख्यायते । स योगिनीहृदयमपि कादिविद्यापरत्वेनैव व्याख्याति । अमृतानन्दस्तु तत्र हादिविद्यामुद्धरति । नित्याषोडशिकार्णवे "मादनं तदधः शक्तिः" (१।१११) इत्यत्र मादनशक्तिपदयोर्यथा ककारैकारयोरेव स्वारस्यम्, तथैव योगिनीहृदये सम्पूर्णस्य सम्प्रदायार्थप्रकरणस्य (२।२६-४८) हादिविद्यायामेव स्वारस्यम् । विद्यास्थैश्चन्द्रबीजैस्तु" (२।४१) इत्यत्र बहुवचनोपात्तस्य सकारत्रयस्य हादिविद्यायामेवोपलब्धेः । "बहुवचनाभ्यामपि द्वित्वसंख्यैव कथ्यते" (पृ० १३८) इति भास्कररायवाचोयुक्तिः, मादनशक्तिपदाभ्यां हकारसकारावत्र ग्राह्याविति शिवानन्द(ऋजु० पृ० १०९)व्याख्यानं च सममेव तयोः स्वस्वसम्प्रदायानुगमनमात्रप्रख्यापकम् ।

२. द्रष्टव्यम्—"त्रिपुरादर्शनस्यापरिचिता आचार्याः कृतयश्च" सारस्वती सुषमा, व० २० अ० २ पृ० २२ ।

३. "एतेन हादिविद्यायामेवास्मिंस्तन्त्रे विषयतां वर्णयन्तो निरस्ताः ।……षष्ठश्लोके तैरेव विद्यान्तर्गतवर्णस्यैषा स्तुतिरित्युक्तेश्च" (पृ० १७) इति भास्कररायोक्तिर्न क्षोदक्षमा । यतो हि शिवानन्देनैव तन्त्रस्यास्य हादिविद्याविषयता प्रतिपाद्यते, न विद्यानन्देन । विद्यान्तर्गतवर्णस्यैषा स्तुतिरित्युक्तिश्च विद्यानन्दस्य, न शिवानन्दस्येति ।

दिव्यौघावतारक्रमः

अथात्र दिव्यौघावतारक्रमः[1] प्रदर्श्यते । मध्यत्र्यश्रमध्यस्थानगतोड्याणपीठस्थितसमस्तविद्याभिधेयमहात्रिपुरसुन्दरीदेवीविमृष्टरूपो महाप्रकाशरूपः परमानन्दलक्षणः परमशिव एव प्रथमो गुरुः । अस्य गुरोः श्रीचर्यानाथ इति संज्ञा । स च कामेश्वरः स्वाभिन्नायै विमर्शाख्यायै स्वशक्त्यै कामेश्वर्यै कृतादौ प्रथममुपदिदेश । मध्यत्र्यश्राग्रकोणगतकामरूपपीठस्थितवाग्भवबीजाभिधेयकामेश्वरीदेवीविमृष्टरूपश्रीमदोड्डुनाथदेवस्त्रेतागुरुः । मध्यत्र्यश्रदक्षिणकोणगतजालन्धरपीठस्थितकामराजबीजाभिधेयवज्रेश्वरीदेवीविमृष्टरूपश्रीषष्ठनाथदेवो द्वापरगुरुः । मध्यत्र्यश्रोत्तरकोणगतपूर्णगिरिपीठस्थितशक्तिबीजाभिधेयभगमालिनीदेवीविमृष्टरूपश्रीमित्रेशनाथदेवः कलिगुरुः । अर्थरत्नावल्यां त्रेताद्वापरकलिगुरव इमे ज्येष्ठमध्यमबालाख्या मन्त्रविद्यामुद्रागुरव उक्ताः (पृ०२२०) । दिव्यौघपरम्परायां पञ्चमो गुरुरर्थरत्नावल्यां क्रोधमुनिभट्टारकः । एवं पञ्चैवात्र दिव्यौघगुरवः प्रदर्शिताः । ते च समानाः कादिविद्यायां हादिविद्यायां च । ऋजुविमर्शिनीकारेण तु पञ्चमो दिव्यौघगुरुर्न व्याख्यातः । लोपामुद्रागस्त्ययोरत्र दिव्यौघे परिगणनम् । नामानि चात्र षडेव दृश्यन्ते । एवमेव चिद्वल्ल्यामपि (७१-७२) । उपक्रमे च सप्त दिव्यौघगुरव इत्युक्तम् । कादिविद्यागुरुत्वेन सुप्रथितः क्रोधमुनिभट्टारकोऽत्र शिवानन्देन सावहितं परित्यक्त इव प्रतीयते ।

आन्तरं पीठचतुष्टयम्

अत्र कामरूप-पूर्णगिरि-जालन्धर-ओड्याणाख्याश्चत्वारः पीठाः सन्ति प्रदर्शिताः । अम्बिकाद्याः शान्ताद्याश्च चतस्रः शक्तयः क्रमेण परस्परं सामरस्यमापन्नाः पीठचतुष्टयरूपेण परिणमन्त इत्याद्युक्तं योगिनीहृदये । तद्यथा—

भासनाद्विश्वरूपस्य स्वरूपे बाह्यतोऽपि च ।
एताश्चतस्रः शक्त्यस्तु का पू जा ओ इति क्रमात् ॥
पीठाः कन्दे[2] पदे रूपे रूपातीते क्रमात् स्थिताः ।
चतुरस्रं तथा बिन्दुषट्कयुक्तं च वृत्तकम् ॥
अर्धचन्द्रं त्रिकोणं च रूपाण्येषां क्रमेण तु ।
पीतो धूम्रस्तथा श्वेतो रक्तो रूपं च कीर्तितम् ॥ (१।४१-४३) इति ।

पीठचतुष्टयवर्तीनि स्वयम्भ्वादीनि लिङ्गानि

एतेषु मनोबुद्ध्यहङ्कारचित्तात्मकेषु कामरूपादिपीठेषु तत्तद्वृत्तिचतुष्टयमयानि लिङ्गानि स्वयम्भ्वादीनि वसन्तीत्युक्तं सौभाग्यसुधोदये—

---

१. अयं क्रम ऋजुविमर्शिनीस्थः (पृ० २१८-२२१) । सुभगोदये (पृ० २९५), सौभाग्यसुधोदये (पृ० ३१८-३१९) चात्र विशेषः कश्चनावलोक्यते । तत्रैव द्रष्टव्यः सः ।

२. कन्दशब्दोऽत्र पिण्डशब्दपर्यायः । पिण्ड-पद-रूप-रूपातीतपदार्थो जपप्रकरणे टिप्पण्यां द्रष्टव्यः । योगिनीहृदयेऽन्यत्र—"पिण्डरूपपदग्रन्थिभेदनाद् विघ्नभेदकम्" (३।९४) इत्येवमान्तरलिङ्गरूपेणैते वर्णिताः । अस्यार्थस्तत्रैव दीपिकायां द्रष्टव्यः । अत एव "पिण्डादिपदविश्रान्ति-

In Public domain. Digitization Muthulakshmi Research Academy

पुनरेव कामपीठे तदग्रकोणे स्थिते मनोरूपे ।
प्रतिफलितं तज्ज्योतिः स्वयम्भुलिङ्गं समीहितं सद्भिः ॥
दक्षिणकोणेऽहङ्कृतिरूपे जालन्धरे तु संक्रान्तम् ।
परधाम वाणलिङ्गं जातं संक्रान्त्युपाधिभेदवशात् ॥
मध्यत्रिकोणकोणे वामे श्रीपूर्णपीठमेतस्मिन् ।
बुद्धिमये परतेजः प्रतिफलितं त्वितरलिङ्गतां यातम् ॥
चित्तमये श्रीपीठे ज्योतिर्विन्दौ यदस्य संक्रान्तम् ।
प्रतिफलितं परधाम्नः परलिङ्गं तत्प्रकीर्त्यते प्राज्ञैः ॥

तीहृदयेऽपि—

स्वयम्भुर्वाणलिङ्गं च इतरं च परं पुनः ।
पीठेष्वेतानि लिङ्गानि संस्थितानि वरानने ॥
हेमबन्धूककुसुमशरच्चन्द्रनिभानि तु ।
स्वरावृतं त्रिकूटं च महालिङ्गं स्वयम्भुवम् ॥
कादितान्ताक्षरोपेतं बाणलिङ्गं त्रिकोणकम् ।
कदम्बगोलकाकारं थादिसान्ताक्षरावृतम् ॥
सूक्ष्मरूपं समस्तार्णवृतं परमलिङ्गकम् ।
विन्दुरूपं परानन्दकन्दं नित्यपदोदितम् ॥ (१।४४-४७)

म् । अत्र ऋजुविमर्शिनी(पृ० १७१)-अर्थरत्नावली(पृ० १७१)-सुभगोदय(पृ० २८७)-
ो वर्णानामकथक्रमोऽपि सूचितः ।

स्य धामत्रयात्मकत्वं सृष्ट्याद्यात्मकत्वं च

सुभगोदये (पृ० २९५) कामरूपपीठमग्निचक्रात्मकम्, जालन्धरपीठं सूर्यचक्रात्मकम्, रिः सोमचक्रात्मकम्, ओड्याणपीठं च ब्रह्मचक्रात्मकं वर्णितम् । नित्याषोडशिकार्णवे विमर्शिन्यामर्थरत्नावल्यां च सम्पूर्णं चक्रमेव सोमसूर्याग्निरूपेण सृष्टिस्थितिसंहारादिरूपेण र्शितम् । तद्यथा—

ततः सृष्टिर्महाचक्रं तृतीयं तु हुताशनम् ।
मध्यं स्थितिर्द्वितीयं तु संहारः प्रथमं च यत् ॥ (१।४२)

त्रं पद्मद्वयं च हुताशनाधिष्ठातृकं सृष्टिचक्रम्, चतुर्दशारं दशारद्वयं च सूर्याधिष्ठातृकं तिचक्रम्, अष्टारं मध्यं त्र्यश्रं च सोमाधिष्ठातृकं संहारचक्रमित्यर्थः । ऋजुविमर्शिन्यां

सौन्दर्यगुणसंयुता" (३।१३७) इत्यत्रामृतानन्देन—"पिण्डे मुक्ताः पदे मुक्ता रूपे मुक्ता डानन । रूपातीते च ये मुक्तास्ते मुक्ता नात्र संशयः ॥" (पृ० २८५) इति प्रामाणिक-चनमुपस्थापितम्, विभ्रमभूतेभ्यः पिण्डादिभ्यो मुक्तस्यैव वस्तुतो मुक्तत्वात् ।

त्रैपुरं चक्रमेतदेवमुपवर्णितम्—"त्रिभेदभिन्नं सृष्टिस्थितिसंहारात्मकं सोमसूर्यवह्न्यधिष्ठातृकं शक्तिकामवाग्भवबीजप्रधानं ब्रह्मविष्णुरुद्रमयं जाग्रत्स्वप्नसुषुप्तिरूपं पृथिव्यन्तरिक्षाद्युपलक्षित-मकारोकारमकारविग्रहमृगादिशब्दराश्युज्ज्वलं क्रियाज्ञानेच्छापरपर्यायं सत्त्वरजस्तमःस्वभावं सर्वदेवतासारं विश्वात्मकमिदं त्रैपुरं महाचक्रमिति" (पृ० ६४) इति ।

श्रीचक्रस्य चतूरूपत्वम्

ऋजुविमर्शिन्युद्धृतेषु (पृ० ६५-६६) संकेतपद्धतिवचनेषु तु चक्रस्य चतूरूपत्वमुप-वर्णितम् । तद्यथा—

ब्राह्म्याद्यष्टौ च यद्युक्तमनङ्गकुसुमात्मकम् ।
सृष्टिचक्रं तथा प्रोक्तं स्थितिचक्रं ततः परम् ॥
चतुर्दशारं प्रथमं दशारं पुनरेव तत् ।
स्थितिचक्रं तथा प्रोक्तं संहारमपि संशृणु ॥
वशिन्यष्टौ तदादिस्थं त्र्यश्रं मध्यं क्रमात् पुनः ।
संहारस्त्रिविधः प्रोक्तस्त्वनाख्या सर्वचक्रगा ॥ इति ।

अर्थरत्नावलीधृते संकेतपद्धतिवचने चक्रस्य चतुराम्नायरूपत्वं लक्ष्यते । तद्यथा—

पूर्वाम्नायः सृष्टिरूपः स्थितिरूपस्तु दक्षिणः ।
संहारः पश्चिमो ज्ञेयो ह्यनाख्यस्तूत्तरः स्मृतः ॥ (पृ० ६५) ।

सकलोऽयमर्थः सौभाग्यसुधोदये संक्षेपेण संगृहीतः । तद्यथा—

चतुरश्रषोडशाष्टच्छदात्मकचक्रत्रयं त्रिधा सृष्टिः ।
पूर्वाम्नायो वाग्भवबीजं तद्वत् त्रिमूर्तिदैवत्यम् ॥
मनुकोणं द्विदशारं त्रितयमिदं कामराजबीजं स्यात् ।
स्थितिरत्र देवतानां त्रयमपि तद्वच्च दक्षिणाम्नायः ॥
अष्टत्रिकोणमध्यत्रितयं तार्तीयमेष संहारः ।
अत्रापि देवतात्रयमासीदयमेव पश्चिमाम्नायः ॥
सर्वमनाख्यारूपं तुर्यं शिवशक्तिदेवताधिकृतम् ।
स्यादुत्तरसमयात्मकमेवं स्रोतोमयं महाचक्रम् ॥ (३।१०-१३)

श्रीचक्रस्य नवनित्यामयत्वं षोडशनित्यामयत्वं च

अर्थरत्नावल्यां श्रीचक्रस्य नवनित्यामयत्वं षोडशनित्यामयत्वं चोपवर्णितम् । तद्यथा—"अन्यच्च सृष्ट्यादित्रितयं प्रत्येकं त्रैविध्यात्मकं नवनित्यामयमवगन्तव्यम् । पुनरेकैकस्य समष्टिव्यष्ट्यात्मना पञ्चरूपत्वमवगन्तव्यम् । यथा समष्टिसृष्टिः, सृष्टिसृष्टिः, स्थितिसृष्टिः, संहारसृष्टिः, अनाख्येति सृष्टिपञ्चकं पूर्वे, एवं स्थितिपञ्चकं दक्षिणे, तथा संहारपञ्चकं पश्चिमे । अनाख्यारूपमुत्तरमेकरूपमेव । एवं चक्रस्य त्रिपञ्चीकरणसमष्टिव्यष्ट्यात्मना षोडशात्मकत्वात् षोडशनित्यारूपत्वमवगन्तव्यम्" (पृ० ६५)इति । अयं चार्थः संकेतपद्धति-संमत इति तत्रैवोद्धृतेन तद्वचनेन ज्ञायते—

In Public domain. Digitization Muthulakshmi Research Academy

तुर्यात्मकं पञ्चयुतं योगिनीचक्रमण्डलम् ।
यो जानाति स मुक्तात्मा सोऽन्वयी देशिकाग्रणीः ॥ (पृ० ६६) इति ।

ीचक्रस्य त्रिधा भावनम्

एवंविधस्य श्रीचक्रस्य सकल-सकलनिष्कल-निष्कलरूपेण त्रिधा भावनं योगिनीहृदये मुपदिष्टम् । तद्यथा—

अकुले विषुसंज्ञे[1] च शाक्ते वह्नौ तथा पुनः ।
नाभावनाहते शुद्धे लम्बिकाग्रे भ्रुवोऽन्तरे ॥
बिन्दौ तदर्धे रोधिन्यां नादे नादान्त एव च ।
शक्तौ पुनर्व्यापिकायां समनोन्मनिगोचरे ॥
महाबिन्दौ पुनश्चैवं त्रिधा चक्रं तु भावयेत् ।
आज्ञान्तं सकलं प्रोक्तं ततः सकलनिष्कलम् ॥
उन्मन्यन्तं परे स्थाने निष्कलं च त्रिधा स्थितम् । (१।२५-२८)

एव श्रीचक्रस्य नवाधाररूपत्वं नवनादमयत्वं च प्रतिपाद्यते तत्र तत्र । एतत् त्रिधा ावनमेव श्रीचक्रस्यान्तरं पूजनमुच्यते ।

सुन्दर्युपास्तिः

तत्र सुन्दर्युपास्तिस्तावद् द्विविधा—वहिर्यागान्तर्यागभेदात् । वहिर्यागः पात्रासादनादि-स्तवान्तः कर्मसमूहः । अन्तर्यागो नामाधाराद्राजदन्तान्तं तेजस्तन्तोर्विभावनम्, मानसी ूजा वा; तस्य क्रम इतिकर्तव्यतेति सौभाग्यभास्करे (पृ० ५) भास्करराय: । अन्तर्याग-विधः—सकलः, सकलनिष्कलः, निष्कलश्चेति (पृ० ५) सेतुबन्धे । श्रीचक्रस्य त्रिधा ावनमेतदनुपदमेव प्रतिपादितम् । अत्रायं भावः—उपास्यायाः परमेश्वर्यास्त्रीणि रूपाणि ्युपास्तियोग्यानि—स्थूलं सूक्ष्मं परं चेति । तत्राद्यं करचरणाद्यवयवशीलं मन्त्रसिद्धिमतां रिन्द्रियपाणीन्द्रिययोर्योग्यम् "ततः पद्मनिभां देवीं" (१।१३०) इत्यादिना प्रतिपाद्यते ।

'विषसंज्ञे' इति तन्त्रान्तरसंमतः पाठः ।

मेढ्रस्याधः कुलो ज्ञेयो मध्ये तु विषसंज्ञितः ।
मूले तु शाक्तः कथितो बोधनादप्रवर्तकः ॥
अग्निसंज्ञस्ततश्चोर्ध्वमङ्गुलानां चतुष्टये ।

इति नेत्रतन्त्रोद्योत(भा० १ पृ० १४७)धृतवचने, तन्त्रालोकविवेकधृते "वह्निविषानुयोगात्" (आ० ३, पृ० ७९) इति वचने च विषशब्दस्यैव प्रयुक्तेः । योगिनीहृदयवदत्रापि शाक्ता-नन्तरमेवाग्निसंज्ञक आधारो व्याख्यातः । दीपिकाकारेण तु "वह्नौ शाक्ते इति व्यत्ययेन पठितव्यम्" (पृ० ३९) इत्युक्त्वा तत्क्रमेणैव स्वच्छन्दसंग्रहग्रन्थः प्रमाणितः ।

द्वितीयं मन्त्रात्मकं पुण्यवतां श्रवणेन्द्रियवागिन्द्रिययोर्योग्यम् । तृतीयं वासनात्मकं पुण्यवतां मनसो योग्यम् । सत्यपि रूपत्रैविध्ये देव्या भावना द्विविधैव भवति—सरूपा, अरूपा चेति । स्थूलरूपानुसन्धानात्मिका प्रथमा, पररूपानुसन्धानात्मिका चरमा । सूक्ष्मरूपानुसन्धानात्मिकाया विधाया उभयत्राप्युपयोगान्न पार्थक्येन परिगणनम् । अत्र प्रथमाया वहिर्यागत्वेन, चरमाया अन्तर्यागत्वेन व्यपदेशः शास्त्रेषु । तदिदमुभयविधमप्युपासनं मानसव्यापारविशेष एवेति भास्करराय: । तद्यथा—"सा चोपासना मानसक्रियाविशेषरूपा । "जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्" (१।१।३१) इति ब्रह्मसूत्रादौ तथा व्याख्यान-दर्शनात् । देवताविषयकोऽनुराग एवोपासनेति केचित् । तन्न, भक्तिमानुपासीतेत्यादिविधौ भक्ते-रुपासनातो भेदेन निर्देशानुपपत्तेरनुरागस्यैव भक्तिपदवाच्यत्वात्, "अथातो भक्तिजिज्ञासा, सा परानुरक्तिरीश्वरे" (१।१-२) इति शाण्डिल्यसूत्रात् । तस्मादनुरागव्यावृत्ता क्रियैवो-पासना । सा च द्विविधा—तन्मन्त्रजपरूपा, तद्यन्त्रपूजारूपा चेति । जप मानसे चेति धातुपाठ-स्मृत्या जपस्य मानसक्रियारूपत्वावगमात् । पूजाया अपि ध्यानादिरूपायास्तथात्वात् । उपचार-समर्पणरूपाया अपि न ममेत्याकारकमानससंकल्पैकरूपत्वात्" (से० पृ० ६८) इति । उपा-साया मानसव्यापारमात्रत्वेऽपि बहिर्यागे बाह्यपदार्थोपादानकत्वं तस्याङ्गीकर्तव्यमेव । स च पञ्चोपचार-षोडशोपचार-चतुष्षष्ट्युपचारादिभेदेन, "केवलो यामलो मिश्रश्चक्रयुग् वीरसंकरः" इत्यादिभेदेन च बहुधा भिद्यते ।

"श्रीसुन्दरीसाधनतत्पराणां भोगश्च मोक्षश्च करस्थ एव" इति श्रूयते । तत्रान्तर्याग-प्रवणेन वहिर्यागेनापि मोक्षसिद्धिः । वहिर्यागेन च केवलेन भोगोऽपि सिध्यतीति विवेकः । अत्रेदं रहस्यम्—सूर्यचन्द्रयोर्देवयानपितृयाणात्मकेडापिङ्गलामार्गेणाहोरात्रयोः[1] संचरणम् । चन्द्रस्तु वामनाडीमार्गेण संचरन् द्विसप्ततिसहस्रनाडीमार्गममृतेन सिञ्चति । सूर्यश्च दक्षिणनाडी-मार्गेण संचरन् तदुत्क्षिप्तानमृतबिन्दूनुपाहरति । यदा चन्द्रसूर्ययोरुभयोराधारचक्रे समावेशस्तदाऽमावास्या तिथिरुत्पद्यते । कृष्णपक्षतिथयस्तत उत्पद्यते । अत एव कुण्डलिनीशक्तिराधारकुण्डे सूर्यकिरणसंपर्काद्विलीनचन्द्रमण्डलमध्यगलत्पीयूषपरिपूरिते स्वपिति । स्वापावस्थैव[2] कृष्णपक्ष इत्युच्यते । योगी यदा समाहितचित्तश्चन्द्रं चन्द्रस्थाने, सूर्यं सूर्यस्थाने वायुना निरोद्धुं क्षमते, तदा चन्द्रसूर्यौ निरुद्धार्वमृतसेचनतदाहरणयोरशक्तौ । तदानीं वायुना प्रेरितेन स्वाधिष्ठान-वह्निना शुष्कीभूतेऽमृतकुण्डे निराहारा कुण्डलिनी सुप्तोत्थिता सती सर्पवत् फूत्कारं कुर्वती

१. सौन्दर्यलहरीटीका लक्ष्मीधरा द्रष्टव्या, पृ० १४६-१४७

२. एतेन शुक्लपक्ष एव कुण्डलिनीप्रबोधः कर्तुं शक्यते योगिभिर्न कृष्णपक्ष इत्यवधेयमत्र, स्वापावस्थायां प्रबोधस्यासम्भवात्[1]।

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थित्रयं भित्त्वा सहस्रदलकमलमध्यवर्तिनं चन्द्रमण्डलं दशति । तस्माद् गलन्त्यः पीयूषधारा आज्ञाचक्रोपरिस्थितं चन्द्रमण्डलमाप्लावयन्ति। तस्माद् गलिताभिरमृतधाराभिः सर्वं देहमाप्लावयन्ति । ततश्चाज्ञाचक्रोपरिस्थितस्य चन्द्रमसः कलाः पञ्चदश नित्याः । ताः पञ्चदश तदधःस्थितविशुद्धिचक्रमाश्रित्य परिवर्तन्ते । सहस्रदलकमलान्तःस्थितं चन्द्रमण्डलं बैन्दवं स्थानम् । तत्कला चिन्मयी आनन्दरूप आत्मेति गीयते । सैव त्रिपुरसुन्दरी । चन्द्रस्य प्रथमायाः कलायाः प्रतिपदिति नामधेयम् । सैव कलात्मिका सूर्यमण्डलान्निर्गता । कृष्णपक्षे तु सूर्यमण्डलं प्रविष्टा । एवं शुक्लपक्षे सूर्यमण्डलान्निर्गता द्वितीया कला द्वितीया तिथिः । कृष्णपक्षे तु सूर्यमण्डलं प्रविष्टा द्वितीया कला द्वितीया तिथिरिति । एवं सर्वत्रोहनीयम् । अतश्च पञ्चदशकलाव्यवधानं सूर्यचन्द्रयोर्यत्र सा पौर्णमासी । पञ्चदश्यां कलायां सूर्यचन्द्रयोरत्यन्तसंयोगो यत्र साऽमावास्या । कौलमते चन्द्रकलात्मिकानां षोडशानां नित्यानां प्रतिदिनमेकस्या एवानुष्ठानम् । सर्वाशां समयिमते । षोडश्याः कलायास्तु पञ्चदशस्वपि तिथिष्वनुष्ठानम्, पञ्चदशानां नित्यानां तत्रैवान्तर्भावात् । अत एव नित्याषोडशिकार्णवषोडशनित्याप्रतिपादनप्रकरणे (१।२५-२८) पञ्चदश तिथिनित्या अङ्गनित्याः, षोडशी तु व्यापिकाऽङ्गिनित्येति व्याख्यातं व्याख्यातृभिः । तत्र प्रतिपदि त्रिपुरसुन्दरीकला ध्येया । द्वितीयायां कामेश्वरी कला । तृतीयायां भगमालिनीकला । चतुर्थ्यां नित्यक्लिन्नाकला उपास्या । पञ्चम्यां भेरुण्डाख्या कला । षष्ठ्यां वह्निवासिनीकला । सप्तम्यां महाविद्येश्वरीकला । अष्टम्यां रौद्रीकला । नवम्यां त्वरिताकला । दशम्यां कुलसुन्दरीकला । एकादश्यां नीलपताकाख्या कला । द्वादश्यां विजयाख्या कला । त्रयोदश्यां सर्वमङ्गलाख्या कला । चतुर्दश्यां ज्वालाख्या कला । पञ्चदश्यां मालिन्याख्या कला । सर्वासु तिथिषु चिद्रूपाख्या कला षोडशी उपास्या । प्रतिपदि या त्रिपुरसुन्दरी कथिता, सा चिद्रूपात्मिका न भवति, चिद्रूपात्मिकाया मूलविद्याया भिन्नत्वेनानुष्ठानादिति लक्ष्मीधरः (पृ० १४६) । नित्याषोडशिकार्णवे पठिता एकादशी नित्या न स्मृता लक्ष्मीधरेण । दूतीनित्याऽष्टमी चात्र रौद्रीनाम्ना स्मर्यते । अत्र प्रथमाया महात्रिपुरसुन्दर्या अङ्गिनित्यात्वात् सैव चिद्रूपाख्या षोडशी कला, शिष्टानां पञ्चदशतिथिनित्यानामङ्गनित्यात्वात् प्रतिपदादितिथिषु समाराधनमित्येवोचितः पक्षः ।

रतिरहस्ये चन्द्रकलाधिकारे प्रथमे श्लोके—

अङ्गुष्ठे पद-गुल्फ-जानु-जघने नाभौ च वक्षःस्तने
कक्षा-कण्ठ-कपोल-दन्तवसने नेत्रालिके मूर्धनि ।

१. "आधारस्वाधिष्ठानमणिपूरानाहतविशुद्ध्याज्ञाचक्रात्मकं श्रीचक्रं त्रिखण्डं सोमसूर्यानलात्मकम् । मूलाधारस्वाधिष्ठानचक्रद्वयमेकं खण्डम् । मणिपूरानाहतचक्रद्वयमेकं खण्डम् । विशुद्ध्याज्ञाचक्रद्वयमेकं खण्डम् । तत्र प्रथमखण्डोपरि अग्निस्थानम् । तदेव रुद्रग्रन्थिरित्युच्यते । द्वितीयखण्डोपरि सूर्यस्थानम् । तदेव विष्णुग्रन्थिरित्युच्यते । तृतीयखण्डोपरि चन्द्रस्थानम् । तदेव ब्रह्मग्रन्थिरित्युच्यते । एतदेव ग्रन्थित्रयम्" (पृ० ९८) इति लक्ष्मीधरः ।

शुक्लाशुक्लविभागतो मृगदृशामङ्गेष्वनङ्गस्थिति-
रूर्ध्वाधोगमनेन वामपदतः पक्षद्वये लक्षयेत् ॥

इत्येवं तिथिक्रमेण नायिकावयवेष्वनङ्गस्थितिः प्रतिपाद्यते नन्दिकेश्वरमतानुसारम्, "एकारौकारयुक्ता हरिहरजहराः पञ्च बाणाः स्मरस्य" (श्लो० ४) इति च पञ्च[1] बाणबीजानि प्रतिपाद्यन्ते ।

गोणीपुत्रकमतेन तु—

मूर्धोरःस्थलवामदक्षिणकरे वक्षोरुहोरुद्वये
नाभीगुह्यललाटजाठरकटीपृष्ठेषु तिष्ठत्यसौ ॥५॥
कक्षाश्रोणिभुजेषु च प्रतिपदं प्रारभ्य कृष्णामथ
श्वेतायाः प्रभृति क्रमेण मदनो मूर्धानमारोहति ।
अङ्गेष्वेषु मृगीदृशां मनसिजप्रस्तावनापण्डिता
मात्राः षोडशः चिन्तयन्ति बहलज्योतिःस्फुलिङ्गाकृतीः ॥ ६ ॥

विशेषजिज्ञासुभिश्चन्द्रकलाधिकाराख्ये द्वितीये परिच्छेदे विषयोऽयं भावनीयः । एवं च तिथिनित्याक्रमेण कुण्डलिनीप्रबोधनपरस्य दूतीयागानुष्ठाननिरतस्य च त्रिपुरोपासकस्य भोगमोक्षयोरधिगतिः सुलभैवेति सुष्ठूक्तम्—"भोगश्च मोक्षश्च करस्थ एव" इति । विशेषार्घ्यनिष्पत्तये कुण्डगोलकाख्यद्रव्याधिगमाय—"यदेतत्स्त्रियां लोहितं भवत्यग्नेस्तद्रूपं तस्मात्तस्मान्न बीभत्सेत, अथ यदेतत्पुरुषे रेतो भवत्यादित्यस्य तद्रूपं तस्मात्तस्मान्न बीभत्सेत" (२।३।७) इत्यैतरेयारण्यकवचनं प्रमाणीक्रियते । किन्तु वैदिक्यां संस्कृतावष्टाङ्गमपि मैथुनं सर्वथा हेयतयैव सर्वत्रोपदिश्यत इति तस्य मोक्षशास्त्रत्वमेव । तान्त्रिक्यां तु संस्कृतौ कषायपरिपाकायाधिकारिभेदेन बहिर्यागमुखेनान्तरयजनविधिरुपदिश्यते । अतस्तस्या भोगापवर्गोभयसाधकत्वमिति भावः ।

जपो ध्यानं च

मन्त्रजपरूपोपासनाऽनुपदमेव प्रतिपादिता । तत्प्रसङ्गेन जपो ध्यानं चाधुनाऽनुव्याख्यायते । जपमहिमा महत्त्वं च सर्वेष्वेव धर्मेषु निर्विवादमङ्गीक्रियते । अर्थानुसन्धानमन्तराऽपि मन्त्रजपविधिरव्याहतं सर्वत्र प्रवर्तते । किन्तु योगसूत्रकारेण भगवता पतञ्जलिना "तज्जपस्तदर्थभावनम्" (१।२८) इति सूत्रयताऽर्थभावनस्य किमपि वैशिष्ट्यमाविर्भावितम् । अत एव योगिनीहृदये श्रीविद्यायाः षड्विधोऽर्थः, भास्कररायेण च वरिवस्यारहस्ये द्वितीयेंऽशे पञ्चदशविधोऽर्थः प्रकाशितः ।

१. नित्याषोडशिकार्णवटीकाकारैस्तु "कामस्थम्" (४।४५) इत्यादिसार्धैकश्लोकव्याख्यानावसरे ह्रीं क्लीं ऐं ब्लूं स्त्रीं इति पञ्च बाणबीजान्युद्धृतानि ।

In Public domain. Digitization: Muthulakshmi Research Academy

FRANCAIS D'INDOLOGIE PONDICHERY

ार्थज्ञानविहीनं शब्दस्योच्चारणं फलति ।
भस्मनि वह्निविहीने न प्रक्षिप्तं हविर्ज्वलति ॥
अर्थमजानानां नानाविधशब्दमात्रपाठवताम् ।
उपमेयश्चक्रीवान् मलयजभारस्य वोढेव ॥ (व० र० ५४-५५)

इति हि भास्करराय: । "स्थाणुरयं भारहार: किलाभूदधीत्य वेदं न विजानाति योऽर्थम्" (१।५।२) इति निरुक्तं च । तदिदमर्थविभावनमेव ध्यानपदाभिधेयम् । "ध्यानं हि निश्चला बुद्धिर्निराकारा निराश्रया । न तु ध्यानं शरीराक्षिमुखहस्तादिकल्पना ॥" (श्लो० १४६) इति हि ध्यानविषये विज्ञानभैरवीयं वच: ।

त्रिविधो मन्त्रजप:

आगमेषु त्रिविधो मन्त्रजप: प्रतिपाद्यते—भाष्य उपांशुर्मानसश्च । क्षुद्रसिद्ध्यर्थं[1] अन्यश्रवणात्मको भाष्यो जप: कार्य:, मध्यसिद्ध्यादौ स्वसंवेद्यलघुध्वनिरुपांशु:, श्रेष्ठतमे कार्यसिद्ध्यादौ मानसो जप: क्रियते । अपि च अधमान्[2] मन्त्रान् भाष्येण, मध्यमानुपांशुना, उत्तमांश्च मन्त्रान् मनसा जपेत् । नित्याषोडशिकार्णवेऽपि—

निगदेनोपांशुना वा मानसेनापि सुव्रते (५।७) ।

इति वचनेन त्रिविधो जपो निर्दिष्ट: ।

निगदेन यदा जप्तं लक्षं चोपांशुना कृतम् ।
मानसेन महेशानि कोटिजापफलं लभेत् ॥ (५।१८)

इत्यनेन जपफलं च प्रतिपादितम् । एतदनुगुणमेव—

विधियज्ञाज्जपो यज्ञो विशिष्टो दशभिर्गुणै: ।
उपांशु: स्याच्छतगुण: साहस्रो मानस: स्मृत: ॥ (२।८५)

इति मानवं वचनमृजुविमर्शिन्यामुद्ध्रियते । एतेषां लक्षणानि च—

उच्चारो मनसा स्थानध्यानवर्णप्रकल्पनात् ।
मानसो जप इत्युक्तो योगमार्गप्रवर्तक: ॥
उपांशुर्निजकर्णैकगोचर: सिद्धिदायक: ।
सुस्पष्टवचनोच्चारो वाचिक: सिद्धिदायक: ॥

इत्येवमृजुविमर्शिन्यामर्थरत्नावल्यां चोद्धृताभ्यां सिद्धनाथपाद[3]श्लोकाभ्यां प्रतिपाद्यन्ते । अत्यत्रो मानसो जप एव—

मृगेन्द्रागमवृत्तिचर्यापादधृतं (पृ० ४१, २३२) पराख्यसंहितावचनं द्रष्टव्यम् ।
मृगेन्द्रागमवृत्तिचर्यापादधृतं (पृ० ४२. २३३) पौष्करागमवचनं द्रष्टव्यम् ।
कुलरत्नशास्त्रप्रणेता सिद्धनाथपाद: कुलशास्त्रस्य विशिष्ट आचार्य इत्यर्थरत्नावलीधृततद्वचनेभ्यो ज्ञायते । अत्र ध्यानस्थानवर्णपदेषु तादृश एव कश्चन विशिष्टोऽर्थस्तस्याभिप्रेत: । स चार्थ:—

संयम्येन्द्रियसंचारं प्रोच्चरेन्नादमान्तरम् ।
एष एव जप: प्रोक्तो न तु बाह्यजपो जप: ॥

इति योगिनीहृदयदीपिका(पृ० १९५, ३१३)धृतप्रामाणिकवचनोक्तो नादा[2]नुसन्धानलक्षण आन्तरो जपोऽभिमन्तव्य: । स च—

भूयो भूय: परे भावे भावना भाव्यते हि या ।
जप: सोऽत्र स्वयं नादो मन्त्रात्मा जप्य ईदृश: ॥ (श्लो० १४५)

इत्येवं विज्ञानभैरवभट्टारके प्रतिपाद्यते । अत्र च जपोऽजपासीमानमामृशति । सोऽयमजपागायत्रीतिनाम्ना शास्त्रेषु प्रथते । विस्तरभयान्नात्र तद्व्याख्यायते ।

त्रैपुरे दर्शने जपस्य लक्षणम्

त्रैपुरे दर्शने तु जपस्य लक्षणमवस्थापञ्चकशून्यषट्कविषुवत्सप्तकचक्रनवकविभावनादिरूपं चिह्नम् । तदुक्तं वरिवस्यारहस्ये—

एवमवस्थाशून्यविषुवन्ति चक्राणि पञ्च षट् सप्त ।
नव च मनोरथांश्च स्मरतोऽर्णोच्चारणं तु जप: ॥ (१।५२)

अस्यार्थो वरिवस्यारहस्यप्रकाशे द्रष्टव्य: । अर्थानुसन्धानपूर्वकं मन्त्रार्णोच्चारणं जप इति संक्षेप: । वामकेश्वरदर्शने हि त्रिविधं चक्रभावनमवस्थापञ्चकादिभावनं च जपवेलायां विधीयते ।

पिण्डसं(ज्ञा?ज्ञं)भवेत् स्थानं ध्यानं (तत्प?तु प)दमुच्यते ।
व(र्ण?र्णं) रूपं विनिर्दिष्टं लक्षं वै रूपवर्जितम् ॥ (३।४)

इति कौलज्ञाननिर्णयवचनत: प्रतीयते । रूपवर्जितं रूपातीतमित्यर्थ: । पिण्डपदरूपरूपातीतानामर्थश्च—

पिण्डं कुण्डलिनी शक्ति: पदं हंस: प्रकीर्तित: ।
रूपं बिन्दु: समाख्यातो रूपातीतं तु निष्कलम् ॥

इत्यर्थरत्नावलीधृतमतोत्तरवचनतो ज्ञायते । योगिनीहृदयदीपिकायां (पृ० ५९) तु स्वच्छन्दसंग्रहस्थमेतद्वचनमित्युक्तम्, सेतुबन्धेऽपि (पृ० ६०, २४८) तथैव । पिण्ड-पद-रूप-रूपातीता: कौलज्ञाननिर्णये, मालिनीविजयोत्तरे, तन्त्रालोके च यथा व्याख्यायन्ते, तथैव सिद्धहैमयोगानुशासनाख्ये जैनयोगशास्त्रेऽपि व्याख्याता भवन्ति । वर्तते चाणवोपायव्याख्यानप्रसङ्गे तन्त्रालोकादिषु ध्यानस्थानवर्णादिपदानामन्यविध एवार्थ: । सर्वोऽयं विषयो निबन्धान्तर एव प्रदर्शयितुं शक्येत ।

१. वचनमेतत् संकेतपद्धतिस्थं स्यादित्यन्यत्र प्रतिपादितमस्माभि: ।
२. शिवपुराणे हठयोगप्रदीपिकाप्रभृतिषु च ग्रन्थेषु नादानुसन्धानविषयको विचारो विस्तरेणावलोक्यते । स तत एवानुशीलनीय: ।

In Public domain. Digitization: Muthulakshmi Research Academy

श्रीविद्यायां त्रीणि कूटानि वीजानि वा भवन्ति। प्रतिकूटमन्ते हृल्लेखाया
वस्थितिः।

हृल्लेखायाः स्वरूपं तु व्योमाग्निर्वामलोचना।
बिन्द्वर्धचन्द्ररोधिन्यो नादनादान्तशक्तयः॥
व्यापिकासमनोन्मन्य इति द्वादशसंहतिः।

(व० र० ११८–१३)

गिनीहृदये (३।१७२–१७६) एता द्वादश कला उच्यन्ते कामकलायाः। द्वादीनां लक्षणमुच्चारणकालः स्थानं च "दीपाकारोऽर्धमात्रश्च" (१।२८) इत्यारभ्य योन्मनी" (१।३४) इत्यन्तं योगिनीहृदये तट्टीकायां वरिवस्यारहस्ये तत्प्रकाशे च १५-२७) द्रष्टव्यम्। योगिनीहृदयप्रदर्शितो बिन्द्वादीनामाकारश्च वरिवस्यारहस्यान्ते पितायां सारण्यां साधु प्रदर्शितः। वाग्भवकामराजशक्तिबीजाख्ये कूटत्रये आधारहृदय-ध्येषु स्थितानां वह्निसूर्यसोमकुण्डलीनां त्रये च प्रत्येकं चक्रत्रयस्य भावनम्। तत्र यमोहनादिचक्रत्रयस्याधारस्थवह्निमण्डलस्थितवाग्भवबीजशिखरवर्तिकामकलान्तर्गतहार्ध-रूपवह्निकुण्डलिन्युत्थानोदितहृद्गतकामराजबीजपर्यन्तव्यापिनादमयताभावनं वाग्भवबीज-। सर्वसौभाग्यदायकादिचक्रत्रयस्य हृदयस्थसूर्यमण्डलस्थितकामराजशिखरवर्तिकाम-न्तर्गतहार्धकलारूपसूर्यकुण्डलिन्युत्थानोदितबिन्दुस्थानशक्तिबीजपर्यन्तव्यापिनादमयताभावनं राजबीजजपः। सर्वरोगहरादिचक्रत्रयस्य बिन्दुस्थानेन्दुमण्डलान्तर्गतशक्तिबीजशिखरवर्ति-कलान्तर्गतहार्धकलारूपसोमकुण्डलिन्युत्थानोदितब्रह्मरन्ध्रोपरिस्थितशिवतत्त्वातीतसमना-र्यन्तव्यापिनादेन सहोन्मन्यां लयभावनं शक्तिबीजजपः।

अयमभिप्रायः—अत्र प्रथमकूटे या हृल्लेखा, तदन्तर्गता या कामकला, तस्यां वर्तमाना रार्धकला, सा वह्निकुण्डलिनीत्युच्यते। सैव द्वितीयकूटे सूर्यकुण्डलिनीति, तृतीयकूटे ण्डलिनीति च कथ्यते। बिन्द्वादिसमष्टिरूपो नादस्तु तत एवोत्पन्नो दीपशिखाग्रवर्ति-लेखावत्। एवं चानाहतमारभ्योत्थितो नादस्त्रैलोक्यमोहनसर्वाशापरिपूरकसर्वसंक्षोभण-स्य त्रिविधसृष्टिरूपस्यापरं रूपम्. भ्रूमध्यमारभ्योत्थितो नादः सर्वसौभाग्यदायकसर्वार्थ-सर्वरक्षाकरचक्रत्रयस्य त्रिविधस्थितिरूपस्यापरं रूपम्, बिन्दुस्थानमारभ्योत्थितो नादः हरसर्वसिद्धिप्रदसर्वानन्दमयचक्रत्रयस्य संहृतित्रयरूपस्यापरं रूपमिति विभावनीयम्। ाग्भवबीजशिखरवर्तिनं नादं हृद्गतकामराजबीजपर्यन्तमुच्चरेत्। शक्तिबीजे च प्राणादयो कला अपि तद्बीजशिखरे स्थिता उच्चार्याः। वाग्भवकामराजयोः सृष्टिस्थिति-त्र विश्वातीतोन्मनीपर्यन्तमुच्चारः।

बिन्द्वादीनां नवानां तु समष्टिर्नाद उच्यते" (१।१३) इति वरिवस्यारहस्ये। "यद्यपि न्दुविनिर्मुक्तानामष्टानामेव नादसंज्ञा मन्त्रशास्त्रे, तथापि व्यवहारसौकर्याय तत्सहिताना-व साऽत्र कृता" (पृ० ११–१२) इति वरिवस्यारहस्यप्रकाशे।

कर्मेन्द्रियाणि पञ्च वाक्पाणिपादपायूपस्थानि, ज्ञानेन्द्रियाणि पञ्च घ्राणरसनचक्षुस्त्वक्-श्रोत्राणि, एतेषां दशानां स्वस्वविषयोत्पादकत्वं व्यवहारः। स एव जागरावस्था। तत्र हेतुरूपं ज्ञानमरूपत्वाद्भावनादशायां प्रकाशरूपत्वेन भावनीयम्। अतः प्रकाशवाचके वह्नौ तार्तीयबीजशिखरवर्तिनि रेफे महाजाग्रदवस्था सार्वकालिकनिद्राक्षयलक्षणा परप्रबोधदशा भावनीया। मनो बुद्धिरहङ्कारश्चित्तं चेत्यन्तःकरणानि चत्वारि। तैरेव व्यवहारः स्वप्नः। तज्जनकः प्रकाशस्तृतीयहृल्लेखास्थकामकलया बोध्यो गलदेशे चिन्तनीयः। स्वप्ने विद्यमानाना-मन्तःकरणवृत्तीनां लयतः सर्वेन्द्रियोपरतिः सुषुप्तिः। अत्र हि लीनपूर्वस्य देहाक्षादिषु क्रोडीकृतस्य लीनस्यैव स्वात्मनो वेदनं प्रकाशनं भवति। प्रकृते च विषयभूतस्य तार्तीयबीजस्य वर्णानां विलोमेन विलये भ्रूमध्यस्थानस्थितहृल्लेखोर्ध्वबिन्दौ सुषुप्त्यवस्था भाव्यते। चैतन्यव्यक्तिहेतोर्नादरूपस्य वेदनं तुर्यावस्था। तार्तीयबीजशिखरवर्त्यर्धचन्द्ररोधिनीनादेषु स्वात्मचैतन्याभिव्यक्तिकारणनादकलनात्मिका तुर्यावस्था भावनीया। तुरीयातीतं मनोवाग-तीतपरमानन्दस्वरूपं सुखस्थानम्। तच्च नादान्तशक्तिव्यापिकासमनोन्मनासु स्थितं भावयेत्। एवमत्र तार्तीये शक्तिबीज एव विद्याजपकरणात्रधाननिपुणेन योगिना जपकाले जागरिताद्याः पञ्चावस्थाः स्मरणीयाः।

तृतीयस्य शक्तिबीजस्य रेफस्थाने बिन्दौ रोधिन्यां नादान्ते व्यापिकायां च विज्ञानभैर-वोक्तं (श्लो० ३२) शिखिपक्षचित्रमण्डलरूपं शून्यपञ्चकं भावनीयम्, उन्मन्यां च षष्ठं महाशून्यं नीरूपं चिन्त्यम्। एवं भावयतो योगिनो गगनपञ्चकभेदक्रमेणाकुलकुण्डलिनी-समावेशो जायते।

प्राणस्य हकारात्मनो वाय्वात्मनो यष्दुर्मनसश्च संयोगः प्राणविषुवमित्युच्यते। मूलाधारस्थितवाग्भवशिखरवर्तिनं नादं हृदयपर्यन्तमुच्चार्य तत्र स्वयं लीनो भूत्वा स्वात्मन-स्तन्मयतानुसन्धानं मन्त्रविषुवम्। मूलाधारादिचक्रषट्कस्याप्यध ऊर्ध्वं चैकैको ग्रन्थिरिति द्वादशग्रन्थयः। तद्भेदनमार्गेणैव सुषुम्णानाडी मूलाधाराद् ब्रह्मरन्ध्रं व्याप्नोति। तेनैव मार्गेण नादस्य वर्णपङ्क्तेश्च नाडीसंयुक्तत्वेन भावनयोच्चारणं नाडीविषुवम्। रेफमीकारं तन्मध्यवर्ति-सपरार्धकलां बिन्दुमर्धचन्द्ररोधिनीनादनादान्तांश्च शक्तौ लीनान् विभावयेत्। प्रशान्तेन्द्रिय-गोचरमेतत्प्रशान्तविषुवमित्युच्यते। शक्तिस्थानादूर्ध्वं पुनरुज्जीवितस्य नादस्य सूक्ष्मतमस्य व्यापिकामुल्लङ्घ्य समनायां लयः शक्तिविषुवम्। समनाया अप्यूर्ध्वं पुनरुज्जीवितस्यात्यन्तं सूक्ष्मतमस्य नादस्योन्मन्यां कालातीतायां विचिन्तनं कालविषुवम्। निमेषस्य त्रिंशत्तमो भागस्तत्पर इत्यभिधीयते। तत्परस्य शतांशश्च त्रुटिरिति। अर्थान्निमेषस्य त्रिसहस्रतमो भाग-स्त्रुटिरित्यभिधीयते। तेन हकाराद्युन्मन्यन्तानां विद्यावयवानां मुनिचन्द्राष्टदशभिरर्थात् सप्तदशाधिकाष्टोत्तरदशसहस्र(१०८१७)त्रुटिभिरुच्चारे "अकुले विषुसंज्ञे च" (१।२५) इत्यादियोगिनीहृदयोक्तदिशा कृते सति नादस्यान्ते तत्त्वस्य वेदनं जायते। चैतन्याभिव्यक्ति-निदानमेतत्तत्त्ववेदनमेव स्वात्मानुसन्धानरूपं तत्त्वविषुवमित्याख्यायते।

In Public domain. Digitization Muthulakshmi Research Academy

एवमनेन प्रकारेण जपकाले सकल-सकलनिष्कल-निष्कलचक्रभावनवेलायां विद्याऽव्यय-
मुच्चारणकालेषु शून्यषट्कादिकं चिन्तयतो योगिनः सकलाः सिद्धयोऽणिमाद्याः सिद्ध्यन्ति ।
त्याशुचिक्लेशदुर्भगभेदप्रपञ्चपरिपन्थिभूतं सर्वविषयानन्दसमष्टिभूतं परमानन्दलक्षणपरम-
पदपरमसुन्दरपरमशिवरूपं निसर्गानन्दसुन्दरं शून्यषट्कावस्थापञ्चकसप्तविषुवकोलाहलातीतं
विश्रान्तिभूमिभूतं परं स्थानमभिव्यज्यते ।

योगः

चक्रसृष्टिप्रकरणेऽकुलादिषु स्थानेषु नवचक्रविभावनमुपदिष्टम् । मातृकाप्रकरणे
करणे च विन्द्वर्धचन्द्रप्रभृतयो नव नादाः प्रदर्शिताः । जपस्य लक्षणमवस्थापञ्चकशून्य-
विषुवत्सप्तकचक्रनवकविभावनादिरूपं भवति । सर्वमेतद्विभावनं यौगिकप्रक्रियामात्रगम्यम् ।
न्त्रे (६।६) स्थूलं सूक्ष्मं परं चेति त्रिविधं ध्यानमुपदिश्यते[2] । तद्यथा—

स्थूलं तु यजनं होमो जपो ध्यानं समुद्रकम् ।
मन्त्राणि मोहनादीति मन्त्रराट् कुरुते भृशम् ॥
सूक्ष्मं चक्रादियोगेन कलानाड्युदयेन च ।
परं सर्वात्मकं चैव मोक्षदं मृत्युजिद्भवेत् ॥ (६।७-८)

स्थूल-सूक्ष्म-परध्यानानां लक्षणमभिधाय षष्ठसप्तमाष्टमाधिकारेषु तानि क्रमेण
तरं व्याख्यातानि । अत्र सूक्ष्मपदेन कुण्डलिनीयोगः, परपदेन चाष्टाङ्गिको योग उक्तः ।
लिनीयोगस्य कुलप्रक्रियान्तर्भूतत्वात् स कौलिकयोगनाम्नाऽभिधातुं शक्यते । अतस्तन्नाम्नै-
तत्प्रतिपादयिष्यते । ज्ञानयोगक्रियाचर्याख्यपादचतुष्टयात्मकेष्वागमेषु तन्त्रेषु च योगपादे
ो योगो मुख्यत्वेन प्रतिपादितो भवति । दृश्यते च सप्ताङ्गिकोऽष्टाङ्गिको वा योगस्तत्र तत्र ।
ङ्गिको योगोऽप्यत्रत्यो न सर्वथाऽनुकरोति पातञ्जलं योगम् । स्वच्छन्दतन्त्रे चतुर्थे पटले
विवेचनावसरेऽन्यत्र च बहुषु स्थलेषु विन्द्वर्धचन्द्रादयो निर्दशिता विवृताश्च, योगिनीहृदये
करणे निर्दिष्टाः शून्यविषुवत्प्रभृतयश्चात्र विस्तरेण व्याख्याता दृश्यन्ते । विज्ञानभैरवेऽपि
यौगिकी विशिष्टा परम्परोन्मील्यते । न केवलं वैष्णवेषु शैवेषु शाक्तेष्वेव, जैनेषु बौद्धेषु
स्त्रेषु स्वकीया योगप्रक्रिया दृश्यते । वर्तते च कियतांऽशेनैतेषु साधर्म्यं वैधर्म्यं च ।
तिपादनस्य नायमवसर इति विस्तराद्विरम्य संक्षेपेणात्र कौलिकस्तान्त्रिकश्च योगः
द्यते ।

को योगविधिः

नेत्रतन्त्रे सप्तमाधिकारे योगविधिरयं प्रदर्शितः । तदत्र निरूप्यते । तथाहि—

ऋतुचक्रं स्वराधारं त्रिलक्ष्यं व्योमपञ्चकम् ॥१॥
ग्रन्थिद्वादशसंयुक्तं शक्तित्रयसमन्वितम् ।

"अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" (यो० सू० २।५) ।
ध्यानशब्दोऽत्र योगार्थवाचकः ।

धामत्रयपथाक्रान्तं नाडित्रयसमन्वितम् ॥२॥
ज्ञात्वा शरीरं सुश्रोणि दशनाडिपथावृतम् ।
द्वासप्तत्या सहस्रैस्तु सार्धकोटित्रयेण च ॥३॥
नाडिवृन्दैः समाक्रान्तं मलिनं व्याधिभिर्वृतम् ।
सूक्ष्मध्यानामृतेनैव परेणैवोदितेन तु ॥४॥
आप्यायं कुरुते योगी आत्मनो वा परस्य च ।
दिव्यदेहः स भवति सर्वव्याधिविवर्जितः ॥५॥ इति ।

इमे श्लोकाः क्षेमराजेनेत्थं व्याख्याताः—"ऋतवः षट्, जन्म[1]-नाभि-हृत्-तालु-बिन्दु-नाद-
स्थानानि नाडि-माया-योगि-भेदन-दीप्ति-शान्ताख्यानि नाडिमायादिप्रसराश्रयत्वात् चक्राणि
यत्र; स्वराः षोडश, अङ्गुष्ठ-गुल्फ-जानु-मेढ्र-पायु-कन्द-नाडि-जठर-हृत्-कूर्मनाडी-कण्ठ-तालु-
भ्रूमध्य-ललाट-ब्रह्मरन्ध्र-द्वादशान्ताख्या जीवस्याधारकत्वादाधारा यत्र; यदि वा सर्वसहत्वा-
दस्य नयस्य कुलप्रक्रियया—

मेढ्रस्याधः कुलो ज्ञेयो मध्ये तु विषसंज्ञितः ।
मूले तु शाक्तः कथितो बोधनादप्रवर्तकः ॥
अग्निसंज्ञस्ततश्चोर्ध्वमङ्गुलानां चतुष्टये ।
नाभ्यधः पवनाधारे नाभावेव घटाभिधः ॥
नाभिहृन्मध्यमार्गे तु सर्वकामाभिधो मतः ।
संजीवन्यभिधानाख्यो हृत्पद्मोदरमध्यगः ॥
वक्षःस्थले स्थितः कूर्मो गले लोलाभिधः स्मृतः ।
लम्भकस्य स्थितश्चोर्ध्वे सुधाधारः सुधात्मकः ॥
तस्यैव मूलमाश्रित्य सौम्यः सोमकलावृतः ।
भ्रूमध्ये गगनाभोगे विद्याकमलसंज्ञितः ॥
रौद्रस्तालुतलाधारो रुद्रशक्त्या त्वधिष्ठितः ।
चिन्तामण्यभिधानाख्यश्चतुष्पथनिवासि यत् ॥
ब्रह्मरन्ध्रस्य मध्ये तु तुर्याधारस्तु मस्तके ।
नाड्याधारः परः सूक्ष्मो घनव्याप्तिप्रबोधकः ॥
इत्युक्ताः षोडशाधाराः………………। इति ।

---

१. जन्माख्ये नाडिचक्रं तु नाभौ मायाख्यमुत्तमम् ॥
हृदिस्थं योगिचक्रं तु तालुस्थं भेदनं स्मृतम् ।
बिन्दुस्थं दीप्तिचक्रं तु नादस्थं शान्तमुच्यते ॥ (ने० त० ७।२८-२९)

In Public domain. Digitization Muthulakshmi Research Academy

णि अन्तर्बहिरुभयरूपाणि लक्ष्याणि लक्षणीयानि यत्र, निरावरणरूपत्वात् खमनन्तं तु जन्माख्यं" (७।२७) इति वक्ष्यमाणानां जन्म-नाभि-हृद्-बिन्दु-नादरूपाणां ोम्नां पञ्चकं विद्यते यत्र, "जन्ममूले तु मायाख्यो" (७।२२) इत्यभिधास्यमाना- तन्यावृतिहेतुत्वाद् ग्रन्थयो माया-पाशव-ब्रह्म-विष्णु-रुद्र-ईश्वर-सदाशिव-इन्धिका-दीपिका- दव-नाद-शक्त्याख्या ये पाशास्तैः संयुक्तम्; इच्छादिना शक्तित्रयेण सम्यगन्वितमेषणी- दिविषये प्रवर्तमानम्; सोम-सूर्य-वह्निरूपधामत्रयपथैः सव्यापसव्यपवनैर्मध्यमपवनेन धिष्ठितम्; इडा-पिङ्गला-सुषुम्नाख्येन पवनाश्रयेण नाडित्रयेण युक्तम्; गान्धारी-हस्तिजिह्वा- ा-यशा-अलम्बुसा-कुहू-शङ्खिनीभिश्च युक्तत्वाद् दश नाडयः पन्थानो येषां प्राणापान- ानोदानव्याननागकूर्मकृकरदेवदत्तधनञ्जयाख्यास्तैरासमन्ताद्धृतमोतप्रोतम्; दिग्दशकावस्थित- डिदशकप्रपञ्चभूताभिर्द्वासप्तत्या सहस्रैर्मध्यव्याप्त्या सार्धकोटित्रयेण च महाव्याप्त्या नाडिवृन्दैः ाक्रान्तम्; आणवमायीयकार्ममलयोगान्मलिनं······शरीरं ज्ञात्वा योगी····· गतव्याधि- व्यदेहो भवति" इति ।

योगी चक्राधारग्रन्थ्यादीन्येतानि मन्त्रवीर्यभूतचित्स्फुरत्तात्मना ज्ञानशूलेन भित्त्वा लवञ्चनमुखेन मृत्युजित् कालजिच्च भूत्वा निरञ्जनं पदमश्नुते । तत्रेयं प्रक्रिया— धकश्चित्तप्राणैकाग्र्येण कन्दभूमिमवष्टभ्य संकोचविकासाभ्यासेन शक्त्युन्मेषमुपलक्ष्य मत्तगन्ध- ानं पीडयेद् यथा शक्तिरूर्ध्वमुखैव भवति । कन्दभूमिविस्फुरितयाऽनया शक्त्या योगी

. खमनन्तं तु जन्माख्यं नाभौ व्योम द्वितीयकम् ।
तृतीयं तु हृदिस्थाने चतुर्थं बिन्दुमध्यतः ॥
नादाख्यं तु समुद्दिष्टं······(७।२७–२८)

. जन्ममूले तु मायाख्यो ग्रन्थिर्जन्मनि पाशवः ॥
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
कारणस्यास्तु पञ्चैवं ग्रन्थयः समुदाहृताः ॥
इन्धिकाख्यस्तु यो ग्रन्थिर्द्विमार्गाशमनः शिवः ।
तदूर्ध्वे दीपिका नाम तदूर्ध्वे चैव बैन्दवः ॥
नादाख्यस्तु महाग्रन्थिः शक्तिग्रन्थिरतः परः । (७।२२–२५)

"इन्धिकाख्यो ग्रन्थिर्द्विमार्गाशमन इति निरोधिकास्पृष्टवामदक्षिणवाहनिःशेषप्रशमनहेतुः, अत एव शिव ऊर्ध्वैकमार्गारोहकत्वात् श्रेयोरूपः" इति तत्रैव क्षेमराजः । अमृतानन्दस्तु— "षट्चक्राणां प्रत्येकमूर्ध्वाधो ग्रन्थिद्वयमिति द्वादश ग्रन्थयः" (दी० पृ० २८७) इत्याह । लक्ष्मीधरस्तु ग्रन्थित्रयमेव व्याख्याति । एतच्चात्रैव १०६ पृष्ठे टिप्पण्यां द्रष्टव्यम् ।

. जन्माधारस्य सुश्रोणि पर्यायान् शृण्वतः परम् ।
जन्मस्थानं तु कन्दाख्यं कूर्माख्यं स्थानपञ्चकम् ॥
मत्स्योदरं तथैवेह मूलाधारस्तथोच्यते । (ने० त० ७।३१-३२)

खेचर्याख्यां मुद्रां लभेत । लब्धया तु तया यदा आत्माणुर्मुद्रितस्तद्वशः संपन्नस्तदा मन्त्रवीर्य- स्फुरत्तात्मना विज्ञानेनोर्ध्वं द्वादशान्तं यावत् प्रसरेत् । तत्र परं शिवं विक्षोभ्य समनापदावरोहणेन सृष्ट्युन्मुखं कृत्वा तत्र परमानन्दमयममृतं प्राप्य महाप्रकाशात्म समनारूढं धाम लीलया विक्षोभ्यापानोल्लासाख्यं चन्द्रोदयं प्रतीक्षेत । चन्द्रोदये सति तस्माच्छुद्धममृतं प्राप्यान्तर्मुखीभूतया स्वशक्त्या मध्यमार्गेणाधोधः कर्षयेत्, तेन च चक्राधारादि सर्वं निषिञ्चेत् । ब्रह्मस्थानं हृद्धाम यावत्तदमृतं प्राप्तं भवति । ततोऽप्यधो नाभेरधःस्थाने निषिच्य कालाग्न्यन्तमापूर्य समन्तात् परिपूर्णं देहं स्मरेत् । ततः सर्वरोमकूपैः प्रसृत्यान्तर्बहिरासादितव्याप्ति सर्वदिक्कममृतार्णव- प्लावनसमरसीभूतपरमामृतरूपमिच्छाज्ञानक्रियाशक्तिकचितं परमशिवरूपं निरामयमात्मानं चिन्तयेदिति ।

नित्याषोडशिकार्णवे रूपकमुखेनैष एवार्थः प्रदर्शितः । तद्यथा—

यदोल्लसति शृङ्गाटपीठात् कुटिलरूपिणी ॥
शिवार्कमण्डलं भित्त्वा द्रावयन्तीन्दुमण्डलम् ।
तदुद्भवामृतस्यन्दपरमानन्दनन्दिता ॥
कुलयोषित् कुलं त्यक्त्वा परं पुरुषमेति सा ।
निर्लक्षणं निर्गुणं च कुलरूपविवर्जितम् ॥ (४।१२-१४) इति ।

मूलाधारगतचतुर्दलपद्ममध्यत्रिकोणकुलस्थानमत्र शृङ्गाटपदेनोच्यते । लक्ष्मीधरेण सौन्दर्यलहरीटीकायां श्रीचक्रस्यान्तरोपासनायामेषैव प्रक्रिया यथा समाश्रिता तथाऽस्माभिः "श्रीविद्यायाः समयिसम्प्रदायः" इत्याख्ये निबन्धे[1] प्रतिपादितं तत एवावलोकनीयम् । विद्यानन्देन—"मूलादिभ्रूमध्यान्तग्रन्थिद्वादशविगलयितृ व्योमपञ्चकभञ्जयितृ" (पृ० ६७) इति श्रीचक्रविशेषणमुखेनैष एवार्थः स्मृतः । शाक्तानुभवपूर्वकं मूले स्थितायाः कुण्डलिन्याः षट्चक्रपञ्चगगनद्वादशग्रन्थिभेदक्रमेणाकुलसमावेशो योगिनीहृदये दीपिकायामपि च (पृ० २८७-२९०) प्रकाशितः। एवं च नेत्रतन्त्रप्रतिपादिताद्योगात् त्रिपुरातन्त्रप्रतिपादितयोगस्य सत्यपि साम्ये कश्चन विशेषोऽपि दृश्यते । योगिनीहृदये (३।१४६) आधारार्थे रन्ध्रशब्दः प्रयुक्तः । तत्र दीपिकायामाधारस्वाधिष्ठानमणिपूरानाहततदूर्ध्ववज्रपद्मकण्ठलम्बिकाविशुद्ध्या- ज्ञाख्यानि नवाधाराणि परिगण्य प्रमाणरूपेणैतत्स्वच्छन्दसंग्रहवचनमुदाहृतम्—

आधारं स्वाधिष्ठानं च मणिपूरमनाहतम् ।
मध्यमं वज्रकण्ठं च लम्बिकां च विशुद्धिकाम् ॥
आज्ञां च नवकं विद्धि षट्चक्राणि त्रिहीनकम् । (पृ० २९५)

"मरुदुद्भवहेतुत्वात्, मध्यनाडीकन्दरूपत्वात्, कूर्माकारत्वात्, पृथिव्यादिव्योमान्ततत्त्व- पञ्चकस्थानत्वात्, मत्स्योदरवत् स्फुरणात्, मूलभूतत्वाच्च जन्मा(न्मस्थाना)द्याख्यायते" इति क्षेमराजः । मत्स्योदरापराभिधमूलाधारकेन्द्रितयोगमार्गप्रदर्शकत्वादेवैतच्छास्त्रं मत्स्योदरीमतनाम्नाऽपि परिचीयते ।

१. चन्द्रशेखरशास्त्रि-अभिनन्दनग्रन्थ, पृ० १३-२० ।

In Public domain. Digitization Muthulakshmi Research Academy

"मूलादिषट्चक्रलम्बिकाललाटब्रह्मरन्ध्राख्यनवाधारेषु" (पृ० ४०) इत्यर्थरत्नावलीकारः।
धारनवकमकुल-सहस्रार-मूलाधार-स्वाधिष्ठान-मणिपूरक-अनाहत-विशुद्धि-लम्बिका-आज्ञा-
द्रूपम्" (पृ० ६६) इति चिद्वल्लीकारः। योगिनीहृदये—

अकुले विषुसंज्ञे च शाक्ते वह्नौ तथा पुनः।
नाभावनाहते शुद्धे लम्बिकाग्रे भ्रुवोऽन्तरे ॥ (१।२५)

न नवाधाराण्येव सूचितानि। व्याख्यातानि च तथैव स्वच्छन्दसंग्रह-
ण्येन दीपिकायाम्। अत्रत्यान्याद्यानि चत्वारि नामानि प्रायस्तान्येव यानि
न्त्रोद्धृतकुलप्रक्रियायां प्रदर्शितानि। तत्र कुल इति प्रथमं नाम, अत्र चाकुलमिति।
। "अकुलादिषु" (२।८) इति श्लोके स्थानेष्वेतेषु नवचक्राराधनमुपदिष्टम्। नवचक्रात्मक-
क्रसमाराधनप्रवणेषु त्रिपुरातन्त्रेषु स्वप्रयोजनानुगुणमाधारनवकमेवाङ्गीकृतमित्येतेन
ते। वरिवस्यारहस्यप्रकाशे—"सुषुम्णाख्यनाडीमूलाग्रयोर्द्वे सहस्रदलकमले, मध्ये चाष्टदल-
शादीनि त्रिशत्पद्मानि सविस्तरं स्वच्छन्दसंग्रहादौ प्रपञ्चितानि" (पृ० १६) इति कश्चन
। उक्तः। एष चार्थो योगिनीहृदयदीपिकाकारेणापि सूचितः (पृ० ३९)। स्वच्छन्द-
तु साम्प्रतं नोपलभ्यते, अतोऽत्र विषये नाधिकं किमपि वक्तुं पार्यते।

श्रीतत्त्वचिन्तामणिस्थे षट्चक्रविवरणे सौन्दर्यलहर्यां लक्ष्मीधरायामन्येषु परवर्तिषु
। मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धयाज्ञाख्यानि षट् चक्राणि प्रतिपाद्यन्ते।
त्रे तु जन्म-नाभि-हृत्-तालु-विन्दु-नाद-स्थानानि नाडि-माया-योगि-भेदन-दीप्ति-शान्ताख्यानि
क्राणि प्रतिपाद्यन्त इति पूर्वमेवोक्तम्। मूलाधारस्वाधिष्ठानादीनां नाडिमायादीनां च
ां स्थानानि प्रायः समानान्येव। नाडिप्रसरहेतुत्वात्, "नाभिचक्रे कायव्यूहज्ञानम्"
० सू० ३।२५) इति नीत्या समस्तमायाप्रपञ्चख्यातिहेतुत्वात्, योगिनां चित्तैकाग्र्य-
त्, प्रयत्नेन भेदनीयत्वात्, दीप्तिरूपत्वात्, शान्तिप्रदत्वाच्चैतानि चक्राणि नाडिमाया-
न्वर्थैः पदैरभिधीयन्ते स्म। परवर्तिनि तु काले तानि मूलाधारस्वाधिष्ठानादिसंज्ञाभिः
हृकृतान्यक्रियन्तेति तु वयं प्रतीमः।

उपर्युद्धृतेष्वन्येषु च योगशास्त्रग्रन्थेषु चक्राणामाधाराणां च संकर इव दृश्यते। सिद्ध-
तपद्धतिसदृशेषु हठयोगग्रन्थेष्वपि—"नवचक्रं कलाधारं त्रिलक्ष्यं व्योमपञ्चकम्" (२।३१)

हठयोगप्रतिष्ठापको गोरक्षनाथः कुलमतप्रतिष्ठापकस्य मत्स्येन्द्रनाथस्य शिष्य इति बहुप्रचा-
रितोऽयमर्थो विद्वद्गोष्ठीषु। तन्नासमञ्जस्यं रोचते। मत्स्येन्द्रः कौलमार्गप्रवर्तकः प्रथमा-
चार्यं इत्यघोरशिवाचार्येण मृगेन्द्रवृत्तिदीपिकायां (पृ० ७४) प्रत्यपादि। तन्त्रालोकेऽ-
भिनवगुप्तेन सकलकुलशास्त्रावतारकतया प्रसिद्धो मच्छन्दविभुः स्तुतः। श्रीमता डॉ०
कान्तिचन्द्रपाण्डेयमहोदयेन स्वकीये 'अभिनवगुप्त' इत्याख्ये ग्रन्थे (पृ० ५४८) मत्स्येन्द्र-
शिष्यपरम्परा न्यदर्शि, यत्राभिनवगुप्त ऊनविंशः पुरुषः। तत्र न दृश्यते गोरक्षनाथस्य

इत्यादिना कौलिको योगः, "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि" (२।३२) इत्यादिना च पातञ्जलो योगः प्रतिपाद्यते। हठयोगप्रदीपिकाप्रभृतिष्वपि तथैव कौलिकस्य पातञ्जलस्य च योगस्य प्रतिपादनं भवति। वर्तते किल तत्र स्वकीयमपि वैशिष्ट्यं पार्थक्येन। तच्च षट्कर्मप्रतिपादने बन्धनिरूपणे च प्राधान्येन दरीदृश्यते। सर्वमेतद् भूरि-विचारसहमिति नाधुना प्रतन्यते।

तान्त्रिकः षडङ्गो योगः

पातञ्जले योगशास्त्रेऽष्टाङ्गो योगः प्रतिपाद्यते। यमनियमासनप्राणायामप्रत्याहारध्यान-धारणासमाधिरूपाणि च तान्यष्टाङ्गानीत्युक्तप्रायम्। तन्त्रेषु तु—शैवेषु, वैष्णवेषु, बौद्धेषु च—षडङ्गो योगो वर्णितः। तद्यथा—

प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते॥

नाम। शिष्यपरम्परामेनामाश्रित्य पाण्डेयमहोदयेन पञ्चमी शताब्दी खीष्टस्य मत्स्येन्द्र-नाथसमयो निर्धारितः। अत्र नैवासामञ्जस्यं किमपि वयं पश्यामः। प्रतिपादितश्चाय-मर्थोऽस्माभिः "त्रिपुरादर्शनस्यापरिचिता आचार्याः कृतयश्च" (सारस्वती सुषमा, व० २०, अ० २, पृ० १३-१४) इत्याख्ये निबन्धे।

तन्त्रालोकादिषु बहवो ग्रन्थाः कुलमतप्रतिपादकाः प्रमाणीक्रियन्ते। डा० प्रबोध-चन्द्रबागचीसम्पादिते कौलज्ञाननिर्णयेऽपि (पृ० ७५) तन्त्रालोकस्मृताः कुलपञ्चा-शिका-ऊर्मिकौल-सिद्धामृतप्रभृतयो ग्रन्थाः स्मर्यन्ते। अभिनवगुप्तो मच्छन्दं विभुविशेषणेन संयोजयति। प्रमाणैरेतैर्बहुकालव्यापिनीयं शिष्यपरम्परा शास्त्रपरम्परा चेति सिद्ध्यति। एवं सत्यपि डा० बागचीमहोदयैर्मत्स्येन्द्रनाथसमयो नवमी दशमी वा शताब्दी खीष्टस्य निर्धारितः (कौलज्ञाननिर्णयस्य भूमिका, पृ० २५-२८)। एष एव समयस्तस्य श्रीमत्या डा० कल्याणीमल्लिकमहोदययाऽप्यङ्गीक्रियते सिद्धसिद्धान्तपद्धतिभूमिकायाम् (पृ० ११)। मत्स्येन्द्रनाथस्याभिनवगुप्तेन स्मृतत्वात्तत्पूर्ववर्तित्वमनिवार्यतयाऽऽपतितम्। इतिहासक्रमे कालगणनायां प्रतिसन्तति पञ्चविंशतिवर्षाणामन्तरमङ्गीक्रियते तदभिज्ञैः। शिष्यपरम्परायामप्येष एव क्रमोऽङ्गीकर्तव्यः। डा० कल्याणीमल्लिकमहोदयया तु गोरक्षस्य मत्स्येन्द्रशिष्यतासम्पादनाय शिष्यपरम्परायां वर्षशतस्यान्तरमङ्गीक्रियते। अत्र युक्तायुक्तत्वमैतिहासिका एव विचारयन्तु। मत्स्येन्द्रगोरक्षमतयोः सिद्धान्तगतं यौगिकप्रक्रियागतं चापि वैषम्यमनयोर्भिन्नसन्तानत्वमेव पोषयति।

किञ्च, अद्वयवज्रसंग्रहे चतुर्मुद्राप्रकरणे (पृ० ३२) हठयोग इति सेकहठयोग इति च दर्शनाद् गोरक्षनाथस्य हठयोगप्रतिष्ठापयितृत्वमपि संदिग्धमेव। अत्र मनीषिभिः पूर्वाग्रहग्राहविनिर्मुक्तैः सविशेषं दत्तावधानैः पुनरपि परिशीलनीयोऽयं विषयः।

In Public domain. Digitization Muthulakshmi Research Academy

न्त्रालोकविवेक(आ० ४, पृ० १५)धृतागमवचने योगस्य षडङ्गानि भाषितानि। ातञ्जलयोगप्रतिपादितानि यमनियमासनरूपाणि त्रीण्यङ्गानि न दृश्यन्ते। पञ्चकमुभयत्र समानम्, यद्यपि प्रतिपादनपद्धतौ वर्तते भेदः। तर्काख्यो योगाङ्गोऽत्रा- दृश्यते पातञ्जलयोगापेक्षया। "योगाङ्गत्वे समानेऽपि तर्को योगाङ्गमुत्तमम्" ।८) इति च भाष्यते तद्विषये मालिनीविजयोत्तरे तन्त्रालोके (४।१५) च। यम- सर्वेष्वेव भारतीयेषु दर्शनेषु धर्माङ्गत्वेन चित्तशुद्धिसाधनत्वेन चाविशेषं प्रतिपाद्येते। ़्यो योगाङ्गस्तन्त्रेषु किमर्थं परित्यक्त इति विचारणीयोऽयं विषयः। यावदुपलब्धानामपि नां देवनागरसंस्करणाभावादत्र सप्ताङ्गयोगप्रतिपादकं मृगेन्द्रागमयोगपादमाश्रित्य ्यते। तत्र हि—

प्राणायामः प्रत्याहारो धारणा ध्यानवीक्षणे।
जपः समाधिरित्यङ्गान्यङ्गी योगोऽष्टमः स्वयम् ॥

ऽपि योगाङ्गेषु समावेशितः, एवं चैषां लक्षणानि तत्र प्रदर्शितानि—

प्राणः प्रागुदितो वायुरायामोऽस्य प्रखेदनम्।
प्रेरणाक्षिप्तिसंरोधलक्षणं क्रतुदोषनुत् ॥
ततः सुखलवास्वादे तेषां वृत्तस्य चेतसः।
प्रत्याहारो विधातव्यः सर्वतो विनिवर्तनम् ॥
तेनेन्द्रियार्थसंसर्गविनिवृत्तेश्रितो मतिः।
धारणायोग्यतामेति पदे स्वेच्छाप्रकल्पिते ॥
चिन्ता तद्विषया ध्यानं तच्चादिष्टं मुहुर्मुहुः।
तदेकतानतामेति स समाधिर्विधीयते ॥
जपस्तद्भाषणं ध्येयसंमुखीकरणं मुने।
ऊहोऽभिवीक्षणं वस्तुविकल्पानन्तरोदितः ॥ (१।४-८)

ज्ञानयोगक्रियाचर्याख्यपादचतुष्टयात्मकेष्वन्येष्वपि शैवागमेष्वेतदनुकारमेव योगाङ्गानां क्रमष्टकं वा निरूपितं स्यात्। पाञ्चरात्रागमीयविष्णुसंहितायाम्—

प्राणायामोऽत्र पूर्वं तु प्रत्याहारोऽथ धारणा।
ततस्तर्कः समाधिश्च ध्यानं चाङ्गानि षट् क्रमात् ॥ (२०।५७-५८)

ान्येव योगाङ्गानि क्रमव्यत्यासेन वर्णितानि, लक्षितानि चैवम्—

प्राणानां यस्त्विहायामः क्रमादेवं प्रकीर्तितः ॥
सर्वशास्त्रेषु शास्त्रज्ञैः प्राणायामः स उच्यते।
नाभ्यादिषु यथोद्दिष्टं बीजं भूतगुणात्मकम् ॥
क्रियाभिर्धार्यते याभिस्तत्क्रिया धारणा मता।
अन्वयव्यतिरेकाभ्यां यस्माद् यदुपलभ्यते ॥
धारणादिषु कालेषु स तर्कः संप्रकीर्तितः।

अविपर्यासरूपेण यथाकर्म गुणात्मकम् ॥
समाधिश्चेह विज्ञेयो धारणाभिस्त्रिभिस्त्रिभिः।
ध्यातृध्येयस्वरूपं यत् तत्र रुध्यात् प्रवर्शनम् ॥
समाधिस्त्रिगुणं यावदेवं ध्यानस्य लक्षणम्।
(२०।६१-६२, ६८-७२)

अत्र द्वितीययोगाङ्गस्य प्रत्याहारस्य लक्षणं न दृश्यते।

गुह्यसमाजाख्ये बौद्धतन्त्रे—

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा।[1]
अनुस्मृतिः समाधिश्च षडङ्गो योग उच्यते ॥ (१८।१४०)

इत्येवं षडङ्गो योग उक्तः। अत्र शैववैष्णवागमपरिगृहीतस्य तर्कस्य स्थानेऽनुस्मृतेः समावेशः। गुह्यसमाजोक्त एष षडङ्गो योगोऽन्येषामपि बौद्धतन्त्रग्रन्थानां साहाय्येन सम्यग् व्याख्यातो गुरुभिः स्वकीयस्य "भारतीय संस्कृति और साधना" इत्याख्यस्य ग्रन्थस्य प्रथमे भागे (पृ० ५३७–५४०) इति तत एवावलोकनीयः। एवं योगाङ्गप्रतिपादने मतभेदे जाग्रत्यपि षडङ्गो योगः सर्वेष्वपि शैववैष्णवबौद्धतन्त्रेषु वर्ण्यत इति स तान्त्रिकयोगनाम्नाऽत्र संबोधितः।

सप्रश्रयनिवेदनम्

एवमितो वर्षपञ्चकात् प्राक् कृतारम्भस्यास्य ग्रन्थस्य सम्पादनकर्मण इतिकर्तव्यताऽत्र परिसमाप्यते। अस्मिन् शुभे कर्मणि कृतसहायानां सहृदयानां सुहृदामादरणीयानां विदुषां परमश्रद्धास्पदानां गुरूणां च स्मरणमवसरप्राप्तमत्र चर्च्यते। सर्वप्रथममत्र तत्रभवानभिनव- गुप्तपादाचार्यः, श्रीमान् लक्ष्मीधरः, सर्वतन्त्रस्वतन्त्रः श्रीभास्कररायश्च सश्रद्धं स्मर्यन्ते। विद्वद्भिरेतैः क्षुण्णेन पथा प्रवृत्तानां लक्ष्मीधरभास्कररायमन्तव्यानि यत्र क्वचन समालोचयतामप्यस्माकं चेतसि तौ प्रति श्रद्धाभरो नाणुमात्रमपि क्षणमपि तिरोबभूव। वयमेतानन्यांश्च पूर्वाचार्यान् सर्वप्रथमं प्रणमामः। तदनु येषां कृपाभरेणागमिकदर्शनानुशीलन- रुचिरस्मासु समुद्भूता, तेषां वन्दनीयचरणानां गुरुवर्याणां कविराजमहोदयानां चरणयोरयं शब्दसुमनोऽञ्जलिः समर्प्यते। विगतेषु मासेषु महानुभावानामेतेषां सान्निध्येनैवायमुपो-

---

१. प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥
इत्येवं दृश्यते पाठो भगवद्गीताभास्करभाष्ये (पृ० १२७)। अत्र पूर्वार्धो गुह्यसमाजक्रममनुकरोति, किन्तूत्तरार्धे नास्त्यनुस्मृतेः परिगणनम्। तस्य स्थाने तर्कस्यैव तन्त्रालोकादिशैववैष्णवागमप्रतिपादितस्य योगाङ्गत्वेन ग्रहणम्। अत्र प्राणायामस्थाने प्रत्याहारस्य प्रथमोपादाने हेतुश्चिन्तनीयः।

In Public domain. Digitization Muthulakshmi Research Academy

तभागः पूर्णतामगात् । तदिदं सान्निध्यं योगतन्त्रविभागे व्याख्यातृरूपेणाऽस्मान् नियोजयतां नीयानामुपकुलपतीनां श्रीगौरीनाथशास्त्रिमहोदयानां कृपयाऽलम्भि । एतदर्थं कैः शब्दैस्तान- न्दामो वयम् । ग्रन्थसंस्करणे टिप्पणीषूपोद्घाते च प्रयुक्तानां मातृकाणां विभिन्नाभ्यः ाभ्यो मूलमातृकाप्रतिलिप्यधिगमे संग्रहेऽवलोकने च कृतसहायानां संस्कृतविश्वविद्यालयो- कुपतिचराणां पण्डितश्रीसुरत्तिनारायणमणित्रिपाठिमहोदयानामनुसन्धानसंचा- ाणां ेत्रेशचन्द्रचट्टोपाध्यायानां वर्तमानानुसन्धानसंचालकश्रीबलदेव-उपाध्यायमहोदयानः सर- ीभवनग्रन्थाध्यक्षचराणां डा० सुभद्रझामहोदयानां वर्तमानग्रन्थाध्यक्षश्रीविभूतिभूषण- चार्याणां च भृशमुपकारं स्मरामः । तासां तासां संस्थानामधिकारिणो वयं साधुवादैः जयामः, याभ्यो मूलमातृकास्तत्प्रतिलिप्यो वाऽधिगता अस्माभिः । मातृकापरिचयप्रसङ्गे ासां सर्वासां नामानि सूचितान्येवास्माभिः । यात्राप्रसङ्गेषु याभ्यः संस्थाभ्यो व्यक्तिभ्यश्च य्यमुपगतम्, सर्वास्ताः सादरं स्मृता अस्माभिर्यात्राविवरणप्रकाशके निबन्धे सूर्योदयपत्रे शेते । ग्रन्थसम्पादनकर्मणि कृतसहायेषु सर्वप्रथमं काशीहिन्दूविश्वविद्यालयस्य संस्कृत- विद्यालयाध्यक्षचरौ श्रीरामचन्द्रदीक्षित-श्रीरामचन्द्रशास्त्रिणौ सविनयं स्मर्येते, एतयो- र्पणोः साहाय्येनैवास्माभिः संदिग्धस्थलपाठसंशोधने सामर्थ्यमधिगतम् । अत एव ामस्माभिष्टिप्पणीसमाप्तौ—"रामचन्द्रसहायेन" (पृ० ३२८) इत्यादि । उद्धरणानां निर्देशे, उपोद्घातभाषायां भावव्यञ्जनासमर्थानां विशिष्टानां पदानां समुपस्थापने च ाविश्वविद्यालये आगमाध्यापकैः सुहृद्वरैः श्रीरघुनाथपाण्डेयमहोदयैः, व्याकरणगतसंशीति- णे च व्याकरणव्याख्यातृभिः सुहृद्वरैः श्रीकालिकाप्रसादशुक्लमहोदयैर्भृशमुपकृतम् । कलने यदा तदा साहाय्यमाचरन्तौ वाराणसेयसंस्कृतविश्वविद्यालयप्रकाशनविभागपण्डितौ ेश्वरपाण्डय-हरिहरदत्तदीक्षितौ सस्नेहं स्मर्येते । अन्तिमे 'प्रूफ'संशोधने सविशेषं धानान् संस्कृतविश्वविद्यालयमुद्रणालयस्थान् पण्डितान् श्रीविभूतिनारायणपाण्डेय- श्रमणित्रिपाठि-अम्बिकेश्वरमिश्र-दुक्खोपाध्यायान् साधुवादैः सभाजयामः । मुद्रणाक्षर- नादिकर्मसु सविशेषं दत्तावधानान् वाराणसेयसंस्कृतविश्वविद्यालयमुद्रणालयस्थान् कर्म- गः श्रीसत्यचरणभट्टाचार्य-मुन्नरराम-रामजी-रणजीतसिंह-आत्मारामपाण्डेयानपि धन्यवाद- संयोजयामः । सर्वान्ते चानुक्रमणीभागस्य निर्माणे कृतसहायां ज्येष्ठपुत्रीं सौ० सुषमा- र्वादशतैः सभाजयामः । अत्र संस्करणे यत्किमपि वैशिष्ट्यं परिलक्ष्येत तत्सर्वं सर्वेषामत्र नामेतेषां महानुभावानां साहाय्येनैवाहितं भवति । याश्च त्रुटयोऽत्रावशिष्टास्ता मदीयेनैव ान्द्येन वा दृष्टिदोषेण वेति सोढव्यास्ता मनीषिभिः, "गच्छतः स्खलनं क्वापि" इति दित्येतावदेवोक्त्वा विरम्यते साम्प्रतम् ॥

विदुषामाश्रवः—

व्रजवल्लभद्विवेदः

वा० सं० वि० वि० योगतन्त्रविभागे व्याख्याता ।

्णिमा, संवत् २०२५
७-१९६८ ई०
ासी ।

संकेतपरिचयः

अभि.	अभियुक्ताः ।
अर्थ.	अर्थरत्नावली ।
आ.	आथर्वणः ।
ई. उ.	ईशावास्योपनिषद् ।
ई. प्र.	ईश्वरप्रत्यभिज्ञा ।
ई. प्र. वि.	ईश्वरप्रत्यभिज्ञाविमर्शिनीः ।
उ. भै.	उन्मत्तभैरवः ।
उ. ष.	उत्तरषट्कम् ।
ऋ.	ऋग्वेदः ।
ऋजु.	ऋजुविमर्शिनी ।
ऐ. आ.	ऐतरेयारण्यकम् ।
क. क्र.	कर्मकाण्डक्रमावलिः ।
कु. सं.	कुमारसंभवम्
ग. स्तो.	गङ्गाधरस्तोत्रम् ।
गी. नि.	गीतानिष्यन्दः ।
चि.	चिद्वल्ली कामकलाविलासटीका (मद्रासमुद्रितं तृतीयं संस्करणम्)।
चि.	चिद्विल्लासः ।
छा. उ.	छान्दोग्योपनिषद् ।
ज्ञा. सा.	ज्ञानसारः ।
त.	तन्त्रराजतन्त्रं कादिमताख्यम् ।
त. वि.	तन्त्रालोकविवेकः ।
त. स.	तन्त्रसद्भावः ।
तन्त्रा.	तन्त्रालोकः ।
तिमि.	तिमिरोद्घाटः ।
तै. आ.	तैत्तिरीयारण्यकम् ।
तै. उ.	तैत्तिरीयोपनिषद् ।
तै. ब्रा.	तैत्तिरीयब्राह्मणम् ।
तै. सं.	तैत्तिरीयसंहिता ।
त्रि. क.	त्रिपुरसुन्दरीकल्पलता ।
त्रि. द.	त्रिपुरसुन्दरीदण्डकम् ।
त्रिपु.	त्रिपुरार्णवः ।
त्रि. सा.	त्रिपुरासारसमुच्चयः ।
द. स्मृ.	दक्षस्मृतिः ।
दी.	दीपिका (योगिनीहृदयव्याख्या) ।
ने. त.	नेत्रतन्त्रम् ।
प. त्रि.	परात्रिंशिका ।
प. सा.	परमार्थसारः ।
प्र. सा.	प्रपञ्चसारः ।
प्र. सा. वि.	प्रपञ्चसारविवरणम् ।
प्र. सं.	प्रपञ्चसारसंबन्धदीपिका ।
प्र. हृ.	प्रत्यभिज्ञाहृदयम् ।
बृ. उ.	बृहदारण्यकोपनिषद् ।
बो. प.	बोधपञ्चदशिका ।
भ. ग.	भट्टगङ्गाधरः ।
भ. गी.	भगवद्गीता ।
भा.	भास्करी (ईश्वरप्रत्यभिज्ञाविमर्शिनीव्याख्या) ।
म.	महार्थमञ्जरी ।
म. प.	महार्थमञ्जरीपरिमलः (त्रिवेन्द्रम्संस्करणम्) ।
म. भा.	महाभारतम् (गीताप्रेस-संस्करणम्) ।
म. शा.	मतशास्त्रम् ।
मतो.	मतोत्तरम् ।
मन्त्र.	मन्त्रराजः ।
म. स्मृ.	मनुस्मृतिः ।
मा. वि.	मालिनीविजयोत्तरम् ।
यो. वा.	योगवाशिष्ठम् ।

In Public domain. Digitization Muthulakshmi Research Academy